ॐ

श्रीवेदपुरुषाय नमः

श्रीमते रामानुजाय नमः



अनन्तश्रीविभूषित-त्रिदण्डि-पराङ्कुशाचार्यस्वामिवर्यैः सङ्कलिता

# श्रीवैकुण्ठ-चन्द्रिका



प्रकाशक

श्रीवैष्णव परिषद्, नेपाल

Upayogibooks.com

॥ श्रीमते रामानुजाय नमः ॥ श्रीवेदपुरुषाय नमः ॥

श्रीत्रिदण्डि–पराङ्कुशाचार्यैः

सङ्कलिता

# श्रीवैकुण्ठचन्द्रिका

प्रकाशक

श्रीवैष्णव परिषद्, नेपाल

Upayogibooks.com

लेखक/सङ्कलक : अनन्तश्री विभूषित त्रिदण्डी
श्रीपराङ्कुशाचार्य स्वामीजी

कृति : श्रीवैकुण्ठचन्द्रिका

विधा : कर्मकाण्ड

प्रकाशक : श्रीवैष्णव परिषद्, नेपाल

प्रकाशन मिति : फागुन, २०७७

संस्करण : चतुर्थ

सर्वाधिकार : श्रीशुकदेव भागवत आश्रम,
श्रीलक्ष्मीहरि मन्दिर, गैंडाकोट, नवलपरासी

प्रति : ३००० (तीन हजार)

सहयोग : रु. ७५०/-

मुद्रण : सिग्मा जनरल अफसेट प्रेस
सानेपा, ललितपुर, फोन : ०१-५५५४०२९

श्रीहरये नमः । श्रीमते रामानुजाय नमः । श्रीरङ्गसूरये नमः ॥

# सानो विज्ञप्ति

सव्यं पादं प्रसार्याश्रितदुरितहरं दक्षिणं कुञ्चयित्वा
जानुन्याधाय सव्येतरमितरभुजं नागभोगे निधाय ।
पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयञ्शङ्खचक्रे
देवीभूम्यादिजुष्टो वितरतु जगतां शर्म वैकुण्ठनाथः ॥

सर्वमङ्गलमाङ्गल्यं सर्वोपद्रवनाशनम् ।
वन्दे रामानुजार्यस्य नित्यं पादाम्बुजद्वयम् ॥

भगवत्प्रपन्नजनले पनि स्वरूपानुरूप वेदोक्तकर्म अवश्य गर्नुपर्ने हुँदा ज्ञानानुष्ठानसम्पन्न दीक्षाचार्य शिक्षाचार्यहरूबाट अवगत गरे अनुसार श्रीवैष्णवीय कर्मकाण्डका पुस्तकहरू 'श्रीवैकुण्ठचन्द्रिका', 'श्रीहवनपद्धतिः', 'श्रीपितृयागपद्धतिः' ग्रन्थत्रय लेखिएको थियो । आवश्यकतानुसार केही संस्करण छापिएर समाप्त भई पुनः श्रीवैष्णव जगत्मा माग भएको हुँदा 'श्रीशुकदेव भागवत आश्रम' (श्रीलक्ष्मीहरि मन्दिर)गैंडाकोटको स्वामित्वमा रहने गरी 'बृहत् श्रीवैष्णवीयकर्मकाण्ड संगोष्ठी २०७०, पोखरा)मा निर्णय भए बमोजिम विद्वान् आचार्यहरूको सल्लाह सुझाव अनुसार आवश्यक संशोधन गरी 'श्रीवैष्णव परिषद् नेपाल'लाई प्रकाशन गर्न अनुमति दिँदै यिनी 'श्रीवैकुण्ठचन्द्रिका' 'श्रीहवनपद्धतिः' र 'श्रीपितृयागपद्धतिः', पुस्तकहरूले समस्त श्रीवैष्णवजनमा एकता ल्याएर सबैको कल्याण होस् भनी श्रीवैकुण्ठनाथ भगवानसँग प्रार्थना गर्दछु ।

॥ शुभम् ॥

त्रिदण्डी पराङ्कुशाचार्य
श्रीत्रिदण्डीयतिराज आश्रम
(श्रीमुक्तिनारायण मन्दिर) सहस्रधारा
कुस्मा न.पा. १ पर्वत
२०७६।८।२९

# विषयसूचिः


१. दशदानविधिः ........................................ १

२. पञ्चधेनुदानविधिः ........................................ १९

३. ब्रह्ममेधविधिः ........................................ २५

क. षोडशकलशपूजनविधिः ........................................ २७

ख. हवनविधिः ........................................ ३३

ग. शवसंस्कारः ........................................ ५७

घ. शवदहनविधिः ........................................ ६७

४. दशदिनपर्यन्तकृत्यम् ........................................ ७१

क. पिण्डदानादिविधिः ........................................ ७१

ख. सायङ्कालीनविधिः ........................................ ७९

ग. पाथेयश्राद्धविधिः ........................................ ८२

५. एकादशाहकृत्यम् ........................................ ८७

५.१. मध्यमषोडशश्राद्धविधिः ........................................ ८७

५.२. उत्तमषोडशश्राद्धविधिः ........................................ १२०

५.२.क. आद्यमासिकश्राद्धविधिः ........................................ १२३

५.३. आद्याब्दिकश्राद्धविधिः ........................................ १२९
५.४. घटदानविधिः ........................................ १३८
५.२.ख. ऊनादिपञ्चदशश्राद्धविधिः ........................................ १४०
६. द्वादशाहकृत्यम् ........................................ १६४
६.१. सपिण्डीकरणश्राद्धविधिः ........................................ १६४
६.१.क. विष्वक्सेनपूजनम् ........................................ १६६
६.१.ख. विश्वेदेवाहनम् ........................................ १६७
६.१.ग. चतुर्व्यूहपूजनम् ........................................ १७०
६.१.घ. हवनम् ........................................ १७२
६.१.ङ. हस्तार्घविधिः ........................................ १८०
६.१.च. जलसंयोजनविधिः ........................................ १८३
६.१.छ. विश्वेदेवपूजनम् ........................................ १८५
६.१.ज. दिवङ्गतपूजनम् ........................................ १८६
६.१.झ. सिद्धान्नदानम् ........................................ १८७
६.१.ञ. पिण्डदानम् ........................................ १९२
६.१.ट. पिण्डमेलनविधिः ........................................ १९९
६.१.ठ. अक्षय्योदकदानम् ........................................ २०६

६.१.ङ. विसर्जनम् ........................................ २१२

६.२. विविधदानविधिः ........................................ २१४

६.२.क. पददानविधिः ........................................ २१४

६.२.ख. अर्चिरादिश्रवणदानविधिः ........................................ २१५

६.२.ग. गोदानविधिः ........................................ २१६

६.२.घ. शय्यादानविधिः ........................................ २२३

७. मासिकविधिः ........................................ २२५

८. दुर्मरणनिमित्तिक–नारायणबलिविधिः ........................................ २३४

९. पञ्चकमरणे दाहविधिः ........................................ ३०६

१०. पञ्चकशान्तिविधिः ........................................ ३०८

११. रजस्वलामरणे दाहविधिः ........................................ ३११

१२. गर्भवतीमरणे दाहविधिः ........................................ ३१३

१३. सूतिकामरणे दाहविधिः ........................................ ३१३

१४. पुत्तलादाहविधिः ........................................ ३१४

१५. जितन्तेस्तोत्रम् ........................................ ३१६

१६. वैकुण्ठोत्सवविधिः ........................................ ३२७

क. तीर्थस्नानविधिः ........................................ ३२७

ख. आराधनाविधिः ........................................ ३५९

ग. नारायणबलिविधिः ........................................ ३७९

घ. नारायणोपनिषत् ........................................ ३९८

ङ. शरणागतिगद्यम् ........................................ ४००

च. वैकुण्ठगद्यम् ........................................ ४०५

छ. पाठसमर्पणविधिः ........................................ ४१०

ज. सम्भावनावितरणम् ........................................ ४१६

झ. विसर्जनम् ........................................ ४१९

१७. परिशिष्टम् ........................................ ४२१

क. प्रमाणसङ्ग्रहः ........................................ ४२१

ख. चित्रावलिः ........................................ ४२८

ग. आवश्यकसामाग्रीसूचिः ........................................ ४३५

घ. वसिष्ठस्मृत्युक्तः अर्चिरादिमार्गः ........................................ ४४०

# ❀ मङ्गलाचरणम् ❀

श्रीमन्नारायणं वन्दे सर्वसद्बुद्धिदायकम् ।
प्रपन्नजनभर्तारं सर्वलोकस्य नायकम् ॥

यस्य प्रसादकलया बधिरः श्रृणोति
पङ्गुः प्रधावति जवेन च वक्ति मूकः ।
अन्धः प्रपश्यति सुतं लभते च बन्ध्या
तं देवदेववरदं शरणं गतोऽस्मि ॥



अर्चिरादिमार्ग

upayogibooks.com

# ❀ अथ दशदानादिप्रयोगः ❀

**लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।**
**अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥**
**सर्वमङ्गलमाङ्गल्यं सर्वोपद्रवनाशनम् ।**
**वन्दे रामानुजार्यस्य नित्यं पादाम्बुजद्वयम् ॥**

परमपदगमनोत्सुकं श्रीवैष्णवं भागवतं संस्नाप्य शुद्धवस्त्रादिकं परिधाप्य श्रीतिलकं धारयित्वा पवित्रस्थाने स्थापयेत् । ततः पञ्चगव्यं श्रीपादतीर्थं भगवत्तीर्थञ्च पाययित्वा भगवत्सन्निधौ दशदानादिकं कुर्यात् । शक्तश्चेत् प्रधानदानानि स्वयं कुर्यात् नो चेत् पुत्रादयो दापयेयुः । तत्रादौ आचम्य प्राणानायम्य संक्षिप्तगुरुपरम्परामनुसन्धाय भगवत्स्मरणपूर्वकं कर्मपात्रं कुर्यात् ।

## कर्मपात्रविधानम्

कर्मपात्रम् अभिमन्त्रयेत् –

**ॐ यद्देवाद्देवहेडनन्देवासश्चकृमावयम् ।**
**अग्निर्म्मातस्मादेनसो विश्वान्मुञ्चत्व ँ हसः ॥**
**ॐ यदि दिवा यदि नक्तमेना ँ सि चकृमावयम् ।**
**वायुर्म्मातस्मादेनसो विश्वान्मुञ्चत्व ँ हसः ॥**
**ॐ यदि जाग्रद्यदिस्वप्नऽएना ँ सि चकृमावयम् ।**
**सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्व ँ हसः ॥**

कुशपवित्रं निक्षिपेत् –

**ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण**

**पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥**

जलं निक्षिपेत् –

**ॐ शन्नो देवीरभीष्टयऽआपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः ॥**

तिलान् निक्षिपेत् –

**ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः ।**

**प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रीणाहि नः स्वाहा ॥**

यवान् निक्षिपेत् –

**ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्द्दिवेत्वान्तरिक्षायत्वा पृथिव्यै त्वा। शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥**

चन्दनं निक्षिपेत् –

**ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।**

**ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥**

पुष्पाणि निक्षिपेत् –

**ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकं मऽइषाण ॥**

अक्षतान् निक्षिपेत् –

**ॐ अक्षन्नमीमदन्त ह्यवप्रिया अधूषत । अस्तोषत स्वभानवो विप्रान विष्ठ्या मतीयोजान्विन्द्रते हरी ॥**

अभिमन्त्रितजलेन यज्ञीयद्रव्यं यजमानञ्च अभिषिञ्चेत् –

**ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।**

**यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥**

**ॐपुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु, ॐपुण्डरीकाक्षः पुनातु ॥**

ततः पवित्रधारणं कृत्वा स्वस्तिवाचनं विधाय प्रतिज्ञासङ्कल्पं कुर्यात् –

## प्रतिज्ञासङ्कल्पः

हरिः ॐ तत्सत्, हरिः ॐ तत्सत्, हरिः ॐ तत्सत् ॐ विष्णुः विष्णुः, विष्णुः अद्य श्रीमद्भगवतो महापुरुषस्य श्रीभूनीलानायकस्य सौशील्यादिसकलकल्याणगुणगणसम-लङ्कृतस्य श्रीमन्नारायणस्य नाभिकमलोद्भवस्य भगवदा-ज्ञया सकलजगत्सृष्टिं कुर्वतः अखिललोकपितामहस्य परा-र्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे दिनस्य द्वितीययामे तृतीये मुहूर्ते, अष्टमे श्रीश्वेतवाराहकल्पे, वैवस्वतमन्वन्तरे, अष्टाविंशतितमे सत्यत्रेताद्वापरान्ते कलियुगे कलिप्रथमचरणे श्रीमन्नृपतिविक्रमार्कराज्यात् अमुकतमे वर्षे, श्रीमद्रामानुजमुनिप्रादुर्भावाद् वर्तमाने अमुकतमे वर्षे, अमुकसंवत्सरे, अमुक-अयने, अमुकर्तौ, अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकनक्षत्रे, अमुकयोगे अमुककरणे अमुकराशिस्थिते श्रीसूर्ये, अमुकराशिस्थिते चन्द्रे, अमुकराशिस्थिते देवगुरौ, शेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्टायां शुभपुण्यतिथौ अस्मिन् भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गते नेपालदेशे अमुकक्षेत्रे अमुकमण्डलान्तर्गते अमुकनगरे/अमुकग्रामे श्रीलक्ष्मीनारायणभगवतः सन्निधौ वर्तमानः, शुक्लयजुर्वेदान्तर्गत-माध्यन्दिनीयवाजसनेयशाखाध्यायी अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माऽहं/वर्माऽहं/गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/वर्मणः/गुप्तस्य, मातुः अमुकनाम्नीदेव्याः वा) अकृत्यकरण-

**कृत्याकरण–भगवदपचार–भागवतापचारासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन दशदानादिकर्म करिष्ये।**

ततः प्रायश्चित्तगोदानं कुर्यात् –

## गोदानप्रयोगः

तत्र प्रथमं गन्धपुष्पाक्षतादिभिः गोपूजनं कुर्यात् –

**ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥**

**ॐ इरावती धेनुमती हि भूत ꣳ सूयवसिनीमनवेदशस्या । व्यस्कभ्ना रोदसी विष्णवे ते दाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा ॥**

**ॐ सुं सुरभ्यै नमः ॥**

इति यथोपचारैः गां सम्पूज्य ब्राह्मणं पूजयेत् –

**ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।**
**जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥**

ततो गोपुच्छोदकेन स्वशिरसि अभिषिञ्चेत् –

**ॐ मनो मे तर्पयत व्वाचम्मे तर्पयतप्प्राणम्मे तर्पयत चक्षुर्म्मेतर्प्पयतश्श्रोत्रम्मे तर्पयतात्मानं मे तर्पयतप्प्रजाम्मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मावितृषन् ।**

ततो हस्ते तिलाक्षतकुशादीनादाय गोपुच्छं गृहीत्वा सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् अद्येत्यादि ................ अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माऽहं/वर्माऽहं/गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचारभागवतापचा-रासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन करिष्यमाणदशदानादिकर्माधिकारप्राप्त्यर्थं शरीरशुद्ध्यर्थं प्रायश्चित्तनिमित्ताम् इमां गां रुद्रदैवतां (गवार्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणकरे दद्यात्। ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात् । ततो हस्ते पुष्पमादाय गोप्रार्थनां कुर्यात् -

**ॐ स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां यतः ।**
**सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे ॥**

ततो हिरण्यादिकमादाय दानप्रतिष्ठां कुर्यात् -

**अद्य कृतैतद् सर्वप्रायश्चित्तप्रत्याम्नायगोदानप्रतिष्ठासिद्ध्यर्थं हिरण्यादिद्रव्यं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

इति दत्वा गोप्रदक्षिणां कुर्यात्। ब्राह्मणश्च कोदादिति मन्त्रमुच्चारयन् गृह्णीयात् -

**ॐ कोदात्कस्माऽअदात्कामोदात्कामायादात्।**
**कामो दाता कामः प्प्रतिग्रहीता कामै तत्ते ॥**

ततो विप्रश्च गोपुच्छेन यजमानम् अभिषिञ्चेत् -

ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः । वनस्प्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥

## दीपपूजनम्

ॐ पृष्टो दिवि पृष्टोऽअग्निः पृथिव्यां पृष्टो विश्वाऽओषधीराविवेश। वैश्वानरः सहसापृष्टोऽअग्निः सनो दिवासरिषस्पातुनक्तम् ॥
ॐ स्थिरोभव वीड्वङ्गऽआशुर्भव वाज्यर्वन् ।
पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥

इति दीपं प्रज्वाल्य गन्धादिभिः सम्पूज्य प्रार्थयेत् –

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥

## कलशपूजनम्

ततः सविधि कलशं संस्थाप्य गन्धादिभिः वरुणं पूजयेत् –

ॐ इमम्मे वरुण श्रुधीहवमद्या च मृडय । त्वामवस्युराचके ॥
ॐ तत्वायामि ब्ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानोहव्विर्भिः ।
अहेडमानोव्वरुणेहबोध्युरुश ँ समानऽआयुः प्रमोषीः ॥
ॐ वरुणाय नमः साङ्गं सपरिवारं सशक्तिकं वरुणमावाहयामि स्थापयामि पूजयामि ।

इत्यावाह्य सर्वोपचारैः सम्पूज्य प्रणम्य प्रार्थयेत् –

त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ।
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥

**नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय।**
**सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते॥**

## विष्वक्सेनपूजनम्

कलशपूर्णपात्रोपरि सप्तदर्भमयं कूर्चन्निक्षिप्य विष्वक्सेनम् आवाह्य पूजयेत् –

**ॐ सूत्रवतीसहितं श्रीमन्तं विष्वक्सेनमावाहयामि स्थापयामि पूजयामि।**

**ॐ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुतद्याम्।**
**मुह्यन्त्वन्येऽअभितः सपत्नाऽइहास्माकं मघवा सूरिरस्तु॥**

**सूत्रवतीसहिताय श्रीमते विष्वक्सेनाय नमः।**

इति सर्वोपचारैः विष्वक्सेनं सम्पूज्य हस्ते पुष्पाण्यादाय प्रार्थयेत् –

**ॐ यस्य द्विरदवक्त्राद्याः शासने स्थिरवृत्तयः।**
**स मे वैकुण्ठसेनानीर्भूयात् सर्वत्र विघ्नहा॥**

ततो यथासम्भवं श्रीशालग्रामशिलायां चित्रपटे वा पुरुषसूक्तेन यथासम्भवोपचारैः भगवन्तं श्रीमन्नारायणं पूजयित्वा धूपदीपनैवेद्यादीनि समर्प्य विष्णुसहस्रनामभिः अष्टोत्तरशतनामभिर्वा अर्चनां विधाय कर्पूरेण नीराज्य साष्टाङ्गं कृत्वा दशदानानि दापयेत्। अस्मिन् समये बन्धुबान्धवैः ब्राह्मणैः वा यथासम्भवं श्रीमद्भगवद्गीता–श्रीमद्भागवत–श्रीविष्णुसहस्रनामस्तोत्रादयः श्रावणीयाः।

# ❀ अथ दशदानानि ❀

(गोभूतिलहिरण्याज्यवासोधान्यगुडानि च।
रौप्यलवणमित्याहुर्दशदानान्यनुक्रमात् ॥)

## १. गोदानम् –

तत्र प्रथमं गन्धपुष्पाक्षतादिभिः गोपूजनं कुर्यात् –

**ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।**
**नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥**

**ॐ इरावती धेनुमती हि भूत ँ सूयवसिनीमनवेदशस्या। व्यस्कब्भ्ना रोदसी विष्णवे ते दाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा॥ ॐ सुं सुरभ्यै नमः॥**

इति यथोपचारैः गां सम्पूज्य ब्राह्मणं पूजयेत् –

**नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।**
**जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥**

इति ब्राह्मणं पूजयित्वा गोपुच्छोदकेन स्वशिरसि अभिषिञ्चेत् –

**ॐ मनो मे तर्पयत व्वाचम्मे तर्पयतप्प्राणम्मे तर्पयत चक्षुर्म्मे तर्प्पयतश्श्रोत्रम्मे तर्पयतात्मानं मे तर्पयतप्प्रजाम्मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणामे मावितृषन् ।**

ततो हस्ते तिलाक्षतकुशादीनादाय गोपुच्छं गृहीत्वा सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् अद्येत्यादि........अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं/वर्माऽहं/गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचारभागवतापचा-रासह्यापचारनिवृत्तिपूर्वकं भगवन्-मुखोल्लासार्थं भगवदाज्ञया**

**भगवत्कैङ्कर्यत्वेन दशदानान्तर्गतां इमां गां रुद्रदैवतां (गवार्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणहस्ते दद्यात्। ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात्। ततः पुष्पाण्यादाय प्रार्थयेत् -

**गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश।**
**तस्मादस्याः प्रदानेन प्रीयतां मे जनार्दनः॥**

ततो हिरण्यादिकमादाय दानप्रतिष्ठां कुर्यात् -

**ॐ अद्य कृतैतद्दशदानान्तर्गतगोदानप्रतिष्ठासिद्ध्यर्थं हिरण्यादिद्रव्यं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततो विप्रश्च गोपुच्छेन यजमानम् अभिषिञ्चेत्।

### २. भूमिदानम् -

देयभूमिसम्बन्धिमृत्पिण्डं (भूमिमूल्यं वा) पुरतो निधाय पूजयेत् -

**ॐ भूमिर्भूम्नाद्यौर्वरिणान्तरिक्षं महीत्वा।**
**उपस्थे ते देव्यदितेग्निमन्नादमन्नाद्यायादधे॥**

इति सम्पूज्य ब्राह्मणञ्च सम्पूज्य सङ्कल्पं कुर्यात् -

**हरिः ॐ तत्सत् अद्येत्यादि........अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माऽहं/वर्माऽहं/गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचारभागवतापचा-रासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया**

**भगवत्कैङ्कर्यत्वेन दशदानान्तर्गतां (अमुकपरिमाणां) बहुसस्यप्रदां वाराहदैवत्यामिमां भूमिम् (भूम्यर्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणहस्ते दद्यात्। ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात्। ततः पुष्पाण्यादाय प्रार्थयेत् –

**नमो नमो मेदिनि लोकमातरूर्व्यै महाशैलशिलाधरायै।**
**नमो नमो धारिणि लोकधात्र्यै जगत्प्रतिष्ठे वसुधे नमोऽस्तु ते॥**
**सर्वभूताश्रया भूमिर्वराहेण समुद्धृता।**
**अनन्तसस्यफलदा ह्यतः शान्तिं प्रयच्छ मे॥**

ततो दानप्रतिष्ठां कुर्यात् –

**ॐ अद्य कृतैतद्दशदानान्तर्गतभूमिदानप्रतिष्ठासिद्ध्यर्थं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततो विप्रश्च कर्मपात्रोदकेन यजमानम् अभिषिञ्चेत्।

### ३. तिलदानम् –

तिलान् (तन्मूल्यं द्रव्यं वा) पुरतो निधाय गन्धादिभिः पूजयेत् –

**ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः।**
**प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रीणाहि नः स्वाहा॥**

इति सम्पूज्य ब्राह्मणञ्च सम्पूज्य सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् अद्येत्यादि....अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माऽहं/वर्माऽहं/गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचार–**

**भागवतापचारासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन इमान् दशदानान्तर्गतान् तिलान् प्रजापतिदैवतान् (तिलार्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ।**

इति ब्राह्मणहस्ते दद्यात् । ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात् । ततः पुष्पाण्यादाय प्रार्थयेत् –

**महर्षेर्गात्रसम्भूताः कश्यपस्य तिलाः स्मृताः ।**
**तस्मादेषां प्रदानेन मम पापं व्यपोहतु ॥**

ततो दानप्रतिष्ठां कुर्यात् –

**ॐ अद्य कृतैतद्दशदानान्तर्गततिलदानप्रतिष्ठासिद्ध्यर्थं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।**

ततो विप्रश्च कर्मपात्रोदकेन यजमानम् अभिषिञ्चेत् ।

**४. सुवर्णदानम् –**

सुवर्णम् (तन्मूल्यं द्रव्यं वा) पुरतो निधाय गन्धादिभिः पूजयेत् –

**ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।**
**सदाधार पृथिवीं द्यामुते मां कस्मै देवाय हविषा विधेम ॥**

इति सम्पूज्य ब्राह्मणञ्च सम्पूज्य सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् अद्येत्यादि....अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं/वर्माऽहं /गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचारभागवतापचा–रासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन इदं दशदानान्तर्गतं सुवर्णं वह्निदैवतम्**

**(सुवर्णार्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणहस्ते दद्यात्। ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात्। ततः पुष्पाण्यादाय प्रार्थयेत् –

**हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।**
**अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥**

ततो दानप्रतिष्ठां कुर्यात् –

**ॐ अद्य कृतैतद्दशदानान्तर्गतसुवर्णदानप्रतिष्ठासिद्ध्यर्थं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततो विप्रश्च कर्मपात्रोदकेन यजमानम् अभिषिञ्चेत्।

**५. आज्यदानम् –**

आज्यम् (तन्मूल्यं द्रव्यं वा) पुरतो निधाय गन्धादिभिः पूजयेत् –

**ॐ घृतं घृतपावानः पिबतवसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा। दिशः प्रदिशऽआदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा॥**

इति सम्पूज्य ब्राह्मणञ्च सम्पूज्य सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् अद्येत्यादि.....अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं/वर्माऽहं/गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचारभागवतापचा-रासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया**

**भगवत्कैङ्कर्यत्वेन इदं दशदानान्तर्गतं आज्यम् मृत्युञ्जयदैवतम् (आज्यार्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणहस्ते दद्यात्। ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात् । ततः पुष्पाण्यादाय प्रार्थयेत् –

**कामधेनोः समुद्भूतं सर्वक्रतुषु संस्थितम्।**
**देवानामाज्यमाहारस्ततः शान्तिं प्रयच्छ मे॥**

ततो दानप्रतिष्ठां कुर्यात् –

**ॐ अद्य कृतैतद्दशदानान्तर्गत–आज्यदानप्रतिष्ठासिद्ध्यर्थं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततो विप्रश्च कर्मपात्रोदकेन यजमानम् अभिषिञ्चेत् ।

**६. वस्त्रदानम् –**

वस्त्रं (तन्मूल्यं द्रव्यं वा) पुरतो निधाय गन्धादिभिः पूजयेत् –

**ॐ सुजातो ज्योतिषा सह शर्मवरूथमासदत्स्वः।**
**वासो अग्ने विश्वरूपꣳसंव्ययस्व विभावसो॥**

इति सम्पूज्य ब्राह्मणञ्च सम्पूज्य सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् अद्येत्यादि....अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं/ वर्माऽहं/ गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः /गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचारभागवतापचा–रासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया**

**भगवत्कैङ्कर्यत्वेन इदं दशदानान्तर्गतं वस्त्रं बृहस्पतिदैवतम् (वस्त्रार्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणहस्ते दद्यात्। ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात्। ततः पुष्पाण्यादाय प्रार्थयेत् –

**शीतवातातपत्राणं लज्जाया रक्षणं परम्।**
**देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे॥**

ततो दानप्रतिष्ठां कुर्यात् –

**ॐ अद्य कृतैतद्दशदानान्तर्गतवस्त्रदानप्रतिष्ठासिद्ध्यर्थं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततो विप्रश्च कर्मपात्रोदकेन यजमानम् अभिषिञ्चेत्।

**७. धान्यदानम्** –

धान्यम् (तन्मूल्यं द्रव्यं वा) पुरतो निधाय गन्धादिभिः पूजयेत् –

**ॐ धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्। इन्द्र प्रातर्जुषस्वनः॥**

इति सम्पूज्य ब्राह्मणञ्च सम्पूज्य सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् अद्येत्यादि ...अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं/ वर्माऽहं/गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याःवा) अकृत्यकरणकृत्याकरणभगवदपचार-भागवतापचाासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन इदं दशदानान्तर्गतं धान्यं प्रजापतिदैवतम् (धान्यार्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणहस्ते दद्यात् । ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात् । ततः पुष्पाण्यादाय प्रार्थयेत् -

**सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् ।**
**प्राणिनां जीवनोपायमतः शान्तिं प्रयच्छ मे ॥**

ततो दानप्रतिष्ठां कुर्यात् -

**ॐ अद्य कृतैतद्दशदानान्तर्गतधान्यदानप्रतिष्ठासिद्ध्यर्थं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततो विप्रश्च कर्मपात्रोदकेन यजमानम् अभिषिञ्चेत् ।

## ८. गुडदानम् -

गुडं (तन्मूल्यं द्रव्यं वा) पुरतो निधाय गन्धादिभिः पूजयेत् -

**ॐ अपाँ रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितम् । अपाँ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टङ्गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ।**

इति सम्पूज्य ब्राह्मणञ्च सम्पूज्य सङ्कल्पं कुर्यात् -

**हरिः ॐ तत्सत् अद्येत्यादि ...अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं/वर्माऽहं/गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचार-भागवतापचारासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन इदं दशदानान्तर्गतं गुडं सोमदैवतम् (गुडार्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ।**

इति ब्राह्मणहस्ते दद्यात् । ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात् । ततः पुष्पाण्यादाय प्रार्थयेत् –

**यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः ।**
**सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ॥**
**प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा ।**
**तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥**
**मम तस्मात् परां शान्तिं ददस्व गुड सर्वदा ॥**

ततो दानप्रतिष्ठां कुर्यात् –

**ॐ अद्य कृतैतद्दशदानान्तर्गतगुडदानप्रतिष्ठासिद्ध्यर्थं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।**

ततो विप्रश्च कर्मपात्रोदकेन यजमानम् अभिषिञ्चेत् ।

### ९. रजतदानम् –

रजतम् (तन्मूल्यं द्रव्यं वा) पुरतो निधाय गन्धादिभिः पूजयेत् –

**ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।**
**चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह ।**

इति सम्पूज्य ब्राह्मणञ्च सम्पूज्य सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् अद्येत्यादि....अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं/ वर्माऽहं/ गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचार-भागवतापचारासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन इदं दशदानान्तर्गतं रजतं**

**चन्द्रदैवतम् (रजतार्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणहस्ते दद्यात्। ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात् ।

ततः पुष्पाण्यादाय प्रार्थयेत् –

**प्रीतिर्यतः पितॄणाञ्च विष्णुशङ्करयोस्सदा।**
**शिवनेत्रोद्भवं रौप्यमतः शान्तिं प्रयच्छ मे॥**

ततो दानप्रतिष्ठां कुर्यात् –

**ॐ अद्य कृतैतद्दशदानान्तर्गतरजतदानप्रतिष्ठासिद्ध्यर्थं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततो विप्रश्च कर्मपात्रोदकेन यजमानम् अभिषिञ्चेत् ।

## १०. लवणदानम् –

लवणम् (तन्मूल्यं द्रव्यं वा) पुरतो निधाय गन्धादिभिः पूजयेत् –

**ॐ समुद्रं गच्छ स्वाहान्तरिक्षं गच्छ स्वाहा देवꣳसवितारं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहाहोरात्रे गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमं गच्छ स्वाहा दिव्यं नभो गच्छ स्वाहाग्निं वैश्वानरङ्गच्छ स्वाहा मनोमे हार्दि यच्छ दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मना पृण।**

इति सम्पूज्य ब्राह्मणञ्च सम्पूज्य सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् अद्येत्यादि....अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं /वर्माऽहं /गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरण–कृत्याकरणभगवदपचार–**

**भागवतापचारासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन इदं दशदानान्तर्गतं लवणं सोमदैवतम् (लवणार्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणहस्ते दद्यात्। ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात्। ततः पुष्पाण्यादाय प्रार्थयेत् -

**यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना।**
**शम्भोः प्रीतिकरं यस्मादतः शान्तिं प्रयच्छ मे॥**

ततो दानप्रतिष्ठां कुर्यात् -

**ॐ अद्य कृतैतद्दशदानान्तर्गतलवणदानप्रतिष्ठासिद्ध्यर्थं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततो विप्रश्च कर्मपात्रोदकेन यजमानम् अभिषिञ्चेत्। ततो दक्षिणां दद्यात्।

### ११. दक्षिणादानम् -

पुटके द्रव्यं (दक्षिणां) संस्थाप्य गन्धादिभिः पूजयेत् -

**ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत्।**
**स दाधार पृथिवीं द्यामुते मां कस्मै देवाय हविषा विधेम॥**

इति सम्पूज्य हस्ते कुशजलादिकमादाय सङ्कल्पं कुर्यात् -

**हरिः ॐ तत्सत् अद्येत्यादि....अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं/वर्माऽहं/गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचार-भागवतापचारासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन कृतस्य दशदानकर्मणः**

**साङ्गतासिद्ध्यर्थं यथालब्धेमां दक्षिणां गोभूहिरण्यादि-दशदानग्रहीतृभ्यो यथायथानामगोत्रेभ्यो यथायथानामशर्मभ्यो ब्राह्मणेभ्योऽन्येभ्यश्च यथाभागं विभज्य सम्प्रददे ।**

॥ इति दशदानानि ॥

# ❀ अथ धेनुदानानि ❀

पापापनोद-ऋणापनोद-मोक्ष-उत्क्रान्ति-वैतरणीति संज्ञिकाः पञ्चधेनवः शास्त्रेषु प्रसिद्धाः । तासु वैतरणीधेनुदानस्य वैतरणीनदीतरणाय कार्यत्वात् वैष्णवानां कृते नावश्यकम् -

**वैष्णवानां च पितरो न वै नरकवासिनः ।**
**न याम्यां यातनां यान्ति न वैवस्वतसद्मनि ॥**
**पितृलोके न ते सन्ति परमैकान्तिनो हि ते ।**
**साक्षाद्वैकुण्ठनाथस्य द्वारदेशावलम्बिनः ॥**
**इति वचनात् (बृहद्ब्रह्मसंहिता ४/४/१००-१०२)**

अतः वैतरणीधेनुदानं विहाय अवशिष्टानि चतुर्धेनुदानानि एव वैष्णवैः कार्याणि ।

## १. पापापनोदधेनुदानम् -

पूर्वोक्तप्रकारेण गां ब्राह्मणञ्च सम्पूज्य गोपुच्छमादाय सङ्कल्पं कुर्यात् -

**हरिः ॐ तत्सत् अद्येत्यादि....अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं /वर्माऽहं/ गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचार-भागवतापचारासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं**

**भगवदाज्ञया भगवत्कैङ्कर्यत्वेन पञ्चधेनुदानान्तर्गताम् इमां पापापनोदसंज्ञिकां धेनुं रुद्रदैवताम् (धेन्वर्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणहस्ते दद्यात्। ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात् ।

ततः पुष्पाण्यादाय प्रार्थयेत् –

**आजन्मोपार्जितं पापं मनोवाक्कायसम्भवम्।**
**तत्सर्वं नाशमायातु गोप्रदानेन केशव॥**

ततो हिरण्यादिकमादाय दानप्रतिष्ठां कुर्यात् –

**ॐ अद्य कृतैतत्पञ्चधेनुदानान्तर्गतपापापनोदधेनुदानप्रतिष्ठा-सिद्ध्यर्थं हिरण्यादिद्रव्यं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततो विप्रश्च गोपुच्छेन यजमानम् अभिषिञ्चेत् ।

## २. ऋणापनोदधेनुदानम् –

पूर्वोक्तप्रकारेण गां ब्राह्मणञ्च सम्पूज्य गोपुच्छमादाय सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् अद्येत्यादि ...अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं /वर्माऽहं /गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचारभागवतापचा-रासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन पञ्चधेनुदानान्तर्गताम् इमाम् ऋणापनोदसंज्ञिकां धेनुं रुद्रदैवताम् (धेन्वर्थे परिकल्पितं द्रव्यं**

**विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणहस्ते दद्यात्। ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात् । ततः पुष्पाण्यादाय प्रार्थयेत् -

**ऐहिकामुष्मिकं यच्च सप्तजन्मार्जितं त्वृणम्।**
**तत्सर्वं शुद्धिमायातु गामेतां ददतो मम ॥**

ततो हिरण्यादिकमादाय दानप्रतिष्ठां कुर्यात् -

**ॐ अद्य कृतैतत्पञ्चधेनुदानान्तर्गत-ऋणापनोदधेनुदानप्रतिष्ठासिद्ध्यर्थं हिरण्यादिद्रव्यं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततो विप्रश्च गोपुच्छेन यजमानम् अभिषिञ्चेत् ।

## ३. मोक्षधेनुदानम् -

पूर्वोक्तप्रकारेण गां ब्राह्मणञ्च सम्पूज्य गोपुच्छमादाय सङ्कल्पं कुर्यात् -

**हरिः ॐ तत्सत् अद्येत्यादि....अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं /वर्माऽहं /गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचारभागवतापचा-रासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन पञ्चधेनुदानान्तर्गतामिमां मोक्षसंज्ञिकां धेनुं रुद्रदैवताम् (धेन्वर्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणहस्ते दद्यात्। ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात् । ततः पुष्पाण्यादाय प्रार्थयेत् -

**मोक्षं देहि हृषिकेश मोक्षं देहि जनार्दन।**
**मोक्षधेनुप्रदानेन मुकुन्दः प्रीयतां मम ॥**

ततो हिरण्यादिकमादाय दानप्रतिष्ठां कुर्यात् –

**ॐ अद्य कृतैतत्पञ्चधेनुदानान्तर्गतमोक्षधेनुदानप्रतिष्ठासिद्ध्यर्थं हिरण्यादिद्रव्यं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततो विप्रश्च गोपुच्छेन यजमानम् अभिषिञ्चेत् ।

## ४. उत्क्रान्तिधेनुदानम् –

पूर्वोक्तप्रकारेण गां ब्राह्मणञ्च सम्पूज्य गोपुच्छमादाय सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् अद्येत्यादि....अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं(वर्माऽहं/गुप्तोऽहं) मम (पितुः अमुकनामशर्मणः/ वर्मणः /गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचारभागवतापचारासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन पञ्चधेनुदानान्तर्गताम् इमाम् उत्क्रान्तिसंज्ञिकां धेनुं रुद्रदैवताम् (धेन्वर्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणहस्ते दद्यात् । ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात् । ततः पुष्पाण्यादाय प्रार्थयेत् –

**असूत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये।**
**तुभ्यमेनां सम्प्रददे धेनुमुत्क्रान्तिसंज्ञिकाम्॥**

ततो हिरण्यादिकमादाय दानप्रतिष्ठां कुर्यात् –

**ॐ अद्य कृतैतत्पञ्चधेनुदानान्तर्गत–उत्क्रान्तिधेनुदानप्रतिष्ठा–सिद्ध्यर्थं हिरण्यादिद्रव्यं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततो विप्रश्च गोपुच्छेन यजमानम् अभिषिञ्चेत् । ततो दक्षिणां दद्यात् ।

## ५. दक्षिणादानम् –

पुटके द्रव्यं (दक्षिणां) संस्थाप्य गन्धादिभिः पूजयेत् –

**ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत्। सदाधार पृथिवीं द्यामुते मां कस्मै देवाय हविषा विधेम॥**

इति सम्पूज्य हस्ते कुशजलादिकमादाय सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् अद्येत्यादि....अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माहं /वर्माऽहं /गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/ वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचार-भागवतापचारासह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन कृतस्य धेनुदानकर्मणः साङ्गतासिद्ध्यर्थं यथालब्धेमां दक्षिणां गोभूहिरण्यादि-दशदानग्रहीतृभ्यः यथायथानामगोत्रेभ्यः यथायथानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य सम्प्रददे।**

इति दक्षिणां दत्वा पुष्पाक्षतैः दीपकलशविष्वक्सेनादीनां विसर्जनं कृत्वा हस्ते कुशपवित्रमादाय कायेन वाचेति पठन् कर्मसमर्पणं कुर्यात् –

**कायेन वाचा मनसेन्द्रियैर्वा, बुद्ध्यात्मना वा प्रकृतेः स्वभावात्। करोमि यद्यत् सकलं परस्मै, नारायणायेति समर्पयामि॥**

**सर्वं श्रीकृष्णार्पणमस्तु। हरिः ॐ तत्सत्॥**

॥ इति धेनुदानानि॥

# ❀ अथ मधुपर्कप्राशनम् ❀

मधु-दधि-घृत-शर्करा: सम्मेल्य मधुपर्कं विधाय रौप्यपात्रे पत्रपुटके वा स्थापयित्वा वक्ष्यमाणमन्त्रं पठन् भगवते निवेदयेत् -

**ॐ योऽसौ भवाँस्तिष्ठति सर्वदेहे नारायणः सर्वजगत्प्रधानः।**
**गृहाण चैवं सुरलोकनाथ भक्तोपनीतं मधुपर्कसंज्ञम् ॥**

ततः तन्मधुपर्कं वक्ष्यमाणमन्त्रं पठन् पाययेत् -

**ॐ गृहाण चेमं मधुपर्कमाद्यं संसारनाशनकरं ह्यमृतेन तुल्यम्।**
**नारायणेन रचितं भगवत्प्रियाणां दाहे च शान्तिकरणं सुरलोकपूज्यम्॥**

॥ इति मधुपर्कप्राशनम् ॥

**ततो नारायण-वासुदेवादिमन्त्राः, श्रीपुरुषसूक्त-विष्णुसूक्तादिसूक्तानि, भागवतादयश्च श्राव्याः, गुरुपरम्परा-रहस्यत्रय-अर्चिरादिमार्ग-कौशितकी-ब्रह्मानन्दवल्ली-जितन्तेस्तोत्र-वैकुण्ठगद्यादयश्च श्राव्याः। जीवेन शरीरं विसृज्य गमनसमये रोदनादिकं विहाय सर्वैर्बन्धु-पुत्रवध्वादिभिः नारायणादिभगवन्नामानि अनुसन्धेयानि ॥**

卐 卐 卐 卐

# ❀ अथ ब्रह्ममेधविधिः ❀

पुत्रादयः सम्बन्धिनः मृतकं दृष्ट्वा रोदनादिकं विहाय सदाचार्यमाहूय दिवङ्गतस्य संस्काराय प्रार्थयेयुः । आचार्यः शिष्यादिभिः समागत्य ब्रह्ममेधसंस्कारविधिं कारयेत् ।

**तत्रादौ स्थापनाप्रकारः –**

आचार्यः पञ्चहस्तमितां चतुरस्रां भूमिं गोमयोदकेनोपलिप्य तत्र हरिद्रा-शालिचूर्णेन भद्रकं मण्डलमालिख्य धान्यम् आस्तीर्य तत्र षोडशकुम्भान् स्थापयेत्, तेषु यथा सम्भवं पञ्च रत्नानि, सप्त मृत्तिकाः, पञ्च पल्लवान्, कुशकूर्चादीनि च निक्षिपेत् । कुम्भानाम् उदीच्याम् उलूखलमुसलौ स्थापयेत् । कुम्भानाम् ऐशान्ये हरिद्रया कोष्ठपञ्चकं कृत्वा पञ्चगव्यानि स्थापयेत्, तेषु कोष्ठेषु प्राच्यां पलमेकं गोमूत्रम्, दक्षिणे अंगुष्ठार्धं गोमयम्, प्रतीच्यां सप्तपलं गोक्षीरम्, उदीच्यां पलत्रयं गोदधि, मध्ये पलमेकं गोघृतम्, ऐशान्ये पलमेकं कुशोदकं स्थापयेत् । कुम्भानां दक्षिणे हवनवेदीं निर्मीयात् । हवनवेद्याः ऐशान्ये विष्वक्सेनम्, प्राच्यां दीपम्, दक्षिणे ब्रह्माणं स्थापयेत् । हवनवेद्याः कुम्भानाञ्च मध्ये नाभिनेमिविहीनं चक्रं विलिख्य तदुपरि सुदर्शनघटं स्थापयेत् ।

**(स्थापनप्रकारे संशयश्चेत् ४२८ तमे पृष्टे चित्रावलिं दृष्ट्वा तदनुसारेण स्थापनीयम् ।)**

ततः कर्ता मुण्डनं कृत्वा स्नात्वा शुद्धनूतनवस्त्राणि परिधाय ऊर्ध्वपुण्ड्रं धृत्वा कर्मपात्रं विधाय आचार्यादीन् वृणीयात् । तत्रादौ आचार्यवरणार्थं कुशजलाक्षतदक्षिणादिकम् आदाय सङ्कल्पयेत् –

**ॐ अद्य अमुकगोत्रोत्पन्नस्य अमुकप्रवरान्वितस्य अमुकदिवङ्गतस्य ब्रह्ममेधसंस्कारकर्मणि नानानामगोत्रान्**

नानानामशर्मणो ब्राह्मणान् श्रीवैष्णवान् आचार्यत्वेन सहायकत्वेन च युष्मान् अहं वृणे ।

(स्त्रीचेत् – ॐ अद्य अमुकगोत्रायाः अमुकदिवङ्गतायाः ब्रह्ममेधसंस्कारकर्मणि नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् श्रीवैष्णवान् आचार्यत्वेन सहायकत्वेन च युष्मान् अहं वृणे ।) इत्युच्चार्य आचार्यादीनां हस्ते कुशादिकं दद्यात् ।

## दीपपूजनम्

ॐ पृष्टो दिवि पृष्टोऽअग्निः पृथिव्यां पृष्टो विश्वाऽओषधीराविवेश।
वैश्वानरः सहसापृष्टोऽअग्निः सनोदिवासरिषस्पातु नक्तम् ।

ॐ स्थिरोभव वीड्वङ्गऽआशुर्भव वाज्यर्वन् ।
पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥

इति दीपं प्रज्वाल्य गन्धादिभिः सम्पूज्य प्रार्थयेत् –

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥

इति सम्प्रार्थ्य श्रीविष्वक्सेनम् आराधयेत् –

## विष्वक्सेनपूजनम्

ॐ भूर्भुवः स्वः सपरिवाराय सूत्रवतीसहिताय श्रीमते विष्वक्सेनाय नमः, सूत्रवतीसहितं सपरिवारं श्रीमन्तं विष्वक्सेनमावाहयामि स्थापयामि पूजयामि ।

इत्यावाह्य –

ॐ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुतद्याम् ।
मुह्यन्त्वन्येऽअभितः सपत्नाऽइहास्माकं मघवा सूरिरस्तु ॥

**सूत्रवतीसहिताय श्रीमते विष्वक्सेनाय नमः ।**

इति सर्वोपचारैः विष्वक्सेनं सम्पूज्य हस्ते पुष्पाण्यादाय प्रार्थयेत् -

**ॐ यस्य द्विरदवक्त्राद्याः शासने स्थिरवृत्तयः ।**
**स मे वैकुण्ठसेनानीर्भूयात् सर्वत्र विघ्नहा ॥**

## षोडशकुम्भार्चनम्

तत्र स्थापितेषु षोडशकुम्भेषु मध्ये मध्यभागे स्थापितेषु चतुर्षु कुम्भेषु चतुर्व्यूहान् आवाह्य पूजयेत् -

१. **ॐ नित्यानन्दासहिताय अनिरुद्धाय नमः, नित्यानन्दासहितम् अनिरुद्धम् आवाहयामि स्थापयामि पूजयामि ।**

२. **ॐ सत्यासहिताय प्रद्युम्नाय नमः, सत्यासहितं प्रद्युम्नम् आवाहयामि स्थापयामि पूजयामि ।**

३. **ॐ हिरण्यासहिताय सङ्कर्षणाय नमः, हिरण्यासहितं सङ्कर्षणम् आवाहयामि स्थापयामि पूजयामि ।**

४. **ॐ त्रयीसहिताय अधोक्षजाय नमः, त्रयीसहितम् अधोक्षजम् आवाहयामि स्थापयामि पूजयामि ।**

ततः पूर्वे स्थापितकलशद्वये -

५. **ॐ श्रीसहिताय केशवाय नमः, श्रीसहितं केशवम् आवाहयामि स्थापयामि पूजयामि ।**

६. **ॐ लक्ष्मीसहिताय नारायणाय नमः, लक्ष्मीसहितं नारायणम् आवाहयामि स्थापयामि पूजयामि ।**

दक्षिणे स्थापितकलशद्वये -

७. ॐ कमलासहिताय माधवाय नमः, कमलासहितं माधवम् आवाहयामि स्थापयामि पूजयामि ।

८. ॐ पद्मासहिताय गोविन्दाय नमः, पद्मासहितं गोविन्दम् आवाहयामि स्थापयामि पूजयामि ।

पश्चिमे स्थापितकलशद्वये -

९. ॐ पद्मिनीसहिताय विष्णवे नमः, पद्मिनीसहितं विष्णुम् आवाहयामि स्थापयामि पूजयामि ।

१०. ॐ कमलालयासहिताय मधुसूदनाय नमः, कमलालयासहितं मधुसूदनम् आवाहयामि स्थापयामि पूजयामि ।

उत्तरे स्थापितकलशद्वये -

११. ॐ रमासहिताय त्रिविक्रमाय नमः, रमासहितं त्रिविक्रमम् आवाहयामि स्थापयामि पूजयामि ।

१२. ॐ वृषाकपीसहिताय वामनाय नमः, वृषाकपीसहितं वामनम् आवाहयामि स्थापयामि पूजयामि ।

आग्नेये स्थापितकलशे -

१३. ॐ धन्यासहिताय श्रीधराय नमः, धन्यासहितं श्रीधरम् आवाहयामि स्थापयामि पूजयामि ।

नैर्ऋत्ये स्थापितकलशे -

१४. ॐ वृत्तिसहिताय हृषीकेशाय नमः, वृत्तिसहितं हृषीकेशम् आवाहयामि स्थापयामि पूजयामि ।

वायव्ये स्थापितकलशे -

१५. ॐ यज्ञासहिताय पद्मनाभाय नमः, यज्ञासहितं पद्मनाभम् आवाहयामि स्थापयामि पूजयामि ।

ऐशान्ये स्थापितकलशे –

**१६. ॐ इन्दिरासहिताय दामोदराय नमः, इन्दिरासहितं दामोदरम् आवाहयामि स्थापयामि पूजयामि ।**

इत्यावाह्य यथासम्भवोपचारैः अर्घ्य-पाद्य-आचमनीय-स्नान-वस्त्र-उपवस्त्र-यज्ञोपवीत-गन्ध-पुष्प-माला-अक्षत-धूप-दीप-नैवेद्य-पुनराचमनीय-फल-ताम्बूल-दक्षिणा-प्रदक्षिणादीन् समर्प्य कर्पूरेण नीराजनं कृत्वा नमस्कृत्य नारायणानुवाकेन अभिमन्त्र्य कुम्भानाम् उदीच्यां स्थापिते उलूखले वासुदेवम् आवाह्य अर्घ्याद्युपचारैः पूजयेत् –

**ॐ नमो भगवते वासुदेवाय, भगवन्तं वासुदेवम् आवाहयामि स्थापयामि पूजयामि ।**

मूलमन्त्रेण मुसले नारायणम् आवाह्य अर्घ्याद्युपचारैः पूजयेत् –

**ॐ नारायणाय नमः ।**

इति सम्पूज्य विष्णुगायत्र्या पलचतुष्टयहरिद्राम् अभिमन्त्र्य उलूखले निक्षिपेत् –

**ॐ नारायणायविद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् ॥**

ततः पूर्ववृताः चत्वारः श्रीवैष्णवाः अधोवक्ष्यमाणमन्त्रं पठन्तः हरिद्राम् अवकुट्टयेयुः (चूर्णं कुर्युः) –

**ॐ परोमात्रया तनुवावृधान नते महित्वमन्वश्नुवन्ति ।**
**उभे ते विद्म रजसी पृथिव्या विष्णोर्देवत्वं परमस्य वित्से ॥**

अवहननसंजातहरिद्राचूर्णेन पूर्वपूजितदेवान् सम्पूज्य किञ्चित् हरिद्राचूर्णं शवसंस्कारार्थम् अवशेषयेत् । ततः कुम्भान् प्रणम्य नारायणानुवाकं पठन् पीतवस्त्रेण आच्छादयेत् ।

# ❀ नारायणानुवाकः ❀

हरिः ॐ सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्।
विश्वं नारायणं देवमक्षरं परमं प्रभुम् ॥
विश्वतः परमꣳनित्यं विश्वं नारायणं हरिम्।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥
पतिं विश्वस्यात्मेश्वरꣳ शाश्वतं शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥
नारायणपरं ब्रह्म तत्त्वं नारायणः परः।
नारायणपरो ज्योतिरात्मा नारायणः परः ॥
यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ॥
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥
अनन्तमव्ययं कविꣳसमुद्रेऽन्तं विश्वशम्भुवम्।
पद्मकोश प्रतीकाशꣳहृदयं चाप्यधोमुखम् ॥
अधो निष्ट्यावितस्त्यान्ते नाभ्यामुपरि तिष्ठति।
हृदयं तद्विजानीयात् विश्वस्यायतनं महत् ॥
सन्ततꣳशिलाभिस्तु लम्बत्याकोशसन्निभम्।
तस्यान्ते सुषिरꣳसूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ॥
तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः।
सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः ॥
सन्तापयति स्वं देहमापादतलमस्तकम् ॥
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता ॥
नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीताभास्यात्यणूपमा ।

तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः।
स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्।
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः ॥
ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

॥ इति नारायणानुवाकः ॥

## सुदर्शनघटपूजनम्

ततो हवनवेद्याः उत्तरे स्थापिते अस्त्राख्यघटे चक्रराजं सुदर्शनमावाह्य पूजयेत् -

**ॐ सहस्रार हुं फट्, सुदर्शनमावाहयामि स्थापयामि पूजयामि।**

इत्यावाह्य यथासम्भवोपचारैः अर्घ्य-पाद्य-आचमनीय-स्नान-वस्त्र-उपवस्त्र-यज्ञोपवीत-गन्ध-पुष्प-माला-अक्षत-धूप-दीप-नैवेद्य-पुनराचमनीय-फल-ताम्बूल-दक्षिणा-प्रदक्षिणादीन् समर्प्य कर्पूरेण नीराजनं कृत्वा नमस्कुर्यात्।

## पञ्चगव्य-विधानम्

अथ कुम्भानाम् ऐशान्ये स्थापितेषु पञ्चगव्येषु प्राच्यां स्थापिते गोमूत्रे विष्णुं पूजयेत् -

**ॐ विष्णोरराटमसि विष्णोः स्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवेत्वा ॥**

**ॐ विष्णवे नमः, विष्णुम् आवाहयामि स्थापयामि पूजयामि।**

दक्षिणे स्थापिते गोमये ब्रह्माणं पूजयेत् -

**ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः। सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्चयोनिमसतश्च विवः॥**

**ॐ ब्रह्मणे नमः ब्रह्माणम् आवाहयामि स्थापयामि पूजयामि।**

प्रतीच्यां स्थापिते गोक्षीरे अच्युतं पूजयेत् -

**ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममेरजा ँ सि।**

**योऽ अस्कभायदुत्तर ँ सधस्थं विचक्रमाणस्त्रेधोरुगायः।**

**ॐ अच्युताय नमः, अच्युतमावाहयामि स्थापयामि पूजयामि।**

उदीच्यां स्थापिते गोदध्नि शुक्रं पूजयेत् -

**ॐ अन्नात्परिस्नुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानँशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोमृतं मधु॥**

**ॐ शुक्राय नमः, शुक्रम् आवाहयामि स्थापयामि पूजयामि।**

मध्ये स्थापिते गोघृते कृष्णं पूजयेत् -

**ॐ कृष्णोस्याखरेष्ठोग्नयेत्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषेत्वा। जुष्टं प्रोक्षामि बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षाम्म्यदित्यैव्युन्दनम्॥**

**ॐ कृष्णाय नमः, कृष्णमावाहयामि स्थापयामि पूजयामि ।**

ऐशान्ये स्थापिते कुशोदके सवितारं पूजयेत् -

**ॐ पूषन्नेकर्षे यमः सूर्यप्राजापत्यव्यूहरश्मीन् समूह । तेजोयत्ते रूपं कल्याणतमं तत्ते पश्यामि योसावसौ पुरुषः सोहमस्मि॥**

**ॐ सवित्रे नमः, सवितारम् आवाहयामि स्थापयामि पूजयामि।**

# अथ होमविधानम्

मृदा हस्तमात्रां चतुरस्रां चतुरङ्गुलोच्चां वेदीं निर्माय तत्र पञ्चभूसंस्कारान् कुर्यात्। ते च यथा – १. त्रिभिर्दर्भैः परिसमूह्य २. गोमयोदकेन उपलिप्य ३. श्रुवेण दर्भमूलेन वा दक्षिणोत्तरक्रमेण तिस्रो रेखा उल्लिख्य ४. अनामिकाङ्गुष्ठाभ्याम् उल्लेखनक्रमेण मृदम् उद्धृत्य ऐशान्यां क्षिपेत् ५. शुद्धजलेन सम्प्रोक्ष्य कुशैः आच्छादयेत्।

ततः वेद्याम् अग्निं निदध्यात् –

**ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।**

**ॐ गार्हपत्यनामाग्नये नमः, गार्हपत्यनामाग्निम् आवाहयामि।**

इति गार्हपत्यनामाग्निमावाह्य पीताक्षतैः षोडशसंस्कारान् कुर्यात् –

**१. ॐ हं नमः अग्नये शुचिषदे नमः, गर्भाधानसंस्कारं सम्पादयामि।**
**२. ॐ हं नमः अग्नये शुचिषदे नमः, पुंसवनसंस्कारं सम्पादयामि।**
**३. ॐ हं नमः अग्नये शुचिषदे नमः, सीमन्तोन्नयनसंस्कारं सम्पादयामि।**
**४. ॐ हं नमः अग्नये शुचिषदे नमः, जातकर्मसंस्कारं सम्पादयामि।**
**५. ॐ हं नमः अग्नये शुचिषदे नमः, नामकरणसंस्कारं सम्पादयामि।**
**६. ॐ हं नमः अग्नये शुचिषदे नमः, निष्क्रमणसंस्कारं सम्पादयामि।**
**७. ॐ हं नमः अग्नये शुचिषदे नमः, अन्नप्राशनसंस्कारं सम्पादयामि।**
**८. ॐ हं नमः अग्नये शुचिषदे नमः, कर्णवेधसंस्कारं सम्पादयामि।**
**९. ॐ हं नमः अग्नये शुचिषदे नमः, चूडाकरणसंस्कारं सम्पादयामि।**
**१०. ॐ हं नमः अग्नये शुचिषदे नमः, उपनयनसंस्कारं सम्पादयामि।**
**११. ॐ हं नमः अग्नये शुचिषदे नमः, सावित्रीश्रावणसंस्कारं सम्पादयामि।**
**१२. ॐ हं नमः अग्नये शुचिषदे नमः, वेदारम्भसंस्कारं सम्पादयामि।**
**१३. ॐ हं नमः अग्नये शुचिषदे नमः, गोदानसंस्कारं सम्पादयामि।**
**१४. ॐ हं नमः अग्नये शुचिषदे नमः, स्नातकव्रतसंस्कारं सम्पादयामि।**
**१५. ॐ हं नमः अग्नये शुचिषदे नमः, समावर्तनसंस्कारं सम्पादयामि।**
**१६. ॐ हं नमः अग्नये शुचिषदे नमः, विवाहसंस्कारं सम्पादयामि।**

इति संस्कारान् सम्पाद्य गन्धादिभिः यथोपचारैः सम्पूज्य प्रार्थयेत् -

**द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम् ।**
**वरदं शक्तिपाणिञ्च बिभ्राणं स्रुक्स्रुवौ तथा ॥**
**स्वाहाञ्च दक्षिणे पार्श्वे वामे देवी स्वधान्तथा ।**
**रक्तमाल्याम्बरधरमेवमग्निं विचिन्तयेत् ॥**

ततः पात्रासादनं (याज्ञिकपात्रशुद्धिप्रयोगः पात्रासादनमित्युच्यते) कुर्यात् । अग्नेर्दक्षिणतः त्रिभिर्दर्भैः ब्रह्मासनम् आस्तीर्य तत्र ब्रह्माणम् आवाह्य पूजयेत् -

**ॐ ब्रह्मणे नमः ब्रह्माणम् आवाहयामि स्थापयामि पूजयामि ।**

इति सर्वोपचारैः सम्पूज्य अग्नेरुत्तरतः प्रणीताप्रोक्षण्यौ स्रुक्-स्रुवे इध्म आज्यञ्च संस्थाप्य वेद्याः अष्टदिक्षु तण्डुलपुञ्जेषु अष्टवसून् आवाह्य पूजयेत् -

पूर्वे -

**ॐ अग्नये नमः अग्निम् आवाहयामि स्थापयामि पूजयामि ।**

आग्नेये -

**ॐ जातवेदसे नमः जातवेदसम् आवाहयामि स्थापयामि पूजयामि ।**

दक्षिणे -

**ॐ सहोजसे नमः सहोजसम् आवाहयामि स्थापयामि पूजयामि ।**

नैर्ऋत्ये -

**ॐ अजिराप्रभवे नमः अजिराप्रभुम् आवाहयामि स्थापयामि पूजयामि ।**

पश्चिमे -

**ॐ वैश्वानराय नमः वैश्वानरम् आवाहयामि स्थापयामि पूजयामि ।**

वायव्ये –

**ॐ नर्यापसे नमः नर्यापसम् आवाहयामि स्थापयामि पूजयामि।**

उत्तरे –

**ॐ पङ्क्तिराधसे नमः, पङ्क्तिराधसम् आवाहयामि स्थापयामि पूजयामि।**

ईशाने –

**ॐ विसर्पिणे नमः विसर्पिणम् आवाहयामि स्थापयामि पूजयामि।**

समन्ततः –

**ॐ यज्ञपुरुषाय नमः, यज्ञपुरुषम् आवाहयामि स्थापयामि पूजयामि । स्वशिरसि – ॐ आत्मने नमः ।**

श्रीवैष्णवशिरस्सु –

**ॐ सर्वेभ्यः श्रीवैष्णवेभ्यो नमः ।**

इति पीताक्षतैः पूजयित्वा ततः कुशान्तर्हितायाः प्रोक्षण्याः उदकं निनीय तेन पात्राणि होमसामग्रीश्च प्रोक्ष्य कुशैः परिस्तरणं कुर्यात् । ततः परिस्तरणोपरि प्रोक्षण्युदकेन परिषेचनं कुर्यात् ।

**ॐ अदिते अनुमन्यस्व** । इति दक्षिणे पश्चिमतः प्राचीनां जलधारां दद्यात्।

**ॐ अनुमते अनुमन्यस्व** । इति पश्चिमे दक्षिणत उदीचीनां जलधारां दद्यात्।

**ॐ सरस्वते अनुमन्यस्व** । इति उत्तरे पश्चिमतः प्राचीनां जलधारां दद्यात्।

**ॐ देवसवितः प्रसुव** । इति समन्ततः प्रागारभ्य प्रदक्षिणक्रमेण जलधारां दद्यात्।

ततः घृताक्ताः पञ्चदशसमिधः पुष्पाक्षतैरलङ्कृत्य प्रजापतिं मनसा ध्यात्वा तूष्णीं प्रज्वलिते अग्नौ जुहुयात्।

## पञ्चवारुणीहोमः

ततः श्रुवेण आज्यमादाय –

**ॐ प्रजापतये स्वाहा प्रजापतये इदं न मम** इति नैर्ऋत्यादीशानान्तं जुहुयात्।

**ॐ इन्द्राय स्वाहा इन्द्राय इदं न मम** इति वायव्यादाग्नेयान्तं जुहुयात्।

**ॐ अग्नये स्वाहा अग्नये इदं न मम** इति अग्नेर्दक्षिणतो जुहुयात्।

**ॐ सोमाय स्वाहा सोमाय इदं न मम** इति अग्नेरुत्तरतो जुहुयात्।

**ॐ भूः अग्नये स्वाहा अग्नये इदं न मम।**

**ॐ भुवः वायवे स्वाहा वायवे इदं न मम।**

**ॐ स्वः सूर्याय स्वाहा सूर्याय इदं न मम।**

**ॐ भूर्भुवःस्वः प्रजापतये स्वाहा प्रजापतये इदं न मम।**

**ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्याम् इदं न मम।**

**ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्याम् इदं न मम।**

**ॐ अग्नये स्वाहा अग्नये इदं न मम।**

**ॐ वरुणाय स्वाहा वरुणाय इदं न मम ।**

**ॐ सवित्रे स्वाहा सवित्रे इदं न मम।**

**ॐ विष्णवे स्वाहा विष्णवे इदं न मम ।**

**ॐ विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं न मम।**

**ॐ वरुणाय स्वाहा वरुणाय इदं न मम।**

ततः मूलमन्त्रेण अष्टोत्तरशताहुतीः घृतेन जुहुयात्। एवमेव घृतचरुभ्यां वासुदेवद्वादशाक्षरेण विष्णुषडक्षरेण द्वयमन्त्रेणाऽपि प्रत्येकम् अष्टोत्तरशताहुतीः जुहुयात् । ततः पुरुषसूक्त-विष्णुसूक्त-नारायणानुवाक-श्रीसूक्त-भूसूक्त-नीलासूक्तैर्हुत्वा वैकुण्ठपार्षदनामभिर्हुत्वा केशवादि-चतुर्विंशतिनामभिर्जुहुयात्।

## अथ पुरुषसूक्तम्

**ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।**
**सभूमिꣳसर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥**
**ॐ पुरुषाय नारायणाय स्वाहा।**

**ॐ पुरुष एवेद ꣳ सर्वं यद्भूतं यच्च भाव्यम्।**
**उतामृतत्वस्येशानो यदन्नेनातिरोहति॥**
**ॐ पुरुषाय नारायणाय स्वाहा।**

**ॐ एतावानस्य महिमातोज्ज्यायाँश्च पूरुषः।**
**पादोस्य विश्वाभूतानि त्रिपादस्यामृतन्दिवि॥**
**ॐ पुरुषाय नारायणाय स्वाहा।**

**ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः।**
**ततो विष्वङ्व्यक्क्रामत्साशनानशनेऽअभि॥**
**ॐ पुरुषाय नारायणाय स्वाहा।**

**ॐ ततो विराडजायत विराजोऽअधिपूरुषः।**
**सजातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः॥**
**ॐ पुरुषाय नारायणाय स्वाहा।**

ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतं पृषदाज्यम्।
पशूँस्ताँश्चक्रे वायव्यानारण्याग्राम्याश्च ये ॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ तस्मादश्वाऽअजायन्ते के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः।
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ तं यज्ञं बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्रतः।
तेन देवाऽअयजन्त साद्ध्याऽऋषयश्च ये ॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखङ्किमस्यासीत्किं बाहू किमूरूपादाऽउच्च्येते ॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ ब्राह्मणोस्य मुखमासीद्बाहूराजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्याꣳशूद्रोऽअजायत ॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ नाब्भ्याऽआसीदन्तरिक्षꣳशीर्ष्णो द्यौः समवर्त्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथालोकाँ२ ऽअकल्पयन्॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तोऽस्यासीदाज्यङ्ग्रीष्मऽइध्मः शरद्धविः॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः।
देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषं पशुम्॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्।
तेहनाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ अद्भ्यः सम्भृतः पृथिव्यैरसाच्च विश्वकर्म्मणः समवर्तताग्ग्रे।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्ग्रे॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ वेदाहमेतं पुरुषं महान्तमादित्यवर्णन्तमसः परस्तात्।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेयनाय॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ प्रजापतिश्चरति गर्ब्भेऽअन्तरजायमानो बहुधा विजायते।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्हतस्त्थुर्भुवनानि विश्वा॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ यो देवेभ्यऽआतपति यो देवानां पुरोहितः ।
पूर्व्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ रुचं ब्राह्मञ्जनयन्तो देवाऽअग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवाऽअसन्वसे ॥
ॐ पुरुषाय नारायणाय स्वाहा।

ॐ श्रीश्चतेलक्ष्मीश्च पत्क्न्यावहोरात्रे पार्श्वेनक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्व्वलोकम्मऽइषाण ॥
ॐ पुरुषाय नारायणाय स्वाहा।

॥ इति पुरुषसूक्तम् ॥

## अथ विष्णुसूक्तम्

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममेरजाँसि।
योऽअस्कभायदुत्तरँसधस्थं विचक्रमाणस्त्रेधोरुगायः ॥
ॐ विष्णवे स्वाहा।

ॐ विष्णोरराटमसि विष्णोश्नप्त्रेस्थो विष्णोः
स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥
ॐ विष्णवे स्वाहा।

ॐ तदस्य प्रियमभिपाथोऽअस्यां नरो यत्र देवयवो मदन्ति।
ऊरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्वऽउत्सः ॥
ॐ विष्णवे स्वाहा।

ॐ प्रतद्विष्णुस्तवते वीर्याय मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेषु अधिक्षियन्ति भुवनानि विश्वा ॥
ॐ विष्णवे स्वाहा।

ॐ परो मात्रया तनुवा वृधान न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या विष्णोर्देवत्वं परमस्य वित्थ्से ॥
ॐ विष्णवे स्वाहा ।

ॐ विचक्रमे पृथिवीमेषऽएतां क्षेत्राय विष्णुर्मनुषे दशस्यन् ।
ध्रुवासोऽअस्य कीरयो जनासः ऊरुक्षितिँसुजनिमाचकार ॥
ॐ विष्णवे स्वाहा ।

ॐ त्रिर्देवः पृथिवीमेषऽएतां विचक्रमे शतवर्चसं महित्वा ।
प्रविष्णुरस्तुतवसस्तवीयान् त्वेषँह्यस्य स्थविरस्य नाम ॥
ॐ विष्णवे स्वाहा ।

ॐ अतो देवाऽअवन्तु नो यतो विष्णुर्विचक्रमे ।
पृथिव्याः सप्तधामभिः ॥
ॐ विष्णवे स्वाहा ।

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पाँसुरे ॥
ॐ विष्णवे स्वाहा ।

ॐ त्रीणि पदा विचक्रमे विष्णुर्गोपाऽअदाभ्यः ।
अतो धर्माणि धारयन् ॥
ॐ विष्णवे स्वाहा ।

ॐ विष्णोः कर्म्माणि पश्यत यतो व्रतानि पश्पशे ।
इन्द्रस्य युज्यः सखा ॥
ॐ विष्णवे स्वाहा ।

ॐ तद्विष्णोः परमम्पदँसदा पश्यन्ति सूरयः ।
दिवीवचक्षुराततम् ॥
ॐ विष्णवे स्वाहा ।

ॐ तद्विप्रासो विपन्यवो जागृवाꣳसः समिन्धते।
विष्णोर्यत्परमं पदम्॥

ॐ विष्णवे स्वाहा।

॥ इति विष्णुसूक्तम्॥

## अथ नारायणानुवाकः

हरिःॐ सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्।
विश्वं नारायणं देवमक्षरं परमं प्रभुम् ॥

ॐ नारायणाय स्वाहा।

विश्वतः परमन्नित्यं विश्वं नारायणं हरिम्।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति॥

ॐ नारायणाय स्वाहा॥

पतिं विश्वस्यात्मेश्वरꣳ शाश्वतं शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्॥

ॐ नारायणाय स्वाहा।

नारायणपरं ब्रह्म तत्त्वं नारायणः परः।
नारायणपरो ज्योतिरात्मा नारायणः परः॥

ॐ नारायणाय स्वाहा।

यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥

ॐ नारायणाय स्वाहा।

अनन्तमव्ययं कविꣳसमुद्रेऽन्तं विश्वशम्भुवम् ।
पद्मकोश प्रतीकाशꣳहृदयं चाप्यधोमुखम् ॥
ॐ नारायणाय स्वाहा ।

अधो निष्ट्यावितस्त्यान्ते नाभ्यामुपरि तिष्ठति ।
हृदयं तद्विजानीयात् विश्वस्यायतनं महत् ॥
ॐ नारायणाय स्वाहा ।

सन्ततꣳशिलाभिस्तु लम्बत्याकोशसन्निभम् ।
तस्यान्ते सुषिरꣳसूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ॥
ॐ नारायणाय स्वाहा ।

तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः ।
सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः ॥
ॐ नारायणाय स्वाहा ।

सन्तापयति स्वं देहमापादतलमस्तकम् ।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता ॥
ॐ नारायणाय स्वाहा ।

नीलतोयदमध्यस्थाविद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीताभास्यात्यणूपमा ॥
ॐ नारायणाय स्वाहा ।

तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्म स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥
ॐ नारायणाय स्वाहा ।

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः ॥

ॐ नारायणाय स्वाहा।

ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ।

ॐ नारायणाय स्वाहा।

॥ इति नारायणानुवाकः ॥

## अथ श्रीसूक्तम्

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह ॥

ॐ श्रीं श्रियै स्वाहा।

ॐ ताम्मऽआवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥

ॐ श्रीं श्रियै स्वाहा।

ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मादेवीं जुषताम् ॥

ॐ श्रीं श्रियै स्वाहा।

ॐ कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्॥
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥

ॐ श्रीं श्रियै स्वाहा।

ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मनेमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ॥
ॐ श्रीं श्रियै स्वाहा।

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥
ॐ श्रीं श्रियै स्वाहा।

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातु मे ॥
ॐ श्रीं श्रियै स्वाहा।

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिञ्च सर्वान्निर्णुद मे गृहात् ॥
ॐ श्रीं श्रियै स्वाहा।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥
ॐ श्रीं श्रियै स्वाहा।

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनांरूपमन्नस्य मयि श्रीः श्रयतां यशः ॥
ॐ श्रीं श्रियै स्वाहा।

ॐ कर्दमेन प्रजाभूता मयि संभव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥
ॐ श्रीं श्रियै स्वाहा।

ॐ आपः सृजन्तु स्निग्धानि चिक्लीतवसमे गृहे।
नीचदेवीं मातरꣳश्रियं वासय मे कुले॥

ॐ श्रीं श्रियै स्वाहा।

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह॥

ॐ श्रीं श्रियै स्वाहा।

ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह ॥

ॐ श्रीं श्रियै स्वाहा।

ॐ ताम्मऽआवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान्विन्देयं पुरुषानहम्॥

ॐ श्रीं श्रियै स्वाहा।

ॐ य शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।
श्रियः पञ्चदशर्चञ्च श्रीकामः सततं जपेत्॥

ॐ श्रीं श्रियै स्वाहा।

ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि।
तन्नो लक्ष्मीः प्रचोदयात्॥

ॐ श्रीं श्रियै स्वाहा।

॥ इति श्रीसूक्तम्॥

# अथ भूसूक्तम्

ॐ भूमिर्भूम्ना द्यौर्वरिणान्तरिक्षं महित्वा।
उपस्थे ते देव्यदितेग्निमन्नादमन्नाद्याया दधे॥
ॐ भूं भूदेव्यै स्वाहा।

ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरं पुनः।
पितरं च प्रयन्त्सुवः॥ ॐ भूं भूदेव्यै स्वाहा।

ॐ त्रिꣳसद्धाम विराजति वाक्पतङ्गाय शिश्रिये।
प्रत्यस्य वहद्युभिः॥ ॐ भूं भूदेव्यै स्वाहा।

ॐ अस्य प्राणादपानत्यन्तश्चरति रोचना।
व्यख्यन्महिषः सुवः॥ ॐ भूं भूदेव्यै स्वाहा।

ॐ यत्वा क्रुद्धः परोवपमन्युना यदवर्त्या।
सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि॥ ॐ भूं भूदेव्यै स्वाहा।

ॐ यत्ते मन्युपरोप्तस्य पृथिवीमनुदद्ध्वसे।
आदित्या विश्वे तद्देवा वसवश्च समाभरन्॥ ॐ भूं भूदेव्यै स्वाहा।

ॐ मेदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी।
ब्रह्मवर्चसः पितॄणां श्रोत्रं चक्षुर्मनः॥ ॐ भूं भूदेव्यै स्वाहा।

ॐ देवी हिरण्यगर्भिणी देवी प्रसूवरी सदने सत्यायने सीद॥
ॐ भूं भूदेव्यै स्वाहा।

ॐ समुद्रवती सावित्री हनो देवी मह्यङ्गी।
महो धरणी महो व्यतिष्ठा शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषिणी॥
ॐ भूं भूदेव्यै स्वाहा।

ॐ इन्द्रपत्नी व्यापिनी सुरसरिदिह वायुमती जलशयनी।
श्रियंधाराजा सत्यन्तोपरि मेदिनी श्वोपरि धत्तङ्गाय॥
ॐ भूं भूदेव्यै स्वाहा।

ॐ विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम्।
लक्ष्मीप्रियसखीं देवीं नमाम्यच्युतवल्लभाम्॥
ॐ भूं भूदेव्यै स्वाहा।

ॐ धनुर्धरायै विद्महे सर्वसिद्धयै च धीमहि।
तन्नो धरा प्रचोदयात्॥ ॐ भूं भूदेव्यै स्वाहा।

॥ इति भूसूक्तम्॥

## अथ नीलासूक्तम्

ॐश्रृण्वन्ति श्रोणाममृतस्यगोपांपुण्यामस्यामुपश्रृणोमि वाचम्।
महीं देवीं विष्णुपत्नीमजूर्यां प्रतीचीमेनां हविषा यजामः॥
ॐ नीं नीलादेव्यै स्वाहा।

ॐ त्रेधा विष्णुरुरुगायो विचक्रमे महीं दिवं पृथिवीमन्तरिक्षम्।
तच्छ्रोणैतिश्रवऽइच्छमानापुण्यं लोकं यजमानाय कृण्वती॥
ॐ नीं नीलादेव्यै स्वाहा।

ॐ गृणाहि घृतवतीसवितराधिपत्यै पयस्वतीरन्तिराशानोऽअस्तु।
ध्रुवादिशां विष्णुपत्न्यघोराऽऽस्येशाना सहसो या मनोता॥
ॐ नीं नीलादेव्यै स्वाहा।

ॐ बृहस्पतिर्मातरिश्वोत वायुः सन्धुवाना वाताऽअभिनोगृणन्तु।
विष्टम्भो दिवोधरुणः पृथिव्याऽअस्येशाना जगतो विष्णुपत्नी॥
ॐ नीं नीलादेव्यै स्वाहा।

ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि।
तन्नो नीला प्रचोदयात्॥

ॐ नीं नीलादेव्यै स्वाहा।

॥ इति नीलासूक्तम्॥

## अथ चतुर्विंशतिनामभिर्होमः

| | | | | | |
|---|---|---|---|---|---|
| १. | ॐ केशवाय | स्वाहा | २. | ॐ नारायणाय | स्वाहा |
| ३. | ॐ माधवाय | स्वाहा | ४. | ॐ गोविन्दाय | स्वाहा |
| ५. | ॐ विष्णवे | स्वाहा | ६. | ॐ मधुसूदनाय | स्वाहा |
| ७. | ॐ त्रिविक्रमाय | स्वाहा | ८. | ॐ वामनाय | स्वाहा |
| ९. | ॐ श्रीधराय | स्वाहा | १०. | ॐ हृषीकेशाय | स्वाहा |
| ११. | ॐ पद्मनाभाय | स्वाहा | १२. | ॐ दामोदराय | स्वाहा |
| १३. | ॐ वासुदेवाय | स्वाहा | १४. | ॐ संकर्षणाय | स्वाहा |
| १५. | ॐ प्रद्युम्नाय | स्वाहा | १६. | ॐ अनिरुद्धाय | स्वाहा |
| १७. | ॐ पुरुषोत्तमाय | स्वाहा | १८. | ॐ अधोक्षजाय | स्वाहा |
| १९. | ॐ नारसिंहाय | स्वाहा | २०. | ॐ अच्युताय | स्वाहा |
| २१. | ॐ जनार्दनाय | स्वाहा | २२. | ॐ उपेन्द्राय | स्वाहा |
| २३. | ॐ हरये | स्वाहा | २४. | ॐ श्रीकृष्णाय | स्वाहा |

## अथ वैकुण्ठपार्षदहोमः

ॐ आधारशक्त्यै स्वाहा
ॐ प्रकृत्यै स्वाहा
ॐ अखिलजगदाधाराय कूर्मरूपिणे नारायणाय स्वाहा
ॐ अनन्ताय नागराजाय स्वाहा

ॐ भूम्यै स्वाहा
ॐ वैकुण्ठाय दिव्यलोकाय स्वाहा
ॐ वैकुण्ठाय दिव्यजनपदाय स्वाहा
ॐ वैकुण्ठाय दिव्यनगराय स्वाहा
ॐ वैकुण्ठाय दिव्यविमानाय स्वाहा
ॐ आनन्दमयाय दिव्यमण्डपरत्नाय स्वाहा
ॐ आस्तरणरूपिणे अनन्ताय नागराजाय स्वाहा
ॐ धर्माय पीठपादाय स्वाहा
ॐ ज्ञानाय पीठपादाय स्वाहा
ॐ वैराग्याय पीठपादाय स्वाहा
ॐ ऐश्वर्याय पीठपादाय स्वाहा
ॐ ऋग्वेदाय पीठवाहकाय स्वाहा
ॐ यजुर्वेदाय पीठवाहकाय स्वाहा
ॐ सामवेदाय पीठवाहकाय स्वाहा
ॐ अथर्ववेदाय पीठवाहकाय स्वाहा
ॐ अधर्माय पीठगात्राय स्वाहा
ॐ अज्ञानाय पीठगात्राय स्वाहा
ॐ अवैराग्याय पीठगात्राय स्वाहा
ॐ अनैश्वर्याय पीठगात्राय स्वाहा
ॐ एभिःपरिच्छिन्नतनवे सदसदात्मकाय स्वाहा
ॐ पीठभूताय नागराजाय स्वाहा
ॐ पीठस्योपरि, अष्टदलपद्माय स्वाहा
ॐ सोममण्डलाय स्वाहा
ॐ सूर्यमण्डलाय स्वाहा

| | |
|---|---|
| ॐ वह्निमण्डलाय | स्वाहा |
| ॐ विमलायै चामरकरायै | स्वाहा |
| ॐ क्रियायै चामरकरायै | स्वाहा |
| ॐ उत्कर्षिण्यै चामरकरायै | स्वाहा |
| ॐ ज्ञानायै चामरकरायै | स्वाहा |
| ॐ प्रह्वै चामरकरायै | स्वाहा |
| ॐ ईशानायै चामरकरायै | स्वाहा |
| ॐ सत्यायै चामरकरायै | स्वाहा |
| ॐ योगायै चामरकरायै | स्वाहा |
| ॐ अनुग्रहायै चामरकरायै | स्वाहा |
| ॐ जगत्प्रकृतये चामरकराय | स्वाहा |
| ॐ सहस्रशीर्ष्णे अनन्ताय नागराजाय | स्वाहा |
| ॐ पुरतः पादपीठाय | स्वाहा |
| ॐ भगवद्पादुकाभ्यां | स्वाहा |
| ॐ अस्मद्गुरुभ्यः | स्वाहा |
| ॐ अस्मद्परमगुरुभ्यः | स्वाहा |
| ॐ अस्मसर्वगुरुभ्यः | स्वाहा |
| ॐ श्रीमते रामानुजाय | स्वाहा |
| ॐ श्रीपराङ्कुशदासाय | स्वाहा |
| ॐ श्रीमद्यामुनमुनये | स्वाहा |
| ॐ श्रीराममिश्राय | स्वाहा |
| ॐ श्रीपुण्डरीकाक्षाय | स्वाहा |
| ॐ श्रीमन्नाथमुनये | स्वाहा |
| ॐ श्रीमते शठकोपाय | स्वाहा |

ॐ श्रीमते विष्वक्सेनाय स्वाहा
ॐ श्रियै स्वाहा
ॐ श्रीधराय स्वाहा
ॐ सुदर्शनाय हेतिराजाय स्वाहा
ॐ पाञ्चजन्याय शङ्खाधिपतये स्वाहा
ॐ कौमोदक्यै गदाधिपतय स्वाहा
ॐ नन्दकाय खड्गाधिपतये स्वाहा
ॐ शार्ङ्गाय चापाधिपतये स्वाहा
ॐ श्रीवत्साय श्रीनिवासाय स्वाहा
ॐ कौस्तुभाय सर्वरत्नाधिपतये स्वाहा
ॐ वैजयन्त्यै वनमालायै स्वाहा
ॐ ह्रीं पुष्ट्यै स्वाहा
ॐ ऐं सरस्वत्यै स्वाहा
ॐ द्रां निद्रायै स्वाह
ॐ क्लीं कान्त्यै स्वाहा
ॐ कं पृथिव्यै स्वाहा
ॐ गं गरुडाय स्वाहा
ॐ किरीटाय मुकुटाधिपतये स्वाहा
ॐ किरीटमालायै आपीडात्मिकायै स्वाहा
ॐ मकराकृतिकुण्डलाभ्यां स्वाहा
ॐ कण्ठिकाभरणाय स्वाहा
ॐ श्रीमत्तुलस्यै स्वाहा
ॐ हाराय सर्वाभरणाधिपतये स्वाहा
ॐ काञ्चीगुणोज्ज्वलाय पीताम्बराय स्वाहा

| | |
|---|---|
| ॐ सर्वेभ्यो भगवद्भूषणेभ्यः | स्वाहा |
| ॐ सर्वेभ्यो भगवद्दिव्यायुधेभ्यः | स्वाहा |
| ॐ सर्वाभ्यो भगवत्पादसंवाहिनीभ्यः | स्वाहा |
| ॐ सर्वेभ्यो भगवत्परिकरेभ्यः | स्वाहा |
| ॐ अनन्ताय | स्वाहा |
| ॐ विष्वक्सेनाय | स्वाहा |
| ॐ सूत्रवत्यै | स्वाहा |
| ॐ जं जयत्सेनाय | स्वाहा |
| ॐ गं गजाननाय | स्वाहा |
| ॐ हं हयाननाय | स्वाहा |
| ॐ कं कालप्रकृतिसंज्ञाय | स्वाहा |
| ॐ सर्वेभ्यो विष्वक्सेनपरिजनेभ्यः | स्वाहा |
| ॐ चण्डाय | स्वाहा |
| ॐ प्रचण्डाय | स्वाहा |
| ॐ भद्राय | स्वाहा |
| ॐ सुभद्राय | स्वाहा |
| ॐ जयाय | स्वाहा |
| ॐ विजयाय | स्वाहा |
| ॐ धात्रे | स्वाहा |
| ॐ विधात्रे | स्वाहा |
| ॐ कुमुदाय सायुधाय सपरिवाराय सशक्तिकाय | स्वाहा |
| ॐ कुमुदाक्षाय सायुधाय सपरिवाराय सशक्तिकाय | स्वाहा |
| ॐ पुण्डरीकाय सायुधाय सपरिवाराय सशक्तिकाय | स्वाहा |
| ॐ वामनाय सायुधाय सपरिवाराय सशक्तिकाय | स्वाहा |

ॐ शंकुकर्णाय सायुधाय सपरिवाराय सशक्तिकाय स्वाहा
ॐ सर्पनेत्राय सायुधाय सपरिवाराय सशक्तिकाय स्वाहा
ॐ सुमुखाय सायुधाय सपरिवाराय सशक्तिकाय स्वाहा
ॐ सुप्रतिष्ठिताय सायुधाय सपरिवाराय सशक्तिकाय स्वाहा
ॐ सर्वेभ्यो भगवद्गणाधिपतिभ्यः स्वाहा
ॐ नित्येभ्यः स्वाहा
ॐ मुक्तेभ्यः स्वाहा
ॐ दिव्येभ्यः स्वाहा
ॐ समस्तपरिवाराय श्रीमते नारायणाय स्वाहा

## कूष्माण्डसूक्तम्

ॐ यद्देवाद्देवहेडनन्देवासश्चकृमावयम्।
अग्निर्म्मातस्मादेनसो विश्वान्मुञ्चत्व ꣳ हसः ॥

ॐ अग्नये स्वाहा।

ॐ यदि दिवा यदि नक्तमेना ꣳ सि चकृमावयम्।
वायुर्म्मातस्मादेनसो विश्वान्मुञ्चत्व ꣳ हसः ॥

ॐ वायवे स्वाहा।

ॐ यदि जाग्रद्यदिस्वप्न एना ꣳ सि चकृमावयम्।
सूर्यो मातस्मादेनसो विश्वान्मुञ्चत्व ꣳ हसः ॥

ॐ सूर्याय स्वाहा।

ॐ यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये।
यच्छूद्रे यदर्य्येयदेनश्चकृमा वयं यदेकस्याधिधर्मणि तस्यावयजनमसि ॥

ॐ भूतेभ्यः स्वाहा ॥

॥ इति कूष्माण्डसूक्तहोमः ॥

## स्विष्टकृद्धोमः

ॐ अग्नये स्विष्टकृते स्वाहा अग्नये स्विष्टकृते इदं न मम।

ॐ भूः अग्नये स्वाहा अग्नये इदं न मम।

ॐ भुवः वायवे स्वाहा वायवे इदं न मम।

ॐ स्वः सूर्याय स्वाहा सूर्याय इदं न मम।

ॐ भूर्भुवः स्वः प्रजापतये स्वाहा प्रजापतये इदं न मम।

ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्यां इदं न मम।

ॐ अग्नये अयसे स्वाहा अग्नये अयसे इदं न मम।

ॐ वरुणाय स्वाहा वरुणाय इदं न मम।

ॐ सवित्रे स्वाहा सवित्रे इदं न मम।

ॐ विष्णवे स्वाहा विष्णवे इदं न मम।

ॐ विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं न मम।

ॐ मरुद्भ्यः स्वाहा मरुद्भ्य इदं न मम।

ॐ अर्केभ्यः स्वाहा अर्केभ्य इदं न मम।

ॐ आदित्याय स्वाहा आदित्याय इदं न मम।

ॐ अदितये स्वाहा अदितये इदं न मम।

## पूर्णाहुतिः

स्रुवां चतुः कृत्वः पूरयित्वा नारिकेलपूगीफलानि निधाय चित्रतन्तुभिः वेष्टयित्वा प्रजापतिं मनसा ध्यायन् पूर्णाहुतिं जुहुयात् –

**ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत।**
**वस्नेव विक्रीणावहा इषमूर्जꣳशतक्रतो॥**

ततः परिस्तरणोपरि प्रोक्षण्युदकेन उत्तरपरिषेचनं कुर्यात् -

**ॐ अदिते अनुमन्वँस्थाः**, इति दक्षिणे पश्चिमतः प्राचीनां जलधारां दद्यात् ।

**ॐ अनुमते अनुमन्वँस्थाः**, इति पश्चिमे दक्षिणत उदीचीं जलधारां दद्यात् ।

**ॐ सरस्वते अनुमन्वँस्थाः**, इति उत्तरे पश्चिमतः प्राचीनां जलधारां दद्यात्।

**ॐ देवसवितः प्रासावीः**, इति समन्ततः प्रागारभ्य प्रदक्षिणक्रमेण जलधारां दद्यात्।

ततो जलपूर्णां प्रणीतां सव्यहस्तेनादाय दक्षिणहस्तेन जलधारां दद्यात् -

**ॐ देवा ऋषयो मार्जयन्ताम्**, इति प्राच्यां किञ्चिज्जलं क्षिपेत्।

**ॐ मासाः पितरो मार्जयन्ताम्**, इति दक्षिणे किञ्चिज्जलं क्षिपेत्।

**ॐ गृहाः पशवो मार्जयन्ताम्**, इति पश्चिमे किञ्चिज्जलं क्षिपेत्।

**ॐ आप ओषधयो वनस्पतयो मार्जयन्ताम्**, इति उदीच्यां किञ्चिज्जलं क्षिपेत्।

**ॐ यज्ञः संवत्सरो यज्ञपतिर्माजयन्ताम्**, इत्यूर्ध्वं किञ्चिज्जलं क्षिपेत्।

**ॐ सुमित्रियानआप ओषधयः सन्तु**, इति भूमौ किञ्चिज्जलं क्षिपेत्।

**ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टियञ्च वयन्द्विष्मः ।**

इति प्रणीतां न्युब्जीकुर्यात्।

## दिक्पालबलिविधानम्

हुतशेषद्रव्येण चतुरः पिण्डान् कृत्वा तेषु एकमादाय पूर्वे बलिं दद्यात् -

**ॐ आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशि स्थिताः ।**
**प्रसन्नाः परितुष्टास्ते गृह्णन्तु बलिमुत्तमम् ॥**

द्वितीयपिण्डम् आदाय दक्षिणे –

**ॐ वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः।**
**भूमौ व्योम्नि स्थिता ये च बलिं गृह्णन्तु ते त्वमुम्॥**

तृतीयपिण्डम् आदाय पश्चिमे –

**ॐ विनायकाः क्षेत्रपाला ये चान्ये बलिकाङ्क्षिणः।**
**पूषाद्याः पार्षदाश्चैव प्रतिगृह्णन्तु ते बलिम्॥**

चतुर्थपिण्डम् आदाय उत्तरे –

**ॐ ये भूता प्रचरन्ति दिवानक्तं बलिमिच्छन्तो वितुदस्य प्रेष्ठाः।**
**तेभ्यो बलिं पुष्टिकामो ददामि मयि पुष्टिं पुष्टिपतिर्ददातु॥**

इति बलीन् दत्वा ततः किञ्चिदग्निं निष्कास्य एकस्मिन् पात्रे स्थापयित्वा श्मशानभूमौ नयेत्। हवने आवाहितान् देवान् ब्रह्माणम् अग्निञ्च सम्पूज्य विसर्जयेत्। परिस्तरणकुशान् अग्नौ जुहुयात् –

**ॐ समुद्रं वः प्रहिणोमि स्वां योनिमधिगच्छत।**
**अरिष्टास्माकं वीरामापरासेचिमत्पयः॥**

ततः प्रार्थयेत् –

**यस्य स्मृत्या च नामोक्त्या जपयज्ञक्रियादिषु।**
**न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥**
**ॐ अच्युताय नमः, ॐ अच्युताय नमः, ॐ अच्युताय नमः।**

## शवसंस्कारः

उपयुक्तं स्थानं शुद्धजलेन प्रक्षाल्य तत्र आचार्यः हरिद्राचूर्णादिभिः सौदर्शनमण्डलं विलिख्य तत्र कदलीपत्रादिकम् आस्तीर्य तदुपरि कुशान् निक्षिप्य तत्र उत्तरशिरसं शवं स्थापयित्वा तदुपरि तिलान् विकिरेत् –

**ॐ तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्यावसानुगाः ।**
**तिलाः पुनन्तु ते पापं यत्किञ्चिद्दुरितं त्वयि ॥**

आमलकचूर्णमादाय शवोपरि उत्सृजेत् -

**ॐ धात्रि धातृसमुद्भूते सर्वपातकनाशिनि ।**
**आमलकि नमस्तुभ्यं सर्वपापहरा भव ॥**

ततः पञ्चगव्येन शवं स्नापयेत् -

## पञ्चगव्यस्नपनविधिः

प्रथमं विष्णुगायत्र्या गोमूत्रेण स्नापयेत् -

**ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्।**

ततो गोमयेन स्नापयेत् -

**ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।**
**ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥**

ततः क्षीरेण स्नापयेत् -

**ॐ आप्यायस्व समेतुते विश्वतः सोमवृष्ण्यम्।**
**भवावाजस्य सङ्गथे ॥**

ततो दध्ना स्नापयेत् -

**ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः ।**
**सुरभिनो मुखाकरत् प्रणऽआयूँषि तारिषत् ॥**

तत आज्येन स्नापयेत् -

**ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि।**
**प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥**

ततः कुशोदकेन स्नापयेत् –

**ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। आददेनारिरसि॥**

ततः षोडशकुम्भेषु मध्यभागे स्थापितैः अनिरुद्धादिचतुर्भिर्घटैः स्नापयेत् –

**ॐ संवाम्मनाꣳसि सम्व्रतासमुचितान्याकरम्।**
**अग्ने पुरीष्याधिपाभवत्वन्नइषमूर्जं यजमानाय धेहि॥**

इति स्नापयित्वा ततः केशवादि-द्वादशघटैः आवाहितक्रमेण नारायणानुवाकेन स्नापयित्वा कौपीनं धौतमुत्तरीयं नवयज्ञोपवीतं द्वादशोर्ध्वपुण्ड्रांश्च धारयित्वा सर्वाङ्गीणेन नववस्त्रेण सकुशेन सर्वतो वेष्टयित्वा हरिद्रापुष्पैः शवम् अलङ्कृत्य, उदुम्वरदेवदार्वादि-यज्ञीयवृक्षकाष्ठमयीं शिविकां कदली-आम्रपल्लवपुष्पमालादिभिः अलङ्कृत्य शोभनशुद्धवस्त्रैः शोभयित्वा तस्यां शिविकायां शवं स्थापयेत् –

**ॐ अग्ने नय सुपथा रायेऽअस्मान्विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम॥**

शिविकावहनाय शववाहकान् नियोजयेत् । ततः प्रथमपिण्डं दद्यात् –

## प्रथमपिण्डदानम्

मृत्युस्थाने प्रथमः पिण्डो देयः। पिण्डदानस्थानं संशोध्य जलेन प्रोक्ष्य कुशादिकम् आस्तीर्य, **अपसव्येन पितृतीर्थेन** तिलजलकुशादिकमादाय अवनेजनं दद्यात् –

**अद्य अमुकगोत्र अमुकनामदिवङ्गत प्रथमपिण्डस्थाने इदम् अवनेजनन्ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री चेत् - अद्य अमुकगोत्रे अमुकनामदिवङ्गते प्रथमपिण्डस्थाने इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम् ।)**

इति कुशोपरि जलं दत्वा हस्ते सतिल-कुश-जल-पिण्डमादाय -

**अद्य अमुकगोत्र अमुकनामदिवङ्गत मृत्युस्थाने भूमिदेवीतुष्टये एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ।**

**(स्त्री० - अद्य अमुकगोत्रे अमुकनामदिवङ्गते मृत्युस्थाने भूमिदेवीतुष्टये एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ।)**

इति पिण्डं दद्यात् । ततः कुश-तिल-जलमादायप्रत्यवनेजनं दद्यात् -

**अद्य अमुकगोत्र अमुकनामदिवङ्गत इदं प्रथमपिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम् ।**

**(स्त्री० - अद्य अमुकगोत्रे अमुकनामदिवङ्गते इदं प्रथमपिण्ड-प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम् ।)**

इति पिण्डोपरि जलादिकं दद्यात् ।

ततः **सव्यं** विधाय आचम्य पुत्रादयः शववाहकाश्च शवशिविकां दक्षिणस्कन्धेषु आरोप्य द्वारदेशं गत्वा पुत्रो द्वितीयपिण्डं दद्यात् -

## द्वारदेशे द्वितीयपिण्डदानम्

पिण्डदानस्थानं संशोध्य जलेन प्रोक्ष्य कुशादिकम् आस्तीर्य, **अपसव्येन पितृतीर्थेन** तिलजलकुशादिकमादाय अवनेजनं दद्यात् -

**अद्य अमुकगोत्र अमुकनामदिवङ्गत द्वितीयपिण्डस्थाने इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम् ।**

**(स्त्री० - अद्य अमुकगोत्रे अमुकनामदिवङ्गते द्वितीयपिण्डस्थाने इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम् ।)**

इति कुशोपरि जलं दत्वा हस्ते सतिल-कुश-जल-पिण्डमादाय -

**अद्य अमुकगोत्र अमुकनामदिवङ्गत द्वारदेशे भूतादिबाधाविनाशाय एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनामदिवङ्गते द्वारदेशे भूतादि-बाधाविनाशाय एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।)**

इति पिण्डं दद्यात्। ततः कुश-तिल-जलमादाय प्रत्यवनेजनं दद्यात् -

**अद्य अमुकगोत्र अमुकनामदिवङ्गत इदं द्वितीयपिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनामदिवङ्गते इदं द्वितीयपिण्ड-प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

इति पिण्डोपरि जलादिकं दद्यात्।

ततः **सव्यं** कृत्वा आचम्य नारायण-वासुदेव-विष्णुमन्त्रान् जपन्तः शनैः शनैः वहेयुः । आचार्यादयः ईशावास्य-भृगुवल्ली-आनन्दवल्ली-कौषीतक्यादि-उपनिषदः जितन्तेस्तोत्र-स्तोत्ररत्न-विष्णुसहस्रनामस्तोत्रादीनि च पठेयुः । बान्धवाश्च हुताग्निम्, पूर्वपूजितसुदर्शनघटम्, अन्यद्-घटद्वयम्, कर्मपात्रोदकं शुद्धोदकञ्चादाय भगवन्नामकीर्तयन्तः हरिद्रा-लाजा-पुष्पाणि विकिरन्तः शवशिविकाम् आदाय श्मशानं व्रजेयुः । ततः अर्धमार्गे विश्रामस्थाने तृतीयपिण्डं दद्यात्।

## विश्रामस्थाने तृतीयपिण्डदानम्

पिण्डदानस्थानं संशोध्य जलेन प्रोक्ष्य कुशादिकम् आस्तीर्य, **अपसव्येन पितृतीर्थेन** तिलजलकुशादिकमादाय अवनेजनं दद्यात् -

**अद्य अमुकगोत्र अमुकनामदिवङ्गत विश्रामपिण्डस्थाने इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनामदिवङ्गते तृतीयपिण्डस्थाने इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

इति कुशोपरि जलं दत्वा हस्ते सतिलकुशजलपिण्डमादाय –

**अद्य अमुकगोत्र अमुकनामदिवङ्गत विश्रामस्थाने पिशाचादि-बाधानिवृत्तये एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनामदिवङ्गते विश्रामस्थाने पिशाचादिबाधानिवृत्तये एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।)**

इति पिण्डं दद्यात्। ततः कुश-तिल-जलमादाय प्रत्यवनेजनं दद्यात् –

**अद्य अमुकगोत्र अमुकनामदिवङ्गत इदं तृतीयपिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनामदिवङ्गते इदं तृतीयपिण्ड-प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

इति पिण्डोपरि जलादिकं दद्यात्।

ततः सव्यं कृत्वा आचम्य नगराद् ग्रामाद् वा बहिर्यज्ञीयवृक्षसमाकीर्णं अमेध्यरहितं शुचिदेशं नद्यादितटं व्रजेयुः।

## श्मशाने होमविधानम्

अत्र उपयुक्तं स्थानं संशोध्य हवनार्थं यथासम्भवां वेदीं निर्माय पञ्चभूसंस्कारान् कृत्वा गृहाद् आनीतम् अग्निं प्रज्वाल्य –

**ॐ क्रव्यादनामाग्नये नमः, क्रव्यादनामाग्निम् आवाहयामि स्थापयामि पूजयामि।**

इति सम्पूज्य लोमभ्य इति अनुवाकेन हवनं कुर्यात् –

**ॐ लोमभ्यः स्वाहा लोमभ्य इदं न मम । इति वारद्वयं (२) जुहुयात्**

**ॐ त्वचे स्वाहा त्वचे इदं न मम । इति वारद्वयं (२) जुहुयात्**

ॐ लोहिताय स्वाहा लोहिताय इदं न मम । इति वारद्वयं (२) जुहुयात्

ॐ मेदोभ्यः स्वाहा मेदोभ्य इदं न मम। इति वारद्वयं (२) जुहुयात्

ॐ माँसेभ्यः स्वाहा माँसेभ्य इदं न मम । इति वारद्वयं (२) जुहुयात्

ॐ स्नावभ्यः स्वाहा स्नावभ्य इदं न मम। इति वारद्वयं (२) जुहुयात्

ॐ स्थभ्यः स्वाहा स्थभ्य इदं न मम। इति वारद्वयं (२) जुहुयात्

ॐ मज्जभ्यः स्वाहा मज्जभ्य इदं न मम। इति वारद्वयं (२) जुहुयात्

ॐ रेतसे स्वाहा रेतसे इदं न मम।

ॐ पायवे स्वाहा पायवे इदं न मम।

ॐ आयासाय स्वाहा आयासाय इदं न मम।

ॐ प्प्रायासाय स्वाहा प्रायासाय इदं न मम।

ॐ संय्यासाय स्वाहा संयासाय इदं न मम।

ॐ वियासाय स्वाहा वियासाय इदं न मम।

ॐ उद्यासाय स्वाहा उद्यासाय इदं न मम।

ॐ शुचे स्वाहा शुचे इदं न मम।

ॐ शोचते स्वाहा शोचते इदं न मम।

ॐ शोचमानाय स्वाहा शोचमानाय इदं न मम।

ॐ शोकाय स्वाहा शोकाय इदं न मम।

ॐ तपसे स्वाहा तपसे इदं न मम।

ॐ तप्यते स्वाहा तप्यते इदं न मम।

ॐ तप्यमानाय स्वाहा तप्यमानाय इदं न मम।

ॐ तप्ताय स्वाहा तप्ताय इदं न मम।

ॐ घर्माय स्वाहा घर्माय इदं न मम।

**ॐ निष्कृत्यै स्वाहा निष्कृत्यै इदं न मम।**

**ॐ प्रायश्चित्यै स्वाहा प्रायश्चित्यै इदं न मम।**

**ॐ भेषजाय स्वाहा भेषजाय इदं न मम।**

**ॐ यमाय स्वाहा यमाय इदं न मम।**

**ॐ अन्तकाय स्वाहा अन्तकाय इदं न मम।**

**ॐ मृत्यवे स्वाहा मृत्यवे इदं न मम।**

**ॐ ब्रह्मणे स्वाहा ब्रह्मणे इदं न मम।**

**ॐ ब्रह्महत्यायै स्वाहा ब्रह्महत्यायै इदं न मम।**

**ॐ विश्वेब्भ्यो देवेभ्यः स्वाहा विश्वभ्यो देवेभ्य इदं न मम।**

**ॐ द्यावापृथिवीभ्या ँस्वाहा द्यावापृथिवीभ्याम् इदं न मम।**

इति होमं विधाय चितायां शवस्थापनं कुर्यात् ।

## चितायां शवस्थापनप्रकारः

नद्यादितटे पवित्रस्थाने चितानिर्माणस्थलं सम्मार्ज्य संशोध्य पुण्डरीकाक्षविद्यया पञ्चगव्येन प्रोक्षयेत् -

**ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।**
**यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरशुचिः ॥**

ततः यज्ञीयकाष्ठैः चितां निर्मीयात् -

**ॐ शर्मास्यवधूतꣳरक्षोवधूताऽअरातयः।**
**अदित्यास्त्वगसि प्रतित्वादितिर्वेत्तु।**

चितायां सकुशं तिलान् विकीर्य तत्र घृताक्तं नववस्त्रवेष्टितं शवं चितां दक्षिणावर्तं त्रिपरिक्राम्य उत्तरशिरस्कं स्थापयित्वा तुलसीकाष्ठेन अन्यकाष्ठेन च आच्छाद्य पुष्पादीन् विकिरेत्। ततः चतुर्थपिण्डं दद्यात्।

## चितायां चतुर्थपिण्डदानम्

पिण्डदानस्थानं संशोध्य जलेन प्रोक्ष्य कुशादिकम् आस्तीर्य, **अपसव्येन पितृतीर्थेन** तिलजलकुशादिकमादाय अवनेजनं दद्यात् -

**अद्य अमुकगोत्र अमुकनामदिवङ्गत चतुर्थपिण्डस्थाने इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० - अद्य अमुकगोत्रे अमुकनामदिवङ्गते चतुर्थपिण्डस्थाने इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

इति कुशोपरि जलं दत्वा हस्ते सतिल-कुश-जल-पिण्डमादाय -

**अद्य अमुकगोत्र अमुकनामदिवङ्गत चितायां सकलबाधानिवृत्तये एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० - अद्य अमुकगोत्रे अमुकनामदिवङ्गते चितायां सकल-बाधानिवृत्तये एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।)**

इति पिण्डं दद्यात्। ततः कुश-तिल-जलमादाय प्रत्यवनेजनं दद्यात् -

**अद्य अमुकगोत्र अमुकनामदिवङ्गत इदं चतुर्थपिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० - अद्य अमुकगोत्रे अमुकनामदिवङ्गते इदं चतुर्थपिण्ड-प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

इति पिण्डोपरि जलादिकं दद्यात्। ततः पञ्चमपिण्डं दद्यात्।

## शवहस्ते पञ्चमपिण्डदानम्

ततः **अपसव्येन पितृतीर्थेन** तिलजलकुशादिकमादाय अवनेजनं दद्यात् -

**अद्य अमुकगोत्र अमुकनामदिवङ्गत पञ्चमपिण्डस्थाने इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० –अद्य अमुकगोत्रे अमुकनामदिवङ्गते पञ्चमपिण्डस्थाने इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

इति शवहस्ते कुशोपरि जलं दत्वा हस्ते सतिल–कुशजल–पिण्डमादाय-

**अद्य अमुकगोत्र अमुकनामदिवङ्गत शवहस्ते सकलबाधानिवृत्तये एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनामदिवङ्गते शवहस्ते सकल-बाधानिवृत्तये एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।)**

इति पिण्डं दद्यात्। ततः कुशतिलजलान्यादाय प्रत्यवनेजनं दद्यात् –

**अद्य अमुकगोत्र अमुकनामदिवङ्गत इदं पञ्चमपिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनामदिवङ्गते इदं पञ्चमपिण्ड-प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठताम्।)**

इति पिण्डोपरि जलादिकं दद्यात्।

## चितापरिक्रमणपूर्वकघटस्फोटनविधिः

कर्ता **अपसव्येन** पूर्वपूजिते सुदर्शनघटे छिद्रं विधाय तदीयजलधारया वक्ष्यमाणमन्त्रं पठन् पश्चिमदिशः आरभ्य वामावर्तं त्रिः परिक्रम्य तद्घटं दक्षिणदिशि आकाशे उत्क्षिप्य स्फोटयेत्।

**ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। विश्व ६ हिरिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि॥ दीक्षातपसोस्तनूरसिसितान्त्वाशिवाँशग्माम्परिदधे भद्रं वर्णं पुष्यन्॥**

## शवदहनविधिः

गृहादानीतम् हवनवेदिकायां क्रव्यादनाम्ना पूजितम् अग्निम् आदाय **अपसव्येन** शवस्य वामकुक्षितः मुखे वा प्रवेशयित्वा प्रज्वालयेत् –

**ॐ अग्ने नय सुपथारायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।**
**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम।**

अर्धे दग्धे समन्त्रं सतिलम् आज्याहुतिं दद्यात् –

**ॐ अस्मात्वमधिजातोसि त्वदयं जायतां पुनः।**
**असौ स्वर्गाय लोकाय स्वाहा ज्वलतु पावकः॥**

ततः हवनवेदीम् आगत्य **सव्येन** पूर्वोक्तविधिना पूर्णाहुतिं कृत्वा स्रुक्स्रुवादीन् चितायां क्षिपेत्। एवं शवं दाहयित्वा किञ्चित् दाहावशिष्टम् अस्थिवृन्दं निष्काश्य पलाशपत्रे पुटके वा निधाय वस्त्रेण वेष्टयित्वा मृण्मये पात्रे स्थापयेत्। ततः चिताभस्मं पुञ्जीकृत्य बलिं दद्यात्।

## बलिदानविधिः

**अपसव्येन** चिताभस्म पुञ्जीकृत्य तत्पुञ्जे पत्रं स्थापयित्वा कुशान् आस्तीर्य तदुपरि त्रिपादुकाम् (त्रिकाष्ठिकाम्) निधाय तस्यां त्रिपादुकायां जलपूर्णघटं संस्थापयेत् । ततः हस्ते कुश-जलसहितं तण्डुलपाकं (यथालब्धद्रव्यं) गृहीत्वा –

**अद्य अमुकगोत्र अमुकनामदिवङ्गत एष जलदधि-घृतयुतबलिः ते मया दीयते तवोपतिष्ठताम्।**
**(स्त्री० – अद्य अमुकगोत्रे अमुकनामदिवङ्गते एष जलदधि-घृतयुतबलिः ते मया दीयते तवोपतिष्ठताम्।)**

इति चिताभस्मपुञ्जोपरि स्थापिते पत्रे बलिं दद्यात्।

ततो दुग्धवारिभिः चितां प्रक्षाल्य षष्ठपिण्डं दद्यात्।

# अस्थिसञ्चयनम् (षष्ठपिण्डदानम्)

अस्थिस्थापितमृण्मयपात्रं गृहीत्वा चितास्थानात् पञ्चदशपददूरे उत्तरस्यां दिशि गत्वा तत्र गर्तं विधाय तस्मिन् गर्ते अस्थिपात्रं संस्थाप्य पत्रेण आच्छाद्य तस्योपरि वेदिकां निर्माय कुशान् आस्तीर्य **अपसव्येन** सजलकुशादिकम् आदाय अवनेजनं दद्यात् –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत अस्थिसञ्चयनस्थाने इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० –अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते अस्थिसञ्चयन-स्थाने इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

इति पूर्वोक्तवेदिकायाम् आच्छादितपत्रे कुशोपरि जलं दद्यात्।

ततः हस्ते तिल-कुश-जलसहितं पिण्डमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत अस्थिसञ्चयनस्थाने दाहार्तिनाशनरूपः एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**
**(स्त्री० – अद्य अमुकगोत्रे अमुकनामदिवङ्गते अस्थिसञ्चयनस्थाने दाहार्तिनाशनरूपः एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।)**

इति पूर्वोक्तवेदिकायाम् आच्छादितपत्रोपरि पिण्डं दद्यात्। ततः सजलं तिलकुशान् आदाय प्रत्यवनेजनं दद्यात् –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत अस्थिसञ्चयन-पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनामदिवङ्गते अस्थिसञ्चयन-पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

इति पिण्डोपरि जलं दद्यात्। ततः पुष्पादिना पिण्डं सम्पूज्य विसृज्य पूर्वस्थापितम् अस्थिपात्रं गर्तात् उद्धृत्य हस्तेन आदाय जलसमीपं गत्वा पात्रात् अस्थि बहिर्निष्काश्य पत्रे स्थापयित्वा दुग्धजलैः सम्यक् प्रक्षाल्य अस्थि चन्दनपुष्पैः अलङ्कृत्य नवीनवस्त्रेण सम्वेष्ट्य अस्थिसम्पुटं हृदि मस्तके कृत्वा भूमौ निधाय परिक्रम्य नमस्कृत्य गङ्गादिनद्यां प्रार्थनापूर्वकं विर्सजयेत् –

**ॐ आपो नारायणोद्भूता ता एव चायनम्पुनः।**
**तस्मान्नारायणि गङ्गे दिव्यां शान्तिं करोतु भोः॥**

**अस्य दिवङ्गतस्य (स्त्री० – अस्याः दिवङ्गतायाः) दाहादिशान्तिः अस्तु, त्वयि क्षिपामि भो गङ्गे ।**

## स्नानं तर्पणञ्च

ततः **सव्यो** भूत्वा नद्यां किञ्चिद्दूरं गत्वा कर्त्ता स्नायात्। तत्र गताः वाहकादयः अन्ये जनाश्च सचैलं गोघृत-गोमय-दुर्वाग्र-अक्षत-लाजादिभिर्मङ्गलस्नानं कृत्वा नामगोत्रादिकथनपूर्वकं दिवङ्गताय (दिवङ्गतायै) तर्पणं दत्वा आगच्छेयुः। कर्त्ता स्नानानन्तरम् आर्द्रेणैव वस्त्रेण नामगोत्रादिकथनपूर्वकं दिवङ्गताय (दिवङ्गतायै) तिलोदकं दद्यात् –

अपसव्येन हस्ते तिलकुशादीन् आदाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत ते एते जलाञ्जलयस्ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते ते एते जलाञ्जलयस्ते मया दीयन्ते तवोपतिष्ठन्ताम्।)**

इति षड्त्रिंशद्वारं (३६) दद्यात्। ततः क्रियावस्त्रं धारयेत्। ततः सर्वे जनाः किञ्चिन्मार्गम् आगत्य अग्निं प्रज्वाल्य घृताहुतिं हुत्वा कण्टकं पादेन स्पृष्ट्वा गृहम् आगच्छेयुः, निम्बपत्राणि प्राशयेयुः, मृतकस्य गुणान् वदेयुः, पुनः स्नात्वा वसेयुः।

पुनश्च तद्दिने सायङ्काले कर्तृशयनस्थाने सूत्रवेष्टनादिकं विधाय सप्तधान्योपरि जलपूर्णघटं निधाय तन्मुखे दशमदिनपर्यन्तम् अहर्निशं दीपं प्रज्वालयेत्।

॥ इति प्रथमखण्डः ॥

卐卐卐卐

# ❀ अथ दशपिण्डविधानम् ❀

(अत्र विशेषो ज्ञेयः - यदि कर्ता हवनाधिकारी चेदेव प्रथमदिनादारभ्य उत्तमषोडशश्राद्धपर्यन्तं हवनं कर्तव्यम् । कर्ता हवनानधिकारी अस्ति चेत् प्रथमदिनादारभ्य उत्तमषोडशश्राद्धपर्यन्तं हवनं नावश्यकम् । दुर्मरणविशेषे एकादशाहे कर्तव्ये नारायणबलिकर्मणि, द्वादशाहे सपिण्डनश्राद्धे च सर्वेषां हवनमावश्यकम् । दशपिण्डविधानस्य स्थापनप्रकारः ४२९ तमे पृष्टे चित्रावल्यां द्रष्टव्यः ।)

## प्रथमदिनकृत्यम्

नद्यादौ गत्वा प्रायशः अमन्त्रकं स्नायात्, **सव्येन** हस्ते कुशतिलादिकम् आदाय -

**अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य करिष्यमाण-प्रथमदिननिमित्तककृत्यर्थं सचैलस्नानमहं करिष्ये ।**

**(स्त्री० - अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः करिष्यमाणप्रथमदिननिमित्तककृत्यर्थं सचैलस्नानमहं करिष्ये ।)**

इति सङ्कल्प्य स्नात्वा, तर्पणं कुर्यात्, **अपसव्येन** हस्ते जलकुशादिकमादाय -

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत प्रथमदिनसम्बन्धि-जलाञ्जलयस्ते मया दीयन्ते तवोपतिष्ठन्ताम् ।**

**(स्त्री० - अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते प्रथमदिन-सबन्धिजलाञ्जलयस्ते मया दीयन्ते तवोपतिष्ठन्ताम् ।)**

इति सङ्कल्प्य पाषाणोपरि षट्त्रिंशदम् (३६) अञ्जलीन् दद्यात् ।

**(एवमेव प्रतिदिनं दशमदिनपर्यन्तं स्नात्वा जलाञ्जलीन् दद्यात् । सङ्कल्पवाक्ये यद्दिनसम्बन्धि कार्यं तद्दिनसम्बन्धीति उच्चारणीयम् ।**

यथा - द्वितीयदिनसम्बन्धि....., तृतीयदिनसम्बन्धि ....... इत्यादि।)

ततः **सव्यं** विधाय आचम्य यथासम्भवं तिलकादिकं कृत्वा वृक्षमूलादौ गत्वा आचार्यसहितः कर्त्ता शुचौ एकान्तस्थाने भूमिं विशोध्य आवश्यकतानुसारेण शुद्धगोदुग्धेन पायसं निर्माय भगवते निवेद्य मृत्युदिनात् पिण्डदानदिनसंख्यकान् पिण्डान् (प्रथमदिनस्यैकम्, अपरदिनस्य द्वितीयम्, एवं क्रमेण दशमदिनपर्यन्तं प्रत्यहम् एकैकं पिण्डम्) दद्यात्। तत्र उत्तरे भगवद्वेदीम्, (मध्ये हवनवेदीम्), दक्षिणे पिण्डवेदीं कृत्वा दीपं प्रज्वाल्य पुष्पादिभिः सम्पूज्य भगवद्वेदिकायाम् इष्टदेवं भगवन्तं नारायणं कुशकूर्चे आवाह्य पूजयेत्।

(स्थापनक्रमे संशयश्चेत् चित्रावली पृ. .... द्रष्टव्या)

तत्रादौ **सव्येन** हस्ते कुशादिकमादाय प्रतिज्ञासङ्कल्पं कुर्यात् -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य अकृत्यकरण-कृत्याकरण-भगवदपचार-भागवतापचार-असह्यापचारनिवृत्तिपूर्वकश्रीलक्ष्मीनारायणसन्निधिप्राप्तये इष्टदेवपूजन(हवन)पूर्वकं अमुकदिनसम्बन्धिपिण्डदानम् अहं करिष्ये।**

**(स्त्री० - अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः अकृत्यकरण-कृत्याकरण-भगवदपचार-भागवतापचार-असह्यापचारनिवृत्तिपूर्वकश्रीलक्ष्मीनारायणसन्निधिप्राप्तये इष्टदेवपूजन(हवन)पूर्वकं अमुकदिनसम्बन्धिपिण्डदानम् अहं करिष्ये।)**

इति सङ्कल्प्य गन्धादिभिः भगवन्तं पूजयेत् -

**ॐ सश्रीकाय भगवते नारायणाय नमः, सश्रीकं भगवन्तं नारायणम् आवाहयामि स्थापयामि पूजयामि।**

**इत्यावाह्य**

**आसनं समर्पयामि, अर्घ्यं, पाद्यम्, आचमनं, स्नानं, वस्त्रोपवस्त्रे, यज्ञोपवीतं, पुष्पं, चन्दनम्, अक्षतान्, पुष्पमालिकां, धूपं, दीपं, नैवेद्यं, पुनराचमनीयं, ताम्बूलं, दक्षिणां, प्रदक्षिणां, च सर्मपयामि।**

इति सम्पूजयेत्।

ततः हवनाधिकारी कर्ता चेत् होमवेद्याम् अग्निं प्रज्वाल्य षोडशसंस्कारं कृत्वा आवाह्य पूजयेत् (षोडशसंस्कारनाम पृ. ३३) –

**ॐ जातवेदसे नमः जातवेदसम् आवाहयामि स्थापयामि पूजयामि।**

इत्यावाह्य सम्पूज्य पुष्पाञ्जलिमादाय प्रार्थयेत् –

**द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम्।**
**वरदं शक्तिपाणिञ्च विभ्राणं स्रुक्स्रुवौ तथा॥**
**स्वाहाञ्च दक्षिणे पार्श्वे वामे देवीं स्वधान्तथा।**
**रक्तमाल्याम्बरधरमेवमग्निं विचिन्तयेत्॥**

## पञ्चवारुणीहोमः

ततः स्रुवेण आज्यमादाय –

**ॐ प्रजापतये स्वाहा प्रजापतये इदं न मम इति नैर्ऋत्यादीशानान्तं जुहुयात्।**
**ॐ इन्द्राय स्वाहा इन्द्राय इदं न मम इति वायव्यादाग्नेयान्तं जुहुयात्।**
**ॐ अग्नये स्वाहा अग्नये इदं न मम इति अग्नेर्दक्षिणतो जुहुयात्।**
**ॐ सोमाय स्वाहा सोमाय इदं न मम इति अग्नेरुत्तरतो जुहुयात्।**
**ॐ भूः अग्नये स्वाहा अग्नये इदं न मम।**
**ॐ भुवः वायवे स्वाहा वायवे इदं न मम।**
**ॐ स्वः सूर्याय स्वाहा सूर्याय इदं न मम।**
**ॐ भूर्भुवः स्वः प्रजापतये स्वाहा प्रजापतये इदं न मम।**
**ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्याम् इदं न मम।**

**ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्याम् इदं न मम।**
**ॐ अग्नये स्वाहा अग्नये इदं न मम।**
**ॐ वरुणाय स्वाहा वरुणाय इदं न मम ।**
**ॐ सवित्रे स्वाहा सवित्रे इदं न मम।**
**ॐ विष्णवे स्वाहा विष्णवे इदं न मम**
**ॐ विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं न मम।**
**ॐ वरुणाय स्वाहा वरुणाय इदं न मम।**

ततः तिलैः आज्येन च नारायणवासुदेवविष्णुमन्त्रैः प्रत्येकम् अष्टोत्तरशताहुतीर्हुत्वा पूर्णाहुतिं कुर्यात् –

**ॐ अग्नये पूर्णाय सप्तवते स्वाहा अग्नये पूर्णाय सप्तवते इदं न मम।**

## दिवङ्गतावाहनम्

आवश्यकतानुसारेण तिल–घृतमयान् पायसपिण्डान् यथा संख्यकान् विधाय पिण्डवेद्यां पुटकादौ कुशकूर्चन्निधाय **अपसव्येन** दक्षिणाभिमुखो भूत्वा दिवङ्गतमात्मानम् आवाहयेत् –

**आवाहयाम्यहं देवं जीवं सर्वगतं विभुम्।**
**वेद्यामस्यामदृश्यत्वं प्रविशाद्य नमोऽस्तु ते॥**

इति पुष्पाक्षतान् वेद्यां विकिरेत् । ततः **अपसव्येनैव** नामगोत्र-उच्चारणपूर्वकं दिवङ्गतात्मानं गन्धादिभिः पूजयित्वा हस्ते कुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत एतानि आसन–अर्घ्य–पाद्य–आचमन–स्नान–वस्त्र–उपवीत–गन्ध–पुष्प–धूप–दीप–नैवेद्यादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**
**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते एतानि आसन–अर्घ्य–पाद्य–आचमन–स्नान–वस्त्र–गन्ध–पुष्प–धूप–दीप–नैवेद्यादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।)**

ततो वेद्यां पुष्पाणि कुशान् च आस्तीर्य पितृतीर्थेन सजल-कुशादिकमादाय अवनेजनं दद्यात् -

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत ते प्रथमदिनसम्बन्धि-पिण्डदानार्थम् इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।**
**(स्त्री० - अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते ते प्रथमदिनसम्बन्धि-पिण्डदानार्थम् इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

इति कुशोपरि अवनेजनं दत्वा हस्ते सजल-कुश-पिण्डमादाय-

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत परमाह्लादजनकः प्रथमदिनसम्बन्धी एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**
**(स्त्री० -अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते परमाह्लादजनकः प्रथमदिनसम्बन्धी एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।)**

इति आस्तृत-कुशपुष्पोपरि पितृतीर्थेन निदध्यात् ।
ततो हस्ते कुश-जलादिकमादाय प्रत्यवनेजनं दद्यात् -

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत प्रथमदिनसम्बधिपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम् ।**
**(स्त्री० - अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते प्रथमदिन-सम्बधिपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

इति पिण्डोपरि जलं दद्यात्। ततो दिवङ्गतमुद्दिश्य तूष्णीमेव उशीर-भृङ्गराजपत्र-ऊर्णासूत्र-पूगीफल-गन्ध-पुष्पाक्षत-धूप-दीप-नैवेद्य-दक्षिणादिभिः पिण्डमभ्यर्च्य कुशादिकमादाय -

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत प्रथमदिनसम्बन्धि-प्रथमपिण्डे एतानि उशीर-भृङ्गराजपत्र-ऊर्णासूत्र-पूगीफल-गन्ध-पुष्पाक्षत-धूप-दीप-नैवेद्य-दक्षिणादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते प्रथमदिन-सम्बन्धिप्रथमपिण्डे एतानि उशीर-भृङ्गराजपत्र-ऊर्णासूत्र-पूगीफल-गन्ध-पुष्पाक्षत-धूप-दीप-नैवेद्यदक्षिणादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

इति वेद्यां कुशमुत्सृजेत्। ततः तिलतोयाञ्जलिं दद्यात्।

एकस्मिन् पुटके जलं स्थापयित्वा कुशतिलजलान्यादाय –

**अद्य अमुकगोत्र अमुकदिवङ्गत एषः सतिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकदिवङ्गते एषः सतिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठताम्।**

इत्येकतिलतोयाञ्जलिं पिण्डोपरि दद्यात्।

(अत्र विशेषः – द्वितीयदिनस्य सङ्कल्पवाक्ये .......**एतौ तिलतोयाञ्जली ते मया दीयेते तवोपतिष्ठेताम्** इति उच्चारणीयम्। इति द्वौ तिलतोयाञ्जली दद्यात्। एवमेव तृतीयदिनस्य सङ्कल्पवाक्ये .....**एते तिलतोयाञ्जलयस्ते मया दीयन्ते तवोपतिष्ठन्ताम्** इत्युच्चारणीयम्। इति दिनतुल्यसङ्ख्यकान् तिलतोयाञ्जलीन् दद्यात्। चतुर्थदिनात् दशमदिनपर्यन्तं तृतीयदिनवत् सङ्कल्पवाक्यम् उच्चारणीयम्।)

ततः सतिलतोयपूर्णपुटं दद्यात्। पिण्डसमीपे एकं पुटकं (दिनतुल्यसंख्यकानि पुटकानि) संस्थाप्य तस्मिन् सतिलं तोयं प्रक्षिप्य हस्ते कुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत एतत्तिलतोयपुटकपात्रं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते एतत्तिलतोयपुटकपात्रं ते मया दीयते तवोपतिष्ठताम्।**

**इति सङ्कल्प्य पुटकस्थं जलं पिण्डोपरि निदध्यात्।**

(अत्र विशेषः – द्वितीयदिनस्य पिण्डसमीपे द्वे पुटके स्थापयित्वा तयोः सतिलतोयं स्थापयित्वा सङ्कल्पवाक्ये ...........**इमे तिलतोयपुटकपात्रे ते मया दीयेते तवोपतिष्ठेताम्** इति उच्चारणीयम्। एवमेव तृतीयदिनस्य पिण्डसमीपे त्रीणि पुटकपात्राणि स्थापयित्वा सङ्कल्पवाक्ये .....**इमानि तिलतोयपुटकपात्राणि ते मया दीयन्ते तवोपतिष्ठन्ताम्** इत्युच्चारणीयम्। चतुर्थदिनात् दशमदिनपर्यन्तं तृतीयदिनवत् सङ्कल्पवाक्यम् उच्चारणीयम्।)

ततः पिण्डपार्श्वयोः द्वे त्रिकाष्ठिके संस्थाप्य एकस्यां दुग्धपुटकम्, अपरस्यां जलपुटकं स्थापयेत्। ततः कुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत इमे त्रिकाष्ठिकास्थिते नीरक्षीरयुतपुटपात्रे ते मया दीयेते तवोपतिष्ठेताम्।**

**(स्त्री०– अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते इमे त्रिकाष्ठिकास्थिते नीरक्षीरयुतपुटपात्रे ते मया दीयेते तवोपतिष्ठेताम्।)**

इति सङ्कल्प्य नीरं क्षीरञ्च पिण्डोपरि निदध्यात्। ततः प्रार्थयेत् –

**श्मशानानलदग्धोऽसि परित्यक्तोऽसि बान्धवैः।**
**इदं नीरमिदं क्षीरमत्र स्नाहि इदं पिब॥**

**सुशीतलघटदानम्** – ततः सतिलजलपूर्णघटमग्रे कृत्वा

**अद्य अमुकगोत्र अमुकदिवङ्गत एष सतिलसुशीतलजलोपेतो घटस्ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकदिवङ्गते एष सतिलसुशीतलजलोपेतो घटस्ते मया दीयते तवोपतिष्ठताम् )**

इति सुशीतलघटदानं कृत्वा दक्षिणां दद्यात्।

**सव्येन** हस्ते दक्षिणाद्रव्यं गृहीत्वा जलकुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत कृतैतच्छ्राद्धकर्मणः प्रतिष्ठार्थमिदं दक्षिणाद्रव्यं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते कृतैतच्छ्राद्धकर्मणः प्रतिष्ठार्थमिदं दक्षिणाद्रव्यं ते मया दीयते तवोपतिष्ठताम्।)**

ततः **अपसव्येन** जीवं प्रणम्य –

**भो जीवात्मन् यतः आगतः तत्र व्रज।**

इति जीवात्मानं विसृज्य **सव्यं** कृत्वा पुष्पं तुलसीञ्च गृहीत्वा प्रार्थयेत् –

**कृष्ण कृष्ण कृपालुस्त्वमगतीनां गतिप्रदः।**
**संसारार्णवमग्नानां प्रसीद पुरुषोत्तम॥**
**अनादिनिधनो देवः शंखचक्रगदाधरः।**
**अक्षयः पुण्डरीकाक्षः जीवमोक्षप्रदो भव॥**

इति सम्प्रार्थ्य भगवन्तं (अग्निञ्च) विसृज्य हस्तौ पादौ प्रक्षालयेत्।

ततः **अपसव्येन** एकस्य मृण्मयघटस्य अधोभागे छिद्रं कृत्वा तं घटं पिप्पलादिवृक्षे शिक्ये धारयित्वा हस्ते कुशादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य पिपासानिवृत्तये इदमाकाशाधिकरणं जलं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः पिपासानिवृत्तये इदम् आकाशाधिकरणं जलं ते मया दीयते तवोपतिष्ठताम्।)**

इति सङ्कल्प्य तस्मिन् घटे जलं दद्यात्।

ततः **सव्येन** वेद्यादिस्थानं गोमयोदकेन उपलिप्य हस्तौ पादौ प्रक्षाल्य पात्रादिकं शोधयित्वा पवित्रस्थाने पाकं विधाय, तस्मिन् तुलसीपत्रं निधाय भगवते निवेद्य तस्मात् किञ्चित् पाकं पत्रे स्थापयित्वा तन्नीत्वा

**अपसव्येन** किञ्चिद्दूरं गत्वा बलिं दद्यात् –

**ऐन्द्रवरुणवायव्याः सौम्या वै नैर्ऋतास्तथा।**
**वायसाः प्रतिगृह्णन्तु इदमन्नं मयार्पितम्॥**

ततः आगत्य **सव्यं** कृत्वा आचम्य स्वयं भुञ्जीत।

॥ इति प्रथमदिनकृत्यम्॥

## सायङ्कालीनविधिः

दाहदिनात् नवमदिनपर्यन्तं सायङ्काले चतुष्पदे गृहप्राङ्गणे वा गोमयेन उपलिप्य तिस्रः त्रिकाष्ठिकाः स्थापयित्वा त्रिकाष्ठिकासु एकैकानि पुटकानि स्थापयित्वा तेषु पुटकेषु एकस्मिन् दीपम्, एकस्मिन् जलम्, एकस्मिन् पुष्पं स्थापयित्वा तूष्णीम् आचम्य अपसव्येन जलकुशादिकमादाय –

**अद्यामुकगोत्र अमुकनामदिवङ्गत अमुकदिने अमुकदिनसम्बन्धि-सायङ्काले एष दीपस्ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते अमुकदिने अमुकदिनसम्बन्धिसायङ्काले एष दीपस्ते मया दीयते तवोपतिष्ठताम्।)**

इति सङ्कल्प्य दीपस्याग्रे कुशादिकमुत्सृजेत्। पुनः हस्ते जलकुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत अमुकदिने अमुकदिनसम्बन्धिसायङ्काले इदं जलं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते अमुकदिने अमुकदिनसम्बन्धिसायङ्काले इदं जलं ते मया दीयते तवोपतिष्ठताम्।)**

इति सङ्कल्प्य जले कुशादिकमुत्सृजेत् । पुनः हस्ते जलकुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत अमुकदिने अमुकदिनसम्बन्धिसायङ्काले इदं पुष्पं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते अमुकदिने अमुकदिनसम्बन्धिसायङ्काले इदं पुष्पं ते मया दीयते तवोपतिष्ठताम्।)** इति सङ्कल्प्य पुष्पे कुशादिकमुत्सृजेत्। ततः हस्तेन दीपं प्रदर्श्य **अनेन दीपेन पश्य,** जलं प्रदर्श्य **इदं जलं पिब,** पुष्पं प्रदर्श्य **इदं पुष्पं परिधेहि** इति वदेत्।

ततः **सव्येन** प्रार्थयेत् –

**कृष्ण कृष्ण कृपालुस्त्वमगतीनां गतिप्रदः।**
**संसारार्णवमग्नानां प्रसीद पुरुषोत्तम॥**
**अनादिनिधनो देवः शंखचक्रगदाधरः।**
**अक्षयः पुण्डरीकाक्षः जीवमोक्षप्रदो भव॥**

॥ इति सायङ्कालीनविधिः॥

## द्वितीयादि–दशमदिनकृत्यम्

### द्वितीयदिने –

प्रातः प्रथमदिनोक्तविधिना स्नात्वा जलाञ्जलीन् दत्वा भगवत्पूजनं हवनञ्च विधाय पिण्डदानम्, पिण्डपूजनम्, तिलतोयाञ्जलि दानम्, तिलतोयपुटकदानम्, सुशीतलघटदानम्, आकाशघटजलदानादिकं सर्वं प्रथमदिनवत् कर्तव्यम्। तत्र सङ्कल्पवाक्ये सर्वत्र **प्रथमदिन** ............ इति पदस्य स्थाने **द्वितीयदिन** ...... इति पदम् उच्चारणीयम्।

यथा अवनेजनवाक्ये –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत ते द्वितीयदिनसम्बन्धि-पिण्डदानार्थम् इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।**
**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते ते द्वितीयदिनसम्बन्धिपिण्डदानार्थम् इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

पिण्डदानवाक्ये –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत परमाह्लादजनकः द्वितीयदिनसम्बन्धी एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**
**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते परमाह्लादजनकः द्वितीयदिनसम्बन्धी एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।)**

प्रत्यवनेजनवाक्ये –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत द्वितीयदिनसम्बधिपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम् ।**
**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते द्वितीयदिन-सम्बधिपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम् ।)**

एवं क्रमेण सर्वत्र कर्तव्यम् ।

तथैव तृतीयदिने सर्वत्र सङ्कल्पवाक्ये... **तृतीयदिनसम्बन्धि** ...इति ।

चतुर्थदिने सर्वत्र सङ्कल्पवाक्ये .......... **चतुर्थदिनसम्बन्धि**.......इति ।

पञ्चमदिने सर्वत्र सङ्कल्पवाक्ये .......... **पञ्चमदिनसम्बन्धि** .......इति ।

षष्ठदिने सर्वत्र सङ्कल्पवाक्ये ............ **षष्ठदिनसम्बन्धि** ........इति ।

सप्तमदिने सर्वत्र सङ्कल्पवाक्ये.......... **सप्तमदिनसम्बन्धि** .....इति ।

अष्टमदिने सर्वत्र सङ्कल्पवाक्ये ........ **अष्टमदिनसम्बन्धि** .....इति ।

नवमदिने सर्वत्र सङ्कल्पवाक्ये.......... **नवमदिनसम्बन्धि** .......इति ।

(नवमे दिने सर्वे सपिण्डान्तर्गतबान्धवाः तैलाभ्यङ्गं कुर्युः । ततः बहिरेव जलाशये स्नात्वा स्त्रीजनम् अग्रे कृत्वा मृतालयं गत्वा

**दूर्वावत्कुलवृद्धिस्ते लाजा इव विकासता।**

इति उच्चारयन्तः लाजादूर्वादिकं विकिरेयुः ।)

दशमदिने सर्वत्र सङ्कल्पवाक्ये ........... **दशमदिनसम्बन्धि** ....इति ।

दशमदिने कर्ता कर्तृशयनस्थानस्थं सप्तधान्ययुतं पात्रम्, घटम्, दीपम्, सूत्रम्, त्रिकाष्ठिकाश्च आदाय क्रियास्थलं गत्वा पूर्ववत् पिण्डदानादिकं सम्पाद्य पिण्डवेदीं गोमयेन उपलिप्य प्रचलितविधिना सौवर्णेन रौप्येन वा कुद्दालेन, कुशमूलेन वा प्रथमं पिण्डवेदीम्, तदनन्तरं हवनवेदीम्, तदनन्तरं भगवद्वेदीञ्च भङ्क्त्वा तत्र सप्तधान्यानि विकिरेत् । तत्रैव त्रिकाष्ठिकाः त्रोट्याः, सूत्रं घटं दीपञ्च विसर्जयेत् । ततः मुण्डनं कृत्वा, स्नात्वा, पञ्चगव्यं प्राश्य, नूतनयज्ञोपवीतं धृत्वा, शुद्धवस्त्रं परिधाय, तिलकादिकं कृत्वा पाथेयश्राद्धं कुर्यात् ।

## अथ पाथेयश्राद्धविधिः

कर्ता आचार्यादीन् निमन्त्र्य तेषां सन्निधौ श्राद्धभूमिं गत्वा तत्र तिस्रः वेदीः (हवनानधिकारी चेत् द्वे वेद्यौ) निर्माय (पाथेयश्राद्धस्य स्थापनप्रकारः **४२९** तमे पृष्टे चित्रावल्यां द्रष्टव्यः ।) दीपं प्रज्वाल्य पूजयित्वा श्राद्धभूमौ तिलसर्षपादीन् विकीर्य देयानि वस्तूनि एकत्र निधाय कर्मपात्रं कृत्वा तज्जलेन तत्स्थानं सामग्रीश्च परिषिञ्चेत् –

**ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।**
**यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥**

ततः **सव्येन** कुशादिकमादाय प्रतिज्ञासङ्कल्पं कुर्यात् –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य परमपदगमनाय सर्वबाधानिवृत्तिपूर्वकपरमपदप्राप्तये भगवत्कैङ्कर्यरूपेण**

**भगवत्-पूजन(हवन)पूर्वकं पाथेयश्राद्धमहं करिष्ये।**
**(स्त्री० – अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः परमपदगमनाय सर्वबाधानिवृत्तिपूर्वकपरमपदप्राप्तये भगवत्-कैङ्कर्यरूपेण भगवत्पूजन(हवन)पूर्वकं पाथेयश्राद्धमहं करिष्ये।)**

इति सङ्कल्प्य **सव्येनैव** प्रथमायां वेद्यां तण्डुलपुञ्जे कुशकूर्चं स्थापयित्वा तस्मिन् पीताक्षतैः भगवन्तं नारायणम् आवाहयेत् –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य पाथेयश्राद्धकर्मणि सश्रीकं नारायणम् आवाहयामि स्थापयामि पूजयामि।**
**(स्त्री० – अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः पाथेयश्राद्धकर्मणि सश्रीकं नारायणम् आवाहयामि स्थापयामि पूजयामि।)**

इति आवाह्य आसनार्घ्यपाद्य-आचमनस्नानवस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणा—प्रदक्षिणादीन् समर्प्य पूजयेत्।

(ततः कर्ता हवनाधिकारी चेत् द्वितीयायां वेद्यां दशदिनान्तर्गतकृतहवनविधिना हवनं कुर्यात्।)

ततः तृतीयायां वेद्यां तण्डुलपुञ्जे कुशकूर्चं स्थापयित्वा तस्मिन् **अपसव्येन** दिवङ्गतात्मानमावाहयेत् –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत त्वाम् आवाहयामि।**
**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते त्वाम् आवाहयामि)**

इत्यावाह्य आसन-अर्घ्य-पाद्य-आचमन-स्नान-वस्त्र-उपवीत-गन्ध-अक्षत-पुष्प-अलङ्कार-धूप-दीप-नैवेद्यैः पूजयेत्।

ततः हस्ते कुशादिकमादाय -

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत पाथेयश्राद्धे इमानि आसन-अर्घ्य-पाद्य-आचमन-स्नान-वस्त्र-उपवीत-गन्ध-अक्षत-पुष्प-अलङ्कार-धूप-दीप-नैवेद्यादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

**(स्त्री० -अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते पाथेयश्राद्धे इमानि आसन-अर्घ्य-पाद्य-आचमन-स्नान-वस्त्र-उपवीत-गन्ध-अक्षत-पुष्प-अलङ्कार-धूप-दीप-नैवेद्यादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।)**

इति उत्सृजेत्। ततो वेद्याः अग्रे चतुष्कोणं मण्डलं विधाय तत्र मनुष्याहारपरिमितं हविरादिकं सजलं निधाय कुशादिकमादाय -

**इदम् अन्नम् एतद्भूस्वामिपितृभ्यो नमः** इति उत्सृजेत्।

ततो दिवङ्गतात्मानः अग्रे तिलान् विकीर्य अन्नादिकं पुरः स्थापयित्वा हस्ते कुशादिकमादाय -

**अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय पाथेयश्राद्धे इदमन्नादिकं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० - अद्य अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै पाथेयश्राद्धे इदमन्नादिकं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।)**

इति उत्सृजेत्। ततः जलकुशादिकम् आदाय अवनेजनं दद्यात् -

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत पाथेयपिण्डदानार्थे इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते पाथेयपिण्डदानार्थे इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

इति कुशोपरि अवनेजनं दत्वा हस्ते सकुशजलपिण्डमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत दशमदिवसे एष पाथेयपिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते दशमदिवसे एष पाथेयपिण्डस्ते मया दीयते तवोपतिष्ठताम्।)**

इति वेद्यां कुशोपरि पिण्डं दत्वा पुटके जलमादाय प्रत्यवनेजनं दद्यात् –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

ततो गन्धादिभिः पिण्डं सम्पूज्य कुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत पाथेयश्राद्धपिण्डे एतानि सूत्र-गन्ध-पुष्पाक्षत-धूप-दीप-नैवेद्य-ताम्बुल-दक्षिणादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते पाथेयश्राद्धपिण्डे एतानि सूत्र-गन्ध-पुष्पाक्षत-धूप-दीप-नैवेद्य-ताम्बुल-दक्षिणादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।)**

इति कुशमुत्सृजेत्। ततः पिण्डोपरि दुग्धधारां दत्वा दक्षिणां दद्यात्।

**सव्येन** हस्ते दक्षिणाद्रव्यं गृहीत्वा जलकुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गगत कृतैतत्पाथेयश्राद्धकर्मणः प्रतिष्ठार्थमिदं दक्षिणाद्रव्यं ते मया दीयते तवोपतिष्ठताम्।**

(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते कृतैतत्पाथेयश्राद्धकर्मणः प्रतिष्ठार्थमिदं दक्षिणाद्रव्यं ते मया दीयते तवोपतिष्ठताम्।)

ततः **अपसव्येन** जीवं प्रणम्य –

**भोः जीवात्मन् स्वस्थानं व्रज।**

इति जीवात्मानं पीताक्षतैः विसृज्य **सव्यं** कृत्वा प्रार्थयेत् –

**अत्र कार्येषु यच्छिद्रं कर्मतो मन्त्रतोऽपि वा।**
**सर्वं सम्पूर्णतां कृत्वा नारायण प्रसीदतु॥**

॥ इति पाथेयश्राद्धम् ॥

॥ इति दशमदिनकृत्यम् ॥

卐卐卐卐

# ❀ अथ एकादशाहकृत्यम् ❀

एकादशाहे कर्तव्यानां कर्मणां क्रमः –

१. मध्यमषोडशश्राद्धम्

२. उत्तमषोडशश्राद्धान्तर्गत–आद्यमासिकश्राद्धम्

३. आद्याब्दिकश्राद्धम्

४. षष्ट्युत्तरत्रिशतघटदानम्

५. उत्तमषोडशश्राद्धान्तर्गत–ऊनादिपञ्चदशश्राद्धम्

**दुर्मरणनिमित्तकनारायणबलिः कर्तव्यश्चेत् प्रथमं नारायणबलिकर्म समाप्य तदनन्तरम् अनेनैव क्रमेण कर्माणि कर्तव्यानि।**

एकादशदिवसे प्रातः आचार्यसहितः कर्ता जलाशयं गत्वा स्नात्वा नूतनयज्ञोपवीतं धृत्वा शुद्धवस्त्रं परिधाय पञ्चगव्यप्राशनं कृत्वा श्रीतिलकधारणं कृत्वा मध्यमषोडशश्राद्धं कुर्यात्।

## मध्यमषोडशश्राद्धविधानम्

श्राद्धभूमिं विशोध्य तत्र कर्ता पूर्वाभिमुखः सन् स्ववामभागे एकां लघ्वीं वेदीं निर्माय तस्यां तण्डुलपुञ्जे कुशकूर्चरूपं भगवन्तं स्थापयेत्। (यदि हवनाधिकारी कर्ता चेत् भगवद्वेद्याः दक्षिणे हवनवेदीं निर्मीयात्। हवनवेद्याः ऐशान्ये तण्डुलपुञ्जे कुशकूर्चं विष्वक्सेनरूपं स्थापयेत्। हवनवेद्याः पूर्वदिग्भागे दीपं स्थापयेत्।) ततः दक्षिणे लम्बायमानाम् एकां वेदीं निर्माय तस्यां नवसु तण्डुलपुञ्जेषु कुशकुर्चेषु विष्ण्वादीन् नवदेवान् स्थापयेत्। ततः दक्षिणे पृथक् एकां लघ्वीं वेदीं निर्माय तस्याम् एकस्मिन् तण्डुलपुञ्जे कुशकुर्चे दिवङ्गतं स्थापयेत्। ततः दक्षिणे तस्यामेव पङ्क्तौ पुनः लम्बायमानां वेदीं निर्माय तस्यां षट्सु तण्डुलपुञ्जेषु कुशकुर्चेषु विष्ण्वादीन् षड्देवान् स्थापयेत्। (स्थापनक्रमे संशयश्चेत् ४३० तमे पृष्टे चित्रावलिः द्रष्टव्या )।

ततः शुद्धासने उपविश्य समन्त्रकं तिलरहितम् (यवसहितम्) एकं कर्मपात्रम्, यवरहितम् (तिलसहितम्) अपरं कर्मपात्रमिति द्वे कर्मपात्रे विधाय कर्मपात्रजलेन श्राद्धस्थानं श्राद्धवस्तूनि स्वात्मानञ्च अभिषिञ्चेत्।

ततः पीतसर्षपैः दिग्-रक्षणं कुर्यात् -

वामहस्ते पीतसर्षपान् गृहीत्वा दक्षिणहस्तेन आच्छाद्य

**नमो नमस्ते गोविन्द पुराणपुरुषोत्तम।**
**इदं श्राद्धं हृषीकेश रक्ष त्वं सर्वतो दिशः॥**

इति पठित्वा दक्षिणहस्तेन सर्वासु दिक्षु प्रक्षिपेत् -

**प्राच्यै नमः** इति पूर्वे। **अवाच्यै नमः** इति दक्षिणे। **प्रतीच्यै नमः** इति पश्चिमे। **उदीच्यै नमः** इति उत्तरे। **अन्तरिक्षाय नमः** इति ऊर्ध्वे। **भूम्यै नमः** इति भूमौ।

ततः पवित्रधारणं कृत्वा प्रतिज्ञासङ्कल्पं कुर्यात्। (यवरहितं कर्मपात्रं केवलं दिवङ्गतस्य कृते एव प्रयोक्तव्यम्, अन्यत्र तिलरहितं कर्मपात्रं प्रयोक्तव्यम्।) ततः तिलरहितकर्मपात्रस्थजलकुशादिकमादाय-

**ॐ तत्सदित्यादीन् देशकालादीन् संकीर्त्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य अकृत्यकरण-कृत्याकरणभगवदपचारभागवतापचारासह्यापचारनिवृत्तिपूर्वकं श्रीवैकुण्ठनाथस्य सायुज्यप्राप्तये भगवत्कैङ्कर्यरूपेण दीप-विष्वक्सेन-भगवदाराधनापूर्वकं (हवनपूर्वकञ्च) एकादशाहे मध्यमषोडशश्राद्धमहं करिष्ये।**

**(स्त्री० - ॐ तत्सदित्यादीन् देशकालादीन् संकीर्त्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः अकृत्य-करण-कृत्याकरण-भगवदपचार-भागवतापचारासह्यापचारनिवृत्तिपूर्वकं**

**श्रीवैकुण्ठनाथस्य सायुज्यप्राप्तये भगवत्कैङ्कर्यरूपेण दीप-विष्वक्सेन-भगवदाराधनापूर्वकं (हवनपूर्वकञ्च) एकादशाहे मध्यमषोडशश्राद्धमहं करिष्ये।)**

ततः पूर्वस्यां दिशि दीपं प्रज्वाल्य गन्धादिभिः सम्पूज्य प्रथमायां वेद्यां स्थापिते कूर्चे सश्रीकं भगवन्तं नारायणं पीताक्षतैः आवाहयेत् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य मध्यमषोडशश्राद्धे सश्रीकं नारायणम् आवाहयामि स्थापयामि पूजयामि।**

**(स्त्री० — ॐ अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः मध्यमषोडशश्राद्धे सश्रीकं नारायणम् आवाहयामि स्थापयामि पूजयामि।)**

इति आवाह्य आसनार्घ्यपाद्य-आचमनस्नानवस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणा—प्रदक्षिणादीन् समर्प्य पूजयेत्।

ततः होमवेद्याम् विष्णुनामानम् अग्निं प्रज्वाल्य षोडशसंस्कारं (पृ. ३३) कृत्वा आवाह्य पूजयेत् -

**ॐ विष्णवे नमः, विष्णुम् आवाहयामि स्थापयामि पूजयामि।**

ततः पुष्पाञ्जलिमादाय प्रार्थयेत् -

**द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम्।**
**वरदं शक्तिपाणिञ्च विभ्राणं स्रुक्स्रुवौ तथा॥**
**स्वाहाञ्च दक्षिणे पार्श्वे वामे देवीं स्वधान्तथा।**
**रक्तमाल्याम्बरधरमेवमग्निं विचिन्तयेत्॥**

## पञ्चवारुणीहोमः

ततः श्रुवेण आज्यमादाय –

ॐ प्रजापतये स्वाहा प्रजापतये इदं न मम इति नैर्ऋत्यादीशानान्तं जुहुयात्।
ॐ इन्द्राय स्वाहा इन्द्राय इदं न मम इति वायव्यादाग्नेयान्तं जुहुयात्।
ॐ अग्नये स्वाहा अग्नये इदं न मम इति अग्नेर्दक्षिणतो जुहुयात्।
ॐ सोमाय स्वाहा सोमाय इदं न मम इति अग्नेरुत्तरतो जुहुयात्।
ॐ भूः अग्नये स्वाहा अग्नये इदं न मम।
ॐ भुवः वायवे स्वाहा वायवे इदं न मम।
ॐ स्वः सूर्याय स्वाहा सूर्याय इदं न मम।
ॐ भूर्भुवःस्वः प्रजापतये स्वाहा प्रजापतये इदं न मम।
ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्याम् इदं न मम।
ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्याम् इदं न मम।
ॐ अग्नये स्वाहा अग्नये इदं न मम।
ॐ वरुणाय स्वाहा वरुणाय इदं न मम ।
ॐ सवित्रे स्वाहा सवित्रे इदं न मम।
ॐ विष्णवे स्वाहा विष्णवे इदं न मम
ॐ विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं न मम।
ॐ वरुणाय स्वाहा वरुणाय इदं न मम।

ततः तिलैः आज्येन च नारायणवासुदेवविष्णुमन्त्रैः प्रत्येकम् अष्टोत्तरशताहुतीर्हुत्वा पूर्णाहुतिं दद्यात् –

ॐअग्नये पूर्णाय सप्तवते स्वाहा अग्नये पूर्णाय सप्तवते इदं न मम।
इति पूर्णाहुतिं दद्यात्।

ततः लम्बायमानवेद्याः समीपे उपविश्य नीवीबन्धनं कुर्यात्। **अपसव्येन** पत्रे पुटके वा तिलान् कुशत्रयञ्च संस्थाप्य निम्नमन्त्रं पठन् दक्षिणकट्यां धारयेत् –

**ॐ निहन्मि सर्वं यदमेध्यकृद्भवेत्, हताश्च सर्वेऽसुरदानवा मया। यक्षाश्च रक्षांसि पिशाचगुह्यका हता मया यातुधानाश्च सर्वे ॥**
**ॐ सोमस्य नीविरसि विष्णोः शर्मासि शर्मयजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि।**

ततः तत्र स्थितेषु नवसु तण्डुलपुञ्जकुर्चेषु क्रमशः **सव्येनैव** विष्ण्वादिदेवभ्यः आसनानि दद्यात्।

हस्ते तिलरहितकर्मपात्रस्थजलकुशादिकमादाय –

१. प्रथमतण्डुलपुञ्जे –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धे विष्णो इदमासनं ते नमः। इति कुशासनं दद्यात्।**

२. द्वितीयतण्डलपुञ्जे –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धे शिव इदमासनं ते नमः।** इति कुशासनं दद्यात्।

३. तृतीयतण्डुलपुञ्जे –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धे यम इदमासनं ते नमः।** इति कुशासनं दद्यात्।

४. चतुर्थतण्डुलपुञ्जे –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धे सोम इदमासनं ते नमः।** इति कुशासनं दद्यात्।

५. पञ्चमतण्डुलपुञ्जे –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)एकादशाहे मध्यमषोडशश्राद्धे हव्यवाह इदमासनं ते नमः ।** इति कुशासनं दद्यात् ।

६. षष्ठतण्डुलपुञ्जे –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धे कव्यवाह इदमासनं ते नमः ।** इति कुशासनं दद्यात् ।

७. सप्तमतण्डुलपुञ्जे –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धे काल इदमासनं ते नमः ।** इति कुशासनं दद्यात् ।

८. अष्टमतण्डुलपुञ्जे –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)एकादशाहे मध्यमषोडशश्राद्धे रुद्र इदमासनं ते नमः ।** इति कुशासनं दद्यात् ।

९. नवमतण्डुलपुञ्जे –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)एकादशाहे मध्यमषोडशश्राद्धे पुरुष इदमासनं ते नमः ।** इति कुशासनं दद्यात् ।

ततः **अपसव्येन** यवरहितकर्मपात्रस्थजलकुशादिकमादाय –

१०. दशमतण्डुलपुञ्जे -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धे प्रेत इदमासनं ते मया दीयते तवोपतिष्ठताम्।** इति कुशासनं दद्यात्।

पुनः **सव्येन** आचम्य तिलरहितकर्मपात्रस्थजलकुशादिकमादाय -

११. एकादशतण्डुलपुञ्जे -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)एकादशाहे मध्यमषोडशश्राद्धे विष्णो इदमासनं ते नमः।** इति कुशासनं दद्यात्।

१२. द्वादशतण्डुलपुञ्जे -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)एकादशाहे मध्यमषोडशश्राद्धे ब्रह्मन् इदमासनं ते नमः।** इति कुशासनं दद्यात्।

१३. त्रयोदशतण्डुलपुञ्जे -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)एकादशाहे मध्यमषोडशश्राद्धे विष्णो इदमासनं ते नमः।** इति कुशासनं दद्यात्।

१४. चतुर्दशतण्डुलपुञ्जे -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धे शिव इदमासनं ते नमः।** इति कुशासनं दद्यात्।

१५. पञ्चदशतण्डुलपुञ्जे –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धे यम इदमासनं ते नमः।** इति कुशासनं दद्यात्।

१६. षोडशतण्डुलपुञ्जे –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)एकादशाहे मध्यमषोडशश्राद्धे तत्पुरुष इदमासनं ते नमः।** इति कुशासनं दद्यात्।

इति सर्वेभ्यः आसनानि दत्वा आवाहयेत्।

आवाहनम् – प्रथमादारभ्य नवमपर्यन्तम् **सव्येन ॐयवोसि**....इति मन्त्रेण यवान् विकिरेत्। दशमस्थाने **अपसव्येन तिलोसि**....इति मन्त्रेण तिलान् विकिरेत्। पुनः **सव्येन** एकादशादारभ्य षोडशपर्यन्तं **ॐयवोसि**....इति मन्त्रेण यवान् विकिरेत्। ततो हस्तार्घं दद्यात्।

## हस्तार्घविधिः

ततः **सव्येन** हस्तार्घार्थं वेद्यां विष्णवादिपुरुषान्तानां नवदेवानाम् अग्रे क्रमेण नव पुटकानि संस्थाप्य तेषु कुशपवित्रं निक्षिपेत् –

**ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः।**
**तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥**

जलं निक्षिपेत् –

**ॐ शन्नो देवीरभीष्टयऽआपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः॥**

यवान् निक्षिपेत् –

**ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्द्दिवेत्वान्तरिक्षायत्वा पृथिव्यै त्वा। शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि॥**

पुष्पाणि निक्षिपेत् –

**ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुं मऽइषाण सर्व्वलोकं मऽइषाण॥**

गन्धं निक्षिपेत् –

**ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।**

ततः प्रथमं हस्तार्घपात्रं वामहस्ते स्थापयित्वा दक्षिणहस्तेन हस्तार्घपात्रस्थपवित्रमादाय **ॐ नमो नारायणाय** इति मन्त्रेण सजलपवित्रं विष्णोः अग्रे निदध्यात्। ततः न्यूब्जदक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य अभिमन्त्रयेत् –

**ॐ या दिव्या आपः पयसासम्बभूवुर्या अन्तरिक्षा उत पार्थवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शिवाःशँस्योनाः सुहवा भवन्तु।**

इति अभिमन्त्र्य हस्ते जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धान्तर्गते विष्णुश्राद्धे विष्णो एषः अर्घस्ते नमः।**

इति विष्णवे अर्घं दत्वा अर्घपात्रं विष्णोः दक्षिणभागे उत्तानमेव स्थापयेत्।

पुनः क्रमशः द्वितीयाद्यर्घपात्रं वामहस्ते स्थापयित्वा दक्षिणहस्तेन हस्तार्घपात्रस्थकुशमादाय **ॐ नमो नारायणाय** इति मन्त्रेण सजलकुशं

तत्तद्देवानाम् अग्रे निदध्यात् । ततः न्यूब्जदक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य **या दिव्या...**इति मन्त्रेण अभिमन्त्र्य हस्ते जलकुशादिकमादाय पूर्ववत् सङ्कल्पं कृत्वा अर्घं दत्वा अर्घपात्रं तत्तद्देवानां दक्षिणभागे उत्तानमेव स्थापयेत्। सङ्कल्पवाक्ये विशेषः -

| | | | |
|---|---|---|---|
| २. .......... | शिवश्राद्धे | शिव | एषः अर्घस्ते नमः। |
| ३. .......... | यमश्राद्धे | यम | एषः अर्घस्ते नमः। |
| ४. .......... | सोमश्राद्धे | सोम | एषः अर्घस्ते नमः। |
| ५. .......... | हव्यवाहश्राद्धे | हव्यवाह | एषः अर्घस्ते नमः। |
| ६. .......... | कव्यवाहश्राद्धे | कव्यवाह | एषः अर्घस्ते नमः। |
| ७. .......... | कालश्राद्धे | काल | एषः अर्घस्ते नमः। |
| ८. .......... | रुद्रश्राद्धे | रुद्र | एषः अर्घस्ते नमः। |
| ९. .......... | पुरुषश्राद्धे | पुरुष | एषः अर्घस्ते नमः। |

इति नवभ्यो देवेभ्यः क्रमेण अर्घं दत्वा **अपसव्यं** कृत्वा दक्षिणाभिमुखो भूत्वा पूर्ववत् प्रेतस्य अग्रे एकं पुटकं स्थापयित्वा तस्मिन् कुशपवित्रं निक्षिपेत् -

**ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥**

जलं निक्षिपेत् -

**ॐ शन्नो देवीरभीष्टयऽआपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः॥**

तिलान् निक्षिपेत् -

**ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः । प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रीणाहि नः स्वाहा॥**

ततः तूष्णीं पुष्पाणि गन्धञ्च निक्षिपेत्।

ततः हस्तार्घपात्रं वामहस्ते स्थापयित्वा दक्षिणहस्तेन हस्तार्घपात्रस्थ-पवित्रमादाय **ॐ नमो नारायणाय** इति मन्त्रेण सजलपवित्रं प्रेतस्य अग्रे निदध्यात्। ततः उत्तानदक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य अभिमन्त्रयेत् -

**ॐ या दिव्या आपः पयसासम्बभूवुर्या अन्तरिक्षा उत पार्थवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शिवाःशꣳस्योनाः सुहवा भवन्तु।**

इति अभिमन्त्र्य हस्ते जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)एकादशाहे मध्यमषोडशश्राद्धान्तर्गते प्रेतश्राद्धे प्रेत एषः अर्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति प्रेताय अर्घं दद्यात्। ततः प्रेतस्य अग्रे पूर्वं स्थापितपवित्रं प्रेतार्घपात्रे स्थापयित्वा तदर्घपात्रं प्रेतस्य वामभागे उत्तानमेव स्थापयेत्।

ततः **सव्यं** भूत्वा आचम्य एकादशादारभ्य षोडशपर्यन्तानां विष्ण्वादि-तत्पुरुषान्तानां देवानामग्रे षट्पुटकानि स्थापयित्वा तेषु पूर्ववत् पवित्रम्, जलम्, यवान्, पुष्पाणि, गन्धञ्च निक्षिप्य क्रमशः एकैकम् अर्घपात्रं वामहस्ते स्थापयित्वा दक्षिणहस्तेन हस्तार्घपात्रस्थकुशमादाय **ॐ नमो नारायणाय** इति मन्त्रेण सजलपवित्रं तत्तद्देवानाम् अग्रे निदध्यात्। ततः न्यूब्जदक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य **या दिव्या**...इति मन्त्रेण अभिमन्त्र्य हस्ते जलकुशादिकमादाय पूर्ववत् सङ्कल्पं कृत्वा तत्तद्देवेभ्यः अर्घं दत्वा अर्घपात्रं तत्तद्देवानां दक्षिणभागे उत्तानमेव स्थापयेत्। सङ्कल्पवाक्ये विशेषः -

| | | | |
|---|---|---|---|
| ११. .......... | विष्णुश्राद्धे | विष्णो | एषः अर्घस्ते नमः। |
| १२. .......... | ब्रह्मश्राद्धे | ब्रह्मन् | एषः अर्घस्ते नमः। |
| १३. .......... | विष्णुश्राद्धे | विष्णो | एषः अर्घस्ते नमः। |
| १४. .......... | शिवश्राद्धे | शिव | एषः अर्घस्ते नमः। |
| १५. .......... | यमश्राद्धे | यम | एषः अर्घस्ते नमः। |
| १६. .......... | तत्पुरुषश्राद्धे | तत्पुरुष | एषः अर्घस्ते नमः। |

इति सर्वेभ्यः षड्भ्यो देवेभ्यः अर्घं दद्यात्।

॥ इति हस्तार्घविधिः ॥

एवं हस्तार्घं दत्वा विष्ण्वादि-पुरुषान्तान् नवदेवान् अर्घ्यपाद्य-आचमनस्नानवस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीपनैवेद्य-ताम्बूल- नीराजनदक्षिणा-प्रदक्षिणादीन् समर्प्य पूजयेत्।

ततः कुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धे विष्ण्वादिपुरुषान्तदेवाः इमानि पाद्य-आचमनस्नानवस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणा-प्रदक्षिणादीनि युष्मभ्यं नमः।**

इति विष्ण्वादीनाम् अग्रे उत्सृजेत्।

ततः **अपसव्येन** यवरहितकर्मपात्रस्थजलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धे प्रेत**

**इमानि पाद्य–आचमनस्नानवस्त्रोपवीत–गन्धाक्षतपुष्पालङ्कार–धूप–दीपनैवेद्य–ताम्बूल–नीराजनदक्षिणाप्रदक्षिणादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।** इति प्रेतस्य अग्रे उत्सृजेत्।

पुनः **सव्येन** आचम्य एकादशादारभ्य षोडशपर्यन्तान् विष्ण्वादि–तत्पुरुषान्तदेवान् पाद्य–आचमनस्नानवस्त्रोपवीत–गन्धाक्षत–पुष्प–अलङ्कारधूप–दीपनैवेद्य–ताम्बूल–नीराजनदक्षिणा–प्रदक्षिणादीन् समर्प्य पूजयेत्। ततः हस्ते कुशजलादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) एकादशाहे मध्यमषोडशश्राद्धे विष्ण्वादितत्पुरुषान्तदेवाः इमानि पाद्य–आचमनस्नानवस्त्रोपवीत–गन्धाक्षत–पुष्पालङ्कारधूप–दीपनैवेद्य–ताम्बूल–नीराजनदक्षिणा–प्रदक्षिणादीनि युष्मभ्यं नमः।**

इति तेषामग्रे उत्सृजेत्॥

## अन्नदानम्

ततः **अपसव्येन** दधि–घृत–शर्करा–कदलीफलादिसहितं पक्वान्नं निधाय कुश–जलादिकमादाय –

**ॐ इदमन्नम् एतद्भूस्वामिपितृभ्यो नमः।** इति उत्सृजेत्।

ततः **सव्येन** विष्ण्वादिपुरुषान्तानां देवानां कृते सजलमन्नानि सज्जीकृत्य तेषामग्रे वेद्याः पुरतः चतुरस्रं मण्डलं विधाय, तस्मिन् मण्डले सजलमन्नादिकं निधाय –

**ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा।** इत्यालभ्य –

**ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधे पदं समूढमस्यपा ँ सुरे। ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्द्दिवेत्वान्तरिक्षायत्वा पृथिव्यै त्वा। शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि॥**

इति अन्नं परितः यवान् विकीर्य कुशादिकमादाय सङ्कल्प्य प्रथमं विष्णवे दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) मध्यमषोडशश्राद्धान्तर्गते विष्णुश्राद्धे एतदन्नं सजलं सोपस्करं हव्यं विष्णवे नमः।**

पुनः क्रमशः कुशादिकमादाय पुरुषान्तदेवेभ्यः पृथक् पृथक् सङ्कल्प्य दद्यात्। सङ्कल्पवाक्ये विशेषः –

| | | | |
|---|---|---|---|
| २. ... | **शिवश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | शिवाय नमः। |
| ३. ... | **यमश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | यमाय नमः। |
| ४. ... | **सोमश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | सोमाय नमः। |
| ५. ... | **हव्यवाहश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | हव्यवाहाय नमः। |
| ६. ... | **कव्यवाहश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | कव्यवाहाय नमः। |
| ७. ... | **कालश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | कालाय नमः। |
| ८. ... | **रुद्रश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | रुद्राय नमः। |
| ९. ... | **पुरुषश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | पुरुषाय नमः। |

ततः **अपसव्येन** एकभागमन्नं दशमस्य (प्रेतस्य) अग्रे स्थापयित्वा तत्परितः **ॐ अपहता असुरा रक्षा ँ सि वेदिषदः** इति मन्त्रेण तिलान् विकीर्य हस्ते यवरहितकर्मपात्रस्थजलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) मध्यमषोडशश्राद्धान्तर्गते प्रेतश्राद्धे एतदन्नं सजलं सोपस्करं कव्यं प्रेताय मया दीयते तवोपतिष्ठताम्।**

ततः पुनः **सव्येन** आचम्य एकादशादारभ्य षोडशपर्यन्तानां देवानामग्रे चतुरस्रं मण्डलं विधाय षड्भागानि अन्नानि स्थापयित्वा

**ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा।** इत्यालभ्य -

**ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधे पदं समूढमस्यपा ँ सुरे।**

**ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वान्तरिक्षायत्वा पृथिव्यै त्वा। शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि॥**

इति अन्नं परितः यवान् विकीर्य सजल-कुशादिकमादाय पूर्ववत् एकादशादारभ्य षोडशपर्यन्तेभ्यः विष्ण्वादितत्पुरुषान्तेभ्यः देवेभ्यः पृथक् पृथक् सङ्कल्प्य दद्यात्। सङ्कल्पवाक्ये विशेषः -

| | | | |
|---|---|---|---|
| ११... | **विष्णुश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | **विष्णवे नमः।** |
| १२... | **ब्रह्मश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | **ब्रह्मणे नमः।** |
| १३... | **विष्णुश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | **विष्णवे नमः।** |
| १४... | **शिवश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | **शिवाय नमः।** |
| १५... | **यमश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | **यमाय नमः।** |
| १६... | **तत्पुरुषश्राद्धे** | **एतदन्नं सजलं सोपस्करं हव्यं** | **तत्पुरुषाय नमः।** |

इति सर्वेभ्यो दत्वा आचम्य **सव्येन** विष्ण्वादिनवदेवेभ्यः, **अपसव्येन** प्रेताय, पुनः **सव्येन** विष्ण्वादिषड्देवेभ्यो जलं दत्वा प्रणमेत्।

## पिण्डदानम्

ततः षोडशपायसपिण्डान् निर्माय तेषु एकं पिण्डं पृथक् स्थापयेत्। पिण्डदानार्थं **सव्येन** प्रथमादारभ्य नवमपर्यन्तानां विष्ण्वादिपुरुषान्तानाम् अग्रे एकां लम्बायमानां वेदीम्, **अपसव्येन** प्रेतस्याग्रे एकां लघ्वीं वेदीम्,

पुनः **सव्येन** एकादशादारभ्य षोडशपर्यन्तानां विष्ण्वादितत्पुरुषान्तानाम् अग्रे एकां लम्बायमानां वेदीं निर्माय कुशान् आस्तीर्य द्वयोः देववेद्योः **सव्येन**, प्रेतवेद्याम् **अपसव्येन** जलेन सम्प्रोक्षयेत्। ततः **सव्येन** प्रथमादारभ्य नवमपर्यन्तानां विष्ण्वादिपुरुषान्तानाम् अग्रे अवनेजनार्थम् नवपुटकानि, **अपसव्येन** दशमस्य (प्रेतस्य) अग्रे एकं पुटकम्, पुनः **सव्येन** एकादशादारभ्य षोडशपर्यन्तानां विष्ण्वादितत्पुरुषान्तानाम् अग्रे षट्पुटकानि स्थापयित्वा प्रथमं नवपुटकेषु **सव्येन** जलयवगन्धपुष्पाणि निक्षिप्य, **अपसव्येन** दशमे पुटके जलतिलगन्धपुष्पाणि निक्षिप्य, पुनः **सव्येन** षट्सु पुटकेषु च जलयवगन्धपुष्पाणि निक्षिप्य

१. प्रथमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय विष्णवे अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गत-विष्णुश्राद्धे पिण्डस्थाने विष्णो इदम् अवनेजनं ते नमः।**

इत्युच्चार्य विष्णोः अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजल-कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गत-विष्णुश्राद्धे विष्णो एष पिण्डस्ते नमः।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते विष्णुश्राद्धे विष्णो इदं पिण्डप्रत्यवनेजनं ते नमः।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात्।

२. ततो द्वितीयपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय शिवाय अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते शिवश्राद्धे पिण्डस्थाने शिव इदम् अवनेजनं ते नमः।**

इत्युच्चार्य शिवस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलकुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते शिवश्राद्धे शिव एष पिण्डस्ते नमः।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते शिवश्राद्धे शिव इदं पिण्डप्रत्यवनेजनं ते नमः।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात्।

३. ततः तृतीयपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय यमाय अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते यमश्राद्धे पिण्डस्थाने यम इदम् अवनेजनं ते नमः।**

इत्युच्चार्य यमस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजल-कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते यमश्राद्धे यम एष पिण्डस्ते नमः।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते यमश्राद्धे यम इदं पिण्डप्रत्यवनेजनं ते नमः।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात्।

४. ततः चतुर्थपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय सोमाय अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते सोमश्राद्धे पिण्डस्थाने सोम इदम् अवनेजनं ते नमः।**

इत्युच्चार्य सोमस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजल-कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते सोमश्राद्धे सोम एष पिण्डस्ते नमः।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते सोमश्राद्धे सोम इदं पिण्डप्रत्यवनेजनं ते नमः।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात्।

५. ततः पञ्चमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय हव्यवाहाय अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)क्रियमाणमध्यमषोडशश्राद्धान्तर्गते हव्यवाहश्राद्धे पिण्डस्थाने हव्यवाह इदम् अवनेजनं ते नमः।**

इत्युच्चार्य हव्यवाहस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजल-कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते हव्यवाहश्राद्धे हव्यवाह एष पिण्डस्ते नमः।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते हव्यवाहश्राद्धे हव्यवाह इदं पिण्डप्रत्यवनेजनं ते नमः।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात्।

६. ततः षष्ठपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय कव्यवाहाय अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते कव्यवाहश्राद्धे पिण्डस्थाने कव्यवाह इदम् अवनेजनं ते नमः ।**

इत्युच्चार्य कव्यवाहस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात् ।

ततः हस्ते सजलकुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते कव्यवाहश्राद्धे कव्यवाह एष पिण्डस्ते नमः ।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते कव्यवाहश्राद्धे कव्यवाह इदं पिण्डप्रत्यवनेजनं ते नमः ।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात् ।

७. ततः सप्तमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय कालाय अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते कालश्राद्धे पिण्डस्थाने काल इदम् अवनेजनं ते नमः ।**

इत्युच्चार्य कालस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात् ।

ततः हस्ते सजल-कुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते कालश्राद्धे काल एष पिण्डस्ते नमः ।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते कालश्राद्धे काल इदं पिण्डप्रत्यवनेजनं ते नमः ।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात् ।

८. ततः अष्टमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय रुद्राय अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते रुद्रश्राद्धे पिण्डस्थाने रुद्र इदम् अवनेजनं ते नमः ।**

इत्युच्चार्य रुद्रस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात् ।

ततः हस्ते सजलकुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते रुद्रश्राद्धे रुद्र एष पिण्डस्ते नमः ।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते रुद्रश्राद्धे रुद्र इदं पिण्डप्रत्यवनेजनं ते नमः ।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात् ।

९. ततः नवमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय पुरुषाय अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते पुरुषश्राद्धे पिण्डस्थाने पुरुष इदम् अवनेजनं ते नमः।**

इत्युच्चार्य पुरुषस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलकुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते पुरुषश्राद्धे पुरुष एष पिण्डस्ते नमः।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते पुरुषश्राद्धे पुरुष इदं पिण्डप्रत्यवनेजनं ते नमः।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात्।

१०. ततः **अपसव्येन** दक्षिणाभिमुखो भूत्वा दशमस्य (प्रेतस्य) अग्रे वेद्याम् अवनेजनं दद्यात्। अवनेजनपुटकं हस्ते गृहीत्वा जल-कुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते प्रेतश्राद्धे पिण्डस्थाने प्रेत इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

इत्युच्चार्य प्रेतस्य अग्रे वेद्यां पिण्डस्थाने पितृतीर्थेन अवनेजनं दद्यात्।

ततः हस्ते सजलकुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते प्रेतश्राद्धे प्रेत एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

इति कुशोपरि पितृतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते प्रेतश्राद्धे प्रेत इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

इति पिण्डोपरि पितृतीर्थेन प्रत्यवनेजनं दद्यात्।

ततः **सव्येन** आचम्य एकादशादारभ्य षोडशपर्यन्तानां देवानां वेद्याः अग्रे स्थित्वा क्रमशः षड्भ्यः अवनेजन-पिण्ड-प्रत्यवनेजनानि दद्यात् -
११. ततः एकादशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय विष्णवे अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते विष्णुश्राद्धे पिण्डस्थाने विष्णो इदम् अवनेजनं ते नमः।**

इत्युच्चार्य विष्णोः अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलकुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते विष्णुश्राद्धे विष्णो एष पिण्डस्ते नमः।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते विष्णुश्राद्धे विष्णो इदं पिण्डप्रत्यवनेजनं ते नमः ।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात् ।

१२. ततः द्वादशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय ब्रह्मणे अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते ब्रह्मश्राद्धे पिण्डस्थाने ब्रह्मन् इदम् अवनेजनं ते नमः ।**

इत्युच्चार्य ब्रह्मणः अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात् ।

ततः हस्ते सजलकुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते ब्रह्मश्राद्धे ब्रह्मन् एष पिण्डस्ते नमः ।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते ब्रह्मश्राद्धे ब्रह्मन् इदं पिण्डप्रत्यवनेजनं ते नमः ।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात् ।

१३. ततः त्रयोदशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय विष्णवे अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते विष्णुश्राद्धे पिण्डस्थाने विष्णो इदम् अवनेजनं ते नमः ।**

इत्युच्चार्य विष्णोः अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात् ।

ततः हस्ते सजलकुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते विष्णुश्राद्धे विष्णो एष पिण्डस्ते नमः ।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते विष्णुश्राद्धे विष्णो इदं पिण्डप्रत्यवनेजनं ते नमः ।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात् ।

१४. ततः चतुर्दशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय शिवाय अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते शिवश्राद्धे पिण्डस्थाने शिव इदम् अवनेजनं ते नमः ।**

इत्युच्चार्य शिवस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात् ।

ततः हस्ते सजलकुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते शिवश्राद्धे शिव एष पिण्डस्ते नमः।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते शिवश्राद्धे शिव इदं पिण्डप्रत्यवनेजनं ते नमः।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात्।

१५. ततः पञ्चदशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय यमाय अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते यमश्राद्धे पिण्डस्थाने यम इदम् अवनेजनं ते नमः।**

इत्युच्चार्य यमस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलकुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते यमश्राद्धे यम एष पिण्डस्ते नमः।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते यमश्राद्धे यम इदं पिण्डप्रत्यवनेजनं ते नमः।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात्।

१६. ततः षोडशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय तत्पुरुषाय अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते तत्पुरुषश्राद्धे पिण्डस्थाने तत्पुरुष इदम् अवनेजनं ते नमः।**

इत्युच्चार्य तत्पुरुषस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलकुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते तत्पुरुषश्राद्धे तत्पुरुष एष पिण्डस्ते नमः।**

इति कुशोपरि पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धान्तर्गते तत्पुरुषश्राद्धे तत्पुरुष इदं पिण्डप्रत्यवनेजनं ते नमः।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात्।

**॥ इति पिण्डदानम् ॥**

## पिण्डपूजनम्

ततः **अपसव्येन** नीवीं विस्रस्य **सव्येन** आचम्य प्रथमादारभ्य नवमपर्यन्तान् पिण्डान् अर्घ्यपाद्य-आचमनस्नानवस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणा-प्रदक्षिणादिभिः पूजयित्वा वस्त्रेण आच्छाद्य हस्ते जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यम-षोडशश्राद्धे विष्ण्वादिपुरुषान्तदेवाः पिण्डेषु एतानि अर्घ्यपाद्य-आचमनस्नान-वस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणा-प्रदक्षिणादीनि अर्चनानि युष्मभ्यं नमः ।**

ततः **अपसव्येन** दशमपिण्डं तेनैव विधिना पूजयित्वा वस्त्रेण आच्छाद्य हस्ते जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यम-षोडशश्राद्धे प्रेतपिण्डे प्रेत एतानि अर्घ्यपाद्य-आचमनस्नान-वस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणाप्रदक्षिणादीनि अर्चनानि ते मया दीयन्ते तवोपतिष्ठन्ताम् ।**

पुनः **सव्येन** एकादशादारभ्य षोडशपर्यन्तान् पिण्डान् तेनैव विधिना पूजयित्वा वस्त्रेण आच्छाद्यहस्ते जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे**

**विष्ण्वादितत्पुरुषान्तदेवाः पिण्डेषु एतानि अर्घ्यपाद्य-आचमनस्नान-वस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणा-प्रदक्षिणादीनि अर्चनानि युष्मभ्यं नमः ।**

इति सम्पूज्य प्रार्थयेत् -

**ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।**
**नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥**

इति प्रार्थयित्वा अक्षय्योदकं दद्यात् ।

## अक्षय्योदकदानम्

**सव्येन** प्रथमादारभ्य नवमपर्यन्तानां विष्ण्वादिपुरुषान्तदेवानामग्रे नवपुटकानि स्थापयित्वा तेषु जलं यवञ्च निक्षिप्य

१. प्रथमं पुटकं हस्ते गृहीत्वा जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे विष्णोर्दत्तैतदन्नपानादिकम् अक्षय्यमस्तु ।**

इति विष्णवे अक्षय्योदकं दद्यात् । पुनः

२. द्वितीयपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे शिवस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु ।**

इति शिवाय अक्षय्योदकं दद्यात् । पुनः

३. तृतीयपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे यमस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु ।**

इति यमाय अक्षय्योदकं दद्यात् । पुनः

४. चतुर्थपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे सोमस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु ।**

इति सोमाय अक्षय्योदकं दद्यात् । पुनः

५. पञ्चमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे हव्यवाहस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु ।**

इति हव्यवाहाय अक्षय्योदकं दद्यात् । पुनः

६. षष्ठपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे कव्यवाहस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु ।**

इति कव्यवाहाय अक्षय्योदकं दद्यात् । पुनः

७. सप्तमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे कालस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति कालाय अक्षय्योदकं दद्यात्। पुनः

८. अष्टमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे रुद्रस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति रुद्राय अक्षय्योदकं दद्यात्। पुनः

९. नवमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे पुरुषस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति पुरुषाय अक्षय्योदकं दद्यात्।

१०. ततः **अपसव्येन** दशमस्य प्रेतस्य अग्रे एकं पुटकं संस्थाप्य तस्मिन् तिलान् जलञ्च निक्षिप्य तत्पुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे प्रेतस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

पुनः **सव्येन** एकादशादारभ्य षोडशपर्यन्तानां विष्ण्वादितत्पुरुषान्तानामग्रे षट्पुटकानि संस्थाप्य तेषु जलं यवञ्च निक्षिप्य

११. एकादशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे विष्णोर्दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति विष्णवे अक्षय्योदकं दद्यात्। पुनः

१२. द्वादशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे ब्रह्मणो दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति ब्रह्मणे अक्षय्योदकं दद्यात्। पुनः

१३. त्रयोदशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे विष्णोर्दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति विष्णवे अक्षय्योदकं दद्यात्। पुनः

१४. चतुर्दशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे शिवस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति शिवाय अक्षय्योदकं दद्यात्। पुनः

१५. पञ्चदशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे यमस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति यमाय अक्षय्योदकं दद्यात्। पुनः

१६. षोडशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणमध्यमषोडशश्राद्धे तत्पुरुषस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति तत्पुरुषाय अक्षय्योदकं दद्यात्।

**॥ इति अक्षय्योदकदानम् ॥**

ततः **सव्येन** पञ्चदशपिण्डान्, **अपसव्येन** दशमस्थानीयमेकं पिण्डम् आघ्राय उत्थाप्य वेद्यां स्थापयित्वा, पिण्डाधारकुशान् वह्नौ क्षिपेत्। ततः **सव्येन** पञ्चदश देवार्घपात्राणि, **अपसव्येन** प्रेतार्घपात्रं सञ्चाल्य **सव्येन** दक्षिणां दद्यात्।

## दक्षिणादानम्

**सव्येन** हिरण्यादिदक्षिणाद्रव्यं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)मध्यमषोडशश्राद्धानां प्रतिष्ठार्थम् एतद्दक्षिणाद्रव्यं ब्राह्मणेभ्यः सम्प्रददे।**

इति दक्षिणां दत्वा पीताक्षतैः भगवन्तम्, विष्वक्सेनम्, अग्निम्, विष्ण्वादिदेवाँश्च सर्वान् विसर्जयेत् –

**यस्मादावाहिताश्चात्र तत्र सर्वे व्रजन्तु भोः।**

ततः क्षमाप्रार्थनां कुर्यात् -

**प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु च।**
**स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥**
**यस्य स्मृत्या च नामोक्त्या तपश्राद्धक्रियादिषु।**
**न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥**
**अतसीपुष्पसंकाशं पीतवाससमच्युतम्।**
**ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम्॥**
**ॐ अच्युताय नमः , ॐ अच्युताय नमः, ॐ अच्युताय नमः॥**

**॥ इति मध्यमषोडशश्राद्धविधिः॥**

## ❀ अथ उत्तमषोडशश्राद्धविधिः ❀

आचार्यादिसहितः कर्त्ता पञ्चगव्यप्राशनं कृत्वा श्राद्धभूमेः उत्तरे भगवद्वेदीम्, तस्याः दक्षिणे हवनवेदीम्, तस्याः दक्षिणे पूर्वपश्चिमायातां लम्बायमानाम् एकां पिण्डवेदीञ्च निर्मीयात्। पिण्डवेद्याः षोडशभागान् कृत्वा तेषु भागेषु षोडशकूर्चानि स्थापयेत्। पिण्डार्थं पायसं निर्माय भगवते निवेदयेत्। यदि कर्ता हवनाधिकारी नास्ति चेत् हवनवेदीनिर्माणं नावश्यकम्।

(स्थापनक्रमे संशयश्चेत् ४३० तमे पृष्टे चित्रावलिः द्रष्टव्या )

ततः पवित्रं धृत्वा कर्मपात्रं विधाय कर्मपात्रोदकेन स्वात्मानं श्राद्धभूमिं च परिषिच्य दिग्रक्षणं कुर्यात् -

दिग्-रक्षणम् -

वामहस्ते पीतसर्षपान् गृहीत्वा दक्षिणहस्तेन आच्छाद्य

**नमो नमस्ते गोविन्द पुराणपुरुषोत्तम।**
**इदं श्राद्धं हृषीकेश रक्ष त्वं सर्वतो दिशः॥**

इति पठित्वा दक्षिणहस्तेन सर्वासु दिक्षु प्रक्षिपेत् –

**प्राच्यै नमः** इति पूर्वे। **अवाच्यै नमः** इति दक्षिणे। **प्रतीच्यै नमः** इति पश्चिमे। **उदीच्यै नमः** इति उत्तरे। **अन्तरिक्षाय नमः** इति ऊर्ध्वे। **भूम्यै नमः** इति भूमौ।

ततः हस्ते तिलकुशादिकम् आदाय प्रतिज्ञासङ्कल्पं कुर्यात् –

**ॐ अद्य अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकनामाहं अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) भगवदपचारभागवतापचारा-सह्यापचारनिवृत्तिपूर्वकं भगवत्सायुज्यप्राप्तये भगवदाज्ञया भगवत्कैङ्कर्यरूपेण भगवदाराधनापूर्वकं (हवनपूर्वकञ्च) उत्तम-षोडशश्राद्धं करिष्ये।**

इति सङ्कल्प्य पूर्वस्यां दिशि प्रथमं दीपं प्रज्वाल्य सम्पूज्य प्रणमेत्।

ततः प्रथमायां वेद्यां स्थापिते कूर्चे सश्रीकं भगवन्तं नारायणं पीताक्षतैः आवाहयेत् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धे सश्रीकं नारायणम् आवाहयामि स्थापयामि पूजयामि।**

इति आवाह्य आसनार्घ्यपाद्य-आचमनस्नानवस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणा–प्रदक्षिणादीन् समर्प्य पूजयेत्। ततो होमवेद्यां पञ्च भूसंस्कारान् कुर्यात् –

**१. त्रिभिर्दर्भैः परिसमूह्य २. गोमयोदकेन उपलिप्य ३. श्रुवेण दर्भमूलेन वा दक्षिणोत्तरक्रमेण तिस्रो रेखा उल्लिख्य ४. अनामिकाङ्गुष्ठाभ्याम् उल्लेखनक्रमेण मृदम् उद्धृत्य ऐशान्यां क्षिपेत् ५. शुद्धजलेन सम्प्रोक्ष्य कुशैः आच्छादयेत्।**

ततो विष्णुनामानम् अग्निं प्रज्वाल्य षोडशसंस्कारान् (षोडशसंस्कारनाम पृ. ३३) कृत्वा आवाह्य पूजयेत् -

**ॐ विष्णुनामाग्नये नमः, विष्णुनामाग्निम् आवाहयामि स्थापयामि पूजयामि।** इत्यावाह्य सम्पूज्य पुष्पाञ्जलिमादाय प्रार्थयेत् -

**द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम्।**
**वरदं शक्तिपाणिञ्च विभ्राणं स्रुक्स्रुवौ तथा॥**
**स्वाहाञ्च दक्षिणे पार्श्वे वामे देवीं स्वधान्तथा।**
**रक्तमाल्याम्बरधरमेवमग्निं विचिन्तयेत्॥**

## पञ्चवारुणीहोमः

ततः श्रुवेण आज्यमादाय -

**ॐ प्रजापतये स्वाहा प्रजापतये इदं न मम इति नैर्ऋत्यादीशानान्तं जुहुयात्।**
**ॐ इन्द्राय स्वाहा इन्द्राय इदं न मम इति वायव्यादाग्नेयान्तं जुहुयात्।**
**ॐ अग्नये स्वाहा अग्नये इदं न मम इति अग्नेर्दक्षिणतो जुहुयात्।**
**ॐ सोमाय स्वाहा सोमाय इदं न मम इति अग्नेरुत्तरतो जुहुयात्।**
**ॐ भूः अग्नये स्वाहा अग्नये इदं न मम।**
**ॐ भुवः वायवे स्वाहा वायवे इदं न मम।**
**ॐ स्वः सूर्याय स्वाहा सूर्याय इदं न मम।**
**ॐ भूर्भुवःस्वः प्रजापतये स्वाहा प्रजापतये इदं न मम।**
**ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्याम् इदं न मम।**
**ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्याम् इदं न मम।**
**ॐ अग्नये स्वाहा अग्नये इदं न मम।**
**ॐ वरुणाय स्वाहा वरुणाय इदं न मम ।**
**ॐ सवित्रे स्वाहा सवित्रे इदं न मम।**
**ॐ विष्णवे स्वाहा विष्णवे इदं न मम**

**ॐ विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं न मम।**
**ॐ वरुणाय स्वाहा वरुणाय इदं न मम।**

ततः तिलैः आज्येन च नारायणवासुदेवविष्णुमन्त्रैः प्रत्येकम् अष्टोत्तरशताहुतीर्हुत्वा –

**ॐ अग्नये पूर्णाय स्वाहा अग्नये पूर्णाय न मम।**

इति पूर्णाहुतिं दद्यात्।

## आद्यमासिकश्राद्धम्

हवनादिकं समाप्य उत्तमषोडशीश्राद्धवेद्याः समीपे आगत्य तत्र स्थापितेषु षोडशकूर्चेषु मध्ये प्रथमे कूर्चे आद्यमासिकश्राद्धस्य सङ्कल्पं कुर्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) भगवदाज्ञया भगवत्कैङ्कर्यरूपेण करिष्यमाणोत्तमषोडशश्राद्धान्तर्गतम् आद्यमासिकश्राद्धं करिष्ये।**

ततः षोडशकूर्चेषु मध्ये प्रथमकूर्चे पीताक्षतैः नित्यानन्दासहितम् अनिरुद्धमावाहयेत् –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) भगवदाज्ञया करिष्यमाणोत्तम–षोडशश्राद्धान्तर्गत–आद्यमासिकश्राद्धे नित्यानन्दासहितम् अनिरुद्धम् आवाहयामि।**

इत्यावाह्य आसनं दद्यात्। हस्ते जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) भगवदाज्ञया करिष्यमाणोत्तम–षोडशश्राद्धान्तर्गते आद्यमासिकश्राद्धे नित्यानन्दासहित अनिरुद्ध इदम् आसनं ते नमः।**

इति कुशासनं दत्वा अर्घ्य-पाद्याचमन-स्नान-वस्त्रोपवीत-गन्ध-पुष्प-धूप-दीप-नैवेद्य-दक्षिणा-प्रदक्षिणा-नमस्कार-नीराजनादीनि समर्प्य कुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गते आद्य-मासिकश्राद्धे नित्यानन्दासहित अनिरुद्ध एतानि अर्घ्यपाद्याचमन-स्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यदक्षिणा-प्रदक्षिणानमस्कारनीराजनादीनि ते नमः।**

इति दद्यात्। ततो नीवीबन्धनं कुर्यात्।

नीवीबन्धनम् - **अपसव्येन** पत्रे पुटके वा तिलान् कुशत्रयञ्च संस्थाप्य निम्नमन्त्रं पठन् दक्षिणकट्यां धारयेत् -

**ॐ निहन्मि सर्वं यदमेध्यकृद् भवेत्, हताश्च सर्वेऽसुरदानवा मया। यक्षाश्च रक्षांसि पिशाचगुह्यका हता मया यातुधानाश्च सर्वे॥**
**ॐ सोमस्य नीविरसि विष्णोः शर्मासि शर्मयजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि।**

ततः पिण्डवेद्यां कुशानास्तीर्य पुष्पाणि निक्षिप्य **अपसव्येन** जीवात्मानम् आवाहयेत् -

**अद्य अमुकगोत्रम् अमुकनामानं दिवङ्गतम् (अमुकगोत्राम् अमुकनाम्नीं दिवङ्गताम्) आवाहयामि।**
**आवाहयाम्यहं देवं जीवं सर्वगतं विभुम्।**
**वेद्यामस्यामदृश्यत्वं प्रविशाद्य नमोऽस्तु ते॥**

इत्यावाह्य आसनं दद्यात्-

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अद्यामुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गते आद्यमासिकश्राद्धे इदम् आसनं ते मया दीयते तवोपतिष्ठताम्।**

## अथ हस्तार्घविधिः

ततो हस्तार्घार्थं वेद्या अग्रे पुटकं संस्थाप्य तत्र कुशपवित्रं निक्षिपेत् –

**ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥**

जलं निक्षिपेत् –

**ॐ शन्नो देवीरभीष्टयऽआपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः ॥**

तिलान् निक्षिपेत् –

**ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः ।**
**प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रीणाहि नः स्वाहा ॥**

पुष्पाणि निक्षिपेत् –

**ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुं मऽइषाण सर्व्वलोकं मऽइषाण ॥**

गन्धं निक्षिपेत् –

**ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।**

ततः हस्तार्घपात्रं वामहस्ते स्थापयित्वा दक्षिणहस्तेन हस्तार्घपात्रस्थपवित्रम् आदाय –

**ॐ नमो नारायणाय** इति मन्त्रेण सजलपवित्रम् अनिरुद्धव्यूहस्याग्रे वेद्यां निदध्यात्। ततः दक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य अभिमन्त्रयेत् –

**ॐ या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्षा उत पार्थवीर्याः । हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शꣳस्योनाः सुहवाभवन्तु॥**

इति अभिमन्त्र्य हस्ते जलकुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गगते) उत्तमषोडशश्राद्धान्तर्गते आद्यमासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनरर्घपात्रे निधाय अर्घपात्रम् अनिरुद्धव्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

ततो गन्धादिभिः दिवङ्गतं पूजयेत् –

पाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाप्रदक्षिणा-नमस्कारादीनि समर्प्य कुशादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गते आद्यमासिकश्राद्धे एतानि पाद्याचमनस्नानवस्त्रोपवीतगन्ध-पुष्पधूपदीपनैवेद्यताम्बूल-दक्षिणा-प्रदक्षिणानमस्कारादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्** । इति वेद्यामुत्सृजेत्।

## सिद्धान्नदानम्

ततः **सव्येन** आचम्य **अपसव्येन** जलेन चतुरस्रं मण्डलं विधाय सजलमन्नादिकं पुरतः संस्थाप्य कुशादिकमादाय–

**इदमन्नादिकम् एतद्भूस्वामिपितृभ्यो नमः** इति दद्यात्।

पुनः वेद्याः पुरतः चतुरस्रं मण्डलं विधाय, तस्मिन् मण्डले सजलम् अन्नादिकं निधाय –

**ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा।** इत्यालभ्य –

**ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधे पदं समूढमस्यपा ँ सुरे।**
**ॐ अपहता असुरा रक्षाँसि वेदिषदः।**

इति अन्नं परितः तिलान् विकीर्य कुशादिकमादाय –

**अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते आद्यमासिकश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।**

इति दत्वा **सव्येन** प्रार्थनां कुर्यात् –

**ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः।**
**ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ६ रजः। मधुद्यौरस्तु नः पिता।**
**ॐ मधुमान्नो व्वनस्पतिर्मधु माँ२ऽअस्तु सूर्य्यः।**
**माध्वीर्गावो भवन्तु नः॥ ॐ मधु मधु मधु।**

## पिण्डदानम्

ततः **अपसव्येन** पिण्डदानार्थं वेदीं निर्माय कुशपुष्पादीन् आस्तीर्य जलेन अभिषिञ्चेत्। ततः अवनेजनार्थम् एकस्मिन् पुटके जलं निक्षिप्य तत्पुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते आद्यमासिकश्राद्धे पिण्डस्थाने इदम् अवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां कुशोपरि अवनेजनं दत्वा पिण्डं दद्यात्। ततः जलतिलकुश-सहितं पिण्डमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते आद्यमासिकश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

इति कुशोपरि पिण्डं दत्वा प्रत्यवनेजनं दद्यात् -

पुटकस्थजलं हस्ते गृहीत्वा जलकुशादिकमादाय -

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते आद्यमासिकश्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

इति पिण्डोपरि प्रत्यवनेजनं दद्यात्। ततो नीवीं विस्रस्य **सव्येन** आचम्य **अपसव्येन** पिण्डोपरि सूत्रं समर्प्य गन्धादिभिः पिण्डं पूजयित्वा हस्ते जलकुशादिकमादाय -

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते)उत्तमषोडशश्राद्धान्तर्गते आद्यमासिकश्राद्धपिण्डे एतानि सूत्र-गन्ध-पुष्पाक्षत-धूप-दीप-नैवेद्यादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

इत्युत्सृजेत्। ततः अक्षय्योदकं दद्यात्।

## अक्षय्योदकदानम्

ततः एकस्मिन् पुटके जलं गृहीत्वा हस्ते जलकुशादिकमादाय-

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गते आद्यमासिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।**

इति अक्षय्योदकं दत्वा गोदुग्धेन स्नापयित्वा प्रणम्य **सव्येन** नम्रीभूय पिण्डमाघ्राय **अपसव्येन** उत्थापयेत्, छिन्नमूलकुशान् वह्नौ क्षिपेत्। ततः हस्तार्घपात्रं सञ्चाल्य **सव्येन** ब्राह्मणाय दक्षिणां दद्यात्।

## दक्षिणादानम्

दक्षिणाद्रव्यं अग्रे कृत्वा गन्धादिभिः सम्पूज्य हस्ते जलकुशादिकमादाय -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गताद्यमासिकश्राद्धप्रतिष्ठार्थमिमां द्रव्यदक्षिणां राष्ट्रमुद्रां विष्णुदैवतां अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततः **अपसव्येन 'भो जीवात्मन् स्वस्थानं व्रज'**

इति विसृज्य **सव्येन** आचम्य भगवन्तं प्रार्थयेत् -

**ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।**
**जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥**
**प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।**
**स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥**

**ॐ अच्युताय नमः, ॐ अच्युताय नमः, ॐ अच्युताय नमः**

॥ इति आद्यमासिकश्राद्धम् ॥

## आद्याब्दिकश्राद्धम्

आद्याब्दिकश्राद्धार्थे उपयुक्तं स्थानं संशोध्य उत्तरस्यां दिशि भगवद्वेदीम्, (कर्ता हवनाधिकारी अस्ति चेत् भगवद्वेद्याः दक्षिणे हवनवेदीम्, हवनवेद्याः पूर्वे दीपम्, ऐशान्ये विष्वक्सेनं च स्थापयेत्) ततः दक्षिणे पिण्डवेदीञ्च निर्मीयात्। आद्याब्दिकश्राद्धस्य कृते पृथगेव पूजनसामग्री निर्मातव्या। (स्थापनक्रमे संशयश्चेत् ४३१ तमे पृष्टे चित्रावलिः द्रष्टव्या।)

# अथ आद्याब्दिकश्राद्धप्रयोगः

कर्त्ता आचम्य कर्मपात्रं विधाय पवित्रधारणं कृत्वा कर्मपात्रोदकेन श्राद्धस्थलं द्रव्याणि च परिषिच्य दिग्रक्षणं कुर्यात् -

दिग्रक्षणम् - वामहस्ते पीतसर्षपान् गृहीत्वा दक्षिणहस्तेन आच्छाद्य -

**नमो नमस्ते गोविन्द पुराणपुरुषोत्तम।**
**इदं श्राद्धं हृषीकेश रक्ष त्वं सर्वतो दिशः॥**

इति पठित्वा दक्षिणहस्तेन सर्वासु दिक्षु प्रक्षिपेत् -

**प्राच्यै नमः** इति पूर्वे। **अवाच्यै नमः** इति दक्षिणे। **प्रतीच्यै नमः** इति पश्चिमे। **उदीच्यै नमः** इति उत्तरे। **अन्तरिक्षाय नमः** इति ऊर्ध्वे। **भूम्यै नमः** इति भूमौ।

ततो हस्ते तिलकुशादिकम् आदाय प्रतिज्ञासङ्कल्पं कुर्यात् -

**अद्य अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकनामाहम् अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) भगवदपचारभागवतापचारा-सह्यापचारनिवृत्तिपूर्वकं भगवत्सायुज्यप्राप्तये भगवदाज्ञया भगवत्-कैङ्कर्यरूपेण भगवदाराधनापूर्वकम्(हवनपूर्वकञ्च) आद्याब्दिकश्राद्धं करिष्ये।**

इति सङ्कल्प्य पूर्वस्यां दिशि दीपं प्रज्वाल्य सम्पूज्य प्रणमेत्।

ततः प्रथमायां वेद्यां स्थापिते कूर्चे सश्रीकं भगवन्तं नारायणं पीताक्षतैः आवाहयेत् -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) आद्याब्दिकश्राद्धे सश्रीकं नारायणम् आवाहयामि स्थापयामि पूजयामि।**

इति आवाह्य आसनार्घ्यपाद्य-आचमनस्नानवस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणा--प्रदक्षिणादीन् समर्प्य पूजयेत्।

ततो होमवेद्यां विष्णुनामानम् अग्निं प्रज्वाल्य षोडशसंस्कारान् (षोडशसंस्कारनाम पृ. ३३) कृत्वा आवाह्य पूजयेत् -

**ॐ विष्णुनामाग्नये नमः, विष्णुनामाग्निम् आवाहयामि स्थापयामि पूजयामि।**

इत्यावाह्य सम्पूज्य पुष्पाञ्जलिमादाय प्रार्थयेत् -

**द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम्।**
**वरदं शक्तिपाणिञ्च विभ्राणं स्रुक्श्रुवौ तथा॥**
**स्वाहाञ्च दक्षिणे पार्श्वे वामे देवीं स्वधान्तथा।**
**रक्तमाल्याम्बरधरमेवमग्निं विचिन्तयेत्॥**

## पञ्चवारुणीहोमः

ततः श्रुवेण आज्यमादाय -

**ॐ प्रजापतये स्वाहा प्रजापतये इदं न मम इति नैऋत्यादीशानान्तं जुहूयात्।**
**ॐ इन्द्राय स्वाहा इन्द्राय इदं न मम इति वायव्यादाग्नेयान्तं जुहुयात्।**
**ॐ अग्नये स्वाहा अग्नये इदं न मम इति अग्नेर्दक्षिणतो जुहुयात्।**
**ॐ सोमाय स्वाहा सोमाय इदं न मम इति अग्नेरुत्तरतो जुहुयात्।**
**ॐ भूः अग्नये स्वाहा अग्नये इदं न मम।**
**ॐ भुवः वायवे स्वाहा वायवे इदं न मम।**
**ॐ स्वः सूर्याय स्वाहा सूर्याय इदं न मम।**
**ॐ भूर्भुवःस्वः प्रजापतये स्वाहा प्रजापतये इदं न मम।**
**ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्याम् इदं न मम।**

**ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्याम् इदं न मम।**

**ॐ अग्नये स्वाहा अग्नये इदं न मम।**

**ॐ वरुणाय स्वाहा वरुणाय इदं न मम ।**

**ॐ सवित्रे स्वाहा सवित्रे इदं न मम।**

**ॐ विष्णवे स्वाहा विष्णवे इदं न मम।**

**ॐ विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं न मम।**

**ॐ वरुणाय स्वाहा वरुणाय इदं न मम।**

ततः तिलैः आज्येन च नारायणवासुदेवविष्णुमन्त्रैः प्रत्येकम् अष्टोत्तरशताहुतीर्हुत्वा –

**ॐ अग्नये पूर्णाय स्वाहा अग्नये पूर्णाय न मम।**

इति पूर्णाहुतिं दद्यात्।

ततः **अपसव्येन** नीवीबन्धनं कुर्यात्।

**नीवीबन्धनम्** – पत्रे पुटके वा तिलान् कुशत्रयञ्च संस्थाप्य निम्नमन्त्रं पठन् दक्षिणकट्यां धारयेत् –

**ॐ निहन्मि सर्वं यदमेध्यकृद् भवेत्, हताश्च सर्वेऽसुरदानवा मया।**
**यक्षाश्च रक्षांसि पिशाचगुह्यका हता मया यातुधानाश्च सर्वे॥**
**ॐ सोमस्य नीविरसि विष्णोः शर्मासि शर्मयजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि।**

ततः **अपसव्येन** तृतीयायां वेद्यां कूर्चे जीवात्मानम् आवाहयेत्, हस्ते जलकुशादिकमादाय –

**अद्य अमुकगोत्रम् अमुकनामानं दिवङ्गतम् (अमुकगोत्राम् अमुकनाम्नीं दिवङ्गताम्) आवाहयामि।**

इत्यावाह्य आसनं दद्यात्, हस्ते जलकुशादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) आद्याब्दिकश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठताम्।**

इति कुशासनं दत्वा हस्तार्घं दद्यात् –

## हस्तार्घविधिः

हस्तार्घार्थं वेद्या अग्रे पुटकं संस्थाप्य तत्र कुशपवित्रं निक्षिपेत् –

**ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥**

जलं निक्षिपेत् –

**ॐ शन्नो देवीरभीष्टयऽआपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः॥**

तिलान् निक्षिपेत् –

**ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः।**
**प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रीणाहि नः स्वाहा॥**

पुष्पाणि निक्षिपेत् –

**ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुं मऽइषाण सर्व्वलोकं मऽइषाण॥**

गन्धं निक्षिपेत् –

**ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।**

ततः हस्तार्घपात्रं वामहस्ते स्थापयित्वा दक्षिणहस्तेन हस्तार्घपात्रस्थं पवित्रमादाय –

**ॐ नमो नारायणाय** इति मन्त्रेण सजलपवित्रं वेद्यां निदध्यात्। ततः दक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य अभिमन्त्रयेत् –

**ॐ या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्षा उत पार्थवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शिवाःशँस्योनाः सुहवाभवन्तु॥**

इति अभिमन्त्र्य हस्ते जलकुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत(अमुकगोत्रे अमुकनाम्नि दिवङ्गते) आद्याब्दिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति विप्रकरे जलं दद्यात्। ततः तत्पवित्रं पुष्पञ्च पुनरर्घपात्रे निधाय अर्घपात्रं कूर्चस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

ततः पाद्याचमनगन्धादिभिः दिवङ्गतं पूजयित्वा जलकुशादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) आद्याब्दिकश्राद्धे पाद्याचमनस्नान-वस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यदक्षिणाप्रदक्षिणादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

## अन्नदानम्

ततः **अपसव्येन** जलेन चतुरस्रं मण्डलं विधाय सजलमन्नादिकं पुरतः संस्थाप्य कुशादिकमादाय –

**इदमन्नम् एतद्भूस्वामिपितृभ्यो नमः।**

इति दत्वा सोपस्करं सतिलमन्नं जीवात्मनः पुरतः संस्थाप्य –

**ॐ अपहता असुरा रक्षाꣳसि वेदिषदः ।** इति अन्नं परितः तिलान् विकीर्य कुशादिकमादाय –

**अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) आद्याब्दिकश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम् ।**

ततः **सव्येन** आचम्य प्रार्थयेत् –

**ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः ।**
**माध्वीर्नः सन्त्वोषधीः ।**
**ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳ रजः । मधुद्यौरस्तु नः पिता ।**
**ॐ मधुमान्नो व्वनस्पतिर्मधु माँ२ऽअस्तु सूर्य्यः । माध्वीर्गावो भवन्तु नः ॥ॐ मधु, ॐ मधु, ॐ मधु ॥**

## पिण्डदानम्

ततः **अपसव्येन** पिण्डदानार्थं कूर्चस्याग्रे वेदीं निर्माय कुशपुष्पादीन् आस्तीर्य जलेन अभिषिञ्चेत् । ततः अवनेजनार्थम् एकस्मिन् पुटके जलं निक्षिप्य तत्पुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते)आद्याब्दिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपष्ठिताम् ।**

इति वेद्यां कुशं स्थापयित्वा तदुपरि अवनेजनं दद्यात् ।

ततः कुशतिलजलसहितं पिण्डमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) आद्याब्दिकश्राद्धे एष पिण्डस्ते मया दीयते तवोपष्ठिताम्।**

इति कुशोपरि पिण्डं दत्वा प्रत्यवनेजनं दद्यात्। पुटकस्थजलं गृहीत्वा हस्ते जलतिलकुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) आद्याब्दिकश्राद्धपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपष्ठिताम्।**

इति पिण्डोपरि जलं दद्यात्। ततो नीवीं विस्रस्य सव्येन आचम्य अपसव्येन पिण्डे सूत्रं समर्प्य गन्धादिभिः पिण्डं पूजयित्वा हस्ते जलकुशादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) आद्याब्दिकश्राद्धपिण्डे एतानि सूत्र-गन्ध-पुष्पाक्षत-धूप-दीपनैवेद्यादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

इत्युत्सृजेत्। ततः अक्षय्योदकं दद्यात्।

## अक्षय्योदकदानम्

ततः पुटके जलं निक्षिप्य पुटकं गृहीत्वा हस्ते जलकुशादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) आद्याब्दिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।**

इति अक्षय्योदकं दत्वा गोदुग्धेन पिण्डं स्नापयित्वा **सव्येन** नम्रीभूय पिण्डमाघ्राय **अपसव्येन** उत्थापयेत्, छिन्नमूलकुशान् वह्नौ क्षिपेत्। ततः हस्तार्घपात्रं सञ्चाल्य **सव्येन** ब्राह्मणाय दक्षिणां दद्यात्।

## दक्षिणादानम्

दक्षिणाद्रव्यमग्रे कृत्वा गन्धादिभिः सम्पूज्य हस्ते जलकुशादिकमादाय -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) आद्याब्दिकश्राद्धप्रतिष्ठार्थम् इमां द्रव्यदक्षिणां राष्ट्रमुद्रां विष्णुदैवताम् अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

ततः **अपसव्येन 'भो जीवात्मन् स्वस्थानं व्रज'।**

इति जीवात्मानं विसृज्य **सव्येन** आचम्य पुष्पाक्षतैः भगवन्तम्, अग्निञ्च विसृज्य प्रार्थयेत् -

**ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।**
**जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥**
**प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।**
**स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥**
**ॐ अच्युताय नमः, ॐ अच्युताय नमः, ॐ अच्युताय नमः**

॥ इति आद्याब्दिकश्राद्धविधिः॥

# अथ सान्नोदकघटदानविधिः

(षष्ट्युत्तरशतत्रय(३६०)घटदानम्, वर्षाभ्यन्तरे पुरुषोत्तममासश्चेत् नवत्युत्तरशतत्रय(३९०)घटदानम्)

अथ वृक्षमूलादौ गत्वा भूमौ विस्तृतं चतुरस्रं मण्डलं कृत्वा मध्ये धान्योपरि घटं संस्थाप्य घटोपरि तण्डुलपूर्णपात्रे कूर्चन्निक्षिप्य घटस्य परितः जलपूर्णान् षष्ट्युत्तरशतत्रयघटान् सापमार्गान् स्थापयेत् । ततः आचम्य कर्मपात्रं विधाय पवित्रधारणं कृत्वा हस्ते कुशादिकमादाय प्रतिज्ञासङ्कल्पं कुर्यात् -

**अद्येत्यादि देशकालौ सङ्कीर्त्य (अमुक)गोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) स्नानपानादिना पिपासादिशान्तये अद्य एकादशदिवसे सान्नोदकषष्ट्युत्तरशतत्रयघटदानमहं करिष्ये।** (पुरुषोत्तममासश्चेत् **- सान्नोदकनवत्युत्तरशतत्रयघटदानमहं करिष्ये ॥**)

ततो दीपं प्रज्वाल्य गन्धादिभिः सम्पूज्य **अपसव्येन** कुशकूर्चे पीताक्षतैः जीवात्मानम् आवाहयेत् -

**भो अमुकगोत्र (अमुकगोत्रे) अमुकनामजीवात्मन् अत्रागच्छ, इह स्थित्वा उपचारान् स्वीकुरु।**

**आवाहयाम्यहं देवं जीवं सर्वगतं विभुम्।**<br>
**प्रविशादृश्यरूपेण दर्भकूर्चेऽर्चयाम्यहम् ॥**

तत आसनं दद्यात्। हस्ते जलकुशादिकमादाय -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) सान्नोदकषष्ट्युत्तरशतत्रयघटदाने इदमासनं ते मया दीयते तवोपतिष्ठताम्।**

इत्यासनं दत्वा गन्धादिभिः जीवात्मानं सम्पूज्य कुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) सान्नोदकषष्ट्युत्तरशतत्रयघटदाने एतानि अर्घ्य-पाद्य-आचमन-स्नान-वस्त्रोपवीत-गन्ध-पुष्प-धूप-दीप-नैवेद्यादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

इति दत्वा परितः स्थापितेषु षष्ट्युत्तरशतत्रयघटेषु सुगन्धिद्रव्ययुतमधुरजलं पूरयित्वा तत्समीपे अन्नादिकं स्थापयित्वा कुशादिकमादाय –

**अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) स्नानपानादिना पिपासादिशान्तये सान्नोदका एते षष्ट्युत्तरशतत्रयघटास्ते मया दीयन्ते तवोपतिष्ठन्ताम्।** (पुरुषोत्तममासश्चेत् – **नवत्युत्तरशतत्रयघटास्ते मया दीयन्ते तवोपतिष्ठन्ताम्।**)

इत्युत्सृजेत्। ततः **सव्येन** दक्षिणां दद्यात्।

दक्षिणाद्रव्यमग्रे कृत्वा गन्धादिभिः सम्पूज्य हस्ते जलकुशादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) सान्नोदकषष्ट्युत्तरशतत्रयघटदान-(नवत्युत्तरशतत्रयघटदान) प्रतिष्ठार्थमिमां द्रव्यदक्षिणां राष्ट्रमुद्रां विष्णुदैवताम् अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

इति दक्षिणां दत्वा नमस्कारान् कृत्वा **अपसव्येन** पीताक्षतैः जीवात्मानं विसर्जयेत् –

**भो जीवात्मन् स्वस्थानं व्रज।**

ततः **सव्यं** विधाय आचम्य कार्यान्तरं कुर्यात्।

**॥ इति सान्नोदकघटदानविधिः॥**

# ऊनमासिकादिपञ्चदशमासिकश्राद्धविधिः

पुनः पूर्वं स्थापितलम्बायमानायाः वेद्याः अग्रे उपविश्य सव्येन आचम्य उत्तमषोडशश्राद्धान्तर्गत-ऊनादिपञ्चदशमासिकश्राद्धानां सङ्कल्पं कुर्यात् -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) भगवदाज्ञया भगवत्कैङ्कर्यरूपेण करिष्यमाणोत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिकतृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशम-एकादश-द्वादश-ऊनाब्दिकमासिकश्राद्धानि प्रद्युम्नादि-व्यूहाराधनपूर्वकम् अपकृष्य एकतन्त्रेण करिष्ये।**

ततः षोडशकूर्चेषु मध्ये द्वितीयकूर्चादारभ्य षोडशकूर्चपर्यन्तान् पीताक्षतैः सत्यादिसहितान् प्रद्युम्नादिव्यूहान् आवाहयेत् -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) भगवदाज्ञया भगवत्कैङ्कर्यरूपेण करिष्यमाणोत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशमैकादश-द्वादश-ऊनाब्दिकमासिकश्राद्धेषु सत्यासहितं प्रद्युम्नम्, हिरण्यासहितं सङ्कर्षणम्, त्रयीसहितम् अधोक्षजम्, श्रीसहितं केशवम्, लक्ष्मीसहितं नारायणम्, कमलासहितं माधवम्, पद्मासहितं गोविन्दम्, पद्मिनीसहितं विष्णुम्, कमलालयासहितं मधुसूदनम्, रमासहितं त्रिविक्रमम्, वृषाकपीसहितं वामनम्, धन्यासहितं श्रीधरम्, पृथ्वीसहितं हृषीकेशम्, यज्ञासहितं पद्मनाभम्, इन्दिरासहितं दामोदरम् आवाहयामि।**

इत्यावाह्य क्रमेण सर्वेभ्यः आसनानि दद्यात्, हस्ते जलकुशादीन्यादाय -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) भगवदाज्ञया भगवत्कैङ्कर्यरूपेण करिष्यमाणोत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशम-एकादश-द्वादश-ऊनाब्दिकमासिकश्राद्धेषु सत्यासहित प्रद्युम्न, हिरण्यासहित सङ्कर्षण, त्रयीसहित अधोक्षज, श्रीसहित केशव, लक्ष्मीसहित नारायण, कमलासहित माधव, पद्मासहित गोविन्द, पद्मिनीसहित विष्णो, कमलालयासहित मधुसूदन, रमासहित त्रिविक्रम, वृषाकपीसहित वामन, धन्यासहित श्रीधर, पृथ्वीसहित हृषीकेश, यज्ञासहित पद्मनाभ, इन्दिरासहित दामोदर इमानि आसनानि वो नमः ।**

एवं सर्वेभ्यः क्रमशः अर्घ्य-पाद्य-आचमन-स्नान-वस्त्रोपवीत-गन्ध-पुष्प-धूप-दीप-नैवेद्य-दक्षिणा-प्रदक्षिणा-नमस्कार-नीराजनादीनि समर्प्य कुशादिकमादाय -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) भगवदाज्ञया भगवत्कैङ्कर्यरूपेण करिष्यमाणोत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशमैकादश-द्वादश-ऊनाब्दिक-श्राद्धेषु सत्यासहित प्रद्युम्न, हिरण्यासहित सङ्कर्षण, त्रयीसहित अधोक्षज, श्रीसहित केशव, लक्ष्मीसहित नारायण, कमलासहित माधव, पद्मासहित गोविन्द, पद्मिनीसहित विष्णो, कमलालयासहित मधुसूदन, रमासहित त्रिविक्रम, वृषाकपीसहित वामन, धन्यासहित श्रीधर, पृथ्वीसहित**

**हृषीकेश, यज्ञासहित पद्मनाभ, इन्दिरासहित दामोदर एतानि अर्घ्य-पाद्य-आचमन-स्नान-वस्त्रोपवीत-गन्ध-पुष्प-धूप-दीप-नैवेद्यदक्षिणा-प्रदक्षिणानमस्कारनीराजनादीनि वो नमः ।**
इति दद्यात् ।

इति पञ्चदशव्यूहान् पूजयित्वा **अपसव्येन** नीवीबन्धनं कुर्यात् -

**नीवीबन्धनम्** - पत्रे पुटके वा तिलान् कुशत्रयञ्च संस्थाप्य निम्नमन्त्रं पठन् दक्षिणकट्यां धारयेत् -

**ॐ निहन्मि सर्वं यदमेध्यकृद् भवेत्, हताश्च सर्वेऽसुरदानवा मया।**
**यक्षाश्च रक्षांसि पिशाचगुह्यका हता मया यातुधानाश्च सर्वे ॥**
**ॐ सोमस्य नीविरसि विष्णोः शर्मासि शर्मयजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि ।**

इति नीवीबन्धनं कृत्वा पिण्डवेद्यां कुशानास्तीर्य पुष्पाणि निक्षिप्य जीवात्मानम् आवाहयेत् -

**अद्य अमुकगोत्रम् अमुकनामानं दिवङ्गतम् (अमुकगोत्राम् अमुकनाम्नीं दिवङ्गताम्) आवाहयामि ।**
**आवाहयाम्यहं देवं जीवं सर्वगतं विभुम् ।**
**वेद्यामस्यामदृश्यत्वं प्रविशाद्य नमोऽस्तु ते ॥**

इत्यावाह्य पञ्चदश आसनानि दद्यात् । ततो हस्ते जलकुशादीन्यादाय -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणोत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशम-एकादश-द्वादश-ऊनाब्दिकमासिकश्राद्धेषु इमानि आसनानि ते मया दीयन्ते तवोपतिष्ठन्ताम् ।**

इति वेद्यां सर्वेषां व्यूहानामग्रे एकैकमासनं दत्वा हस्तार्घं दद्यात् ।

## हस्तार्घविधिः

ततोऽ**पसव्येन** हस्तार्घार्थं वेद्यां व्यूहानामग्रे क्रमेण पञ्चदश (१५) पुटकानि संस्थाप्य तेषु कुशपवित्रं निक्षिपेत् –

**ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥**

जलं निक्षिपेत् –

**ॐ शन्नो देवीरभीष्टयऽआपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥**

तिलान् निक्षिपेत् –

**ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः । प्रत्नमद्भिः पृक्तः स्वधया पितृँल्लोकान् प्रीणाहि नः स्वाहा ॥**

पुष्पाणि निक्षिपेत् –

**ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं मऽइषाण सर्व्वलोकं मऽइषाण ॥**

गन्धं निक्षिपेत् –

**ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।**

२. ततः प्रथमं हस्तार्घपात्रं वामहस्ते स्थापयित्वा दक्षिणहस्तेन हस्तार्घपात्रस्थपवित्रमादाय

**ॐ नमो नारायणाय** इति मन्त्रेण सजलपवित्रं प्रद्युम्नस्याग्रे वेद्यां निदध्यात् । ततः दक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य अभिमन्त्रयेत् –

**ॐ या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्षा उत पार्थवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शिवाःशꣳस्योनाः सुहवाभवन्तु॥**

इति अभिमन्त्र्य हस्ते जलकुशादिकमादाय[1] –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते ऊनमासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनरर्घपात्रे निधाय अर्घपात्रं प्रद्युम्नव्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

(एवमेव क्रमशः द्वितीयादि अर्घपात्रं गृहीत्वा पूर्ववत् अभिमन्त्र्य सर्वेषामग्रे हस्तार्घं दद्यात्। हस्तार्घवाक्ये विशेषः –

**३. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते)उत्तमषोडशश्राद्धान्तर्गते द्वितीयमासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

---

१ एकतन्त्रेण हस्तार्घविधिः – अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) करिष्यमाणोत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशम-एकादश-द्वादश-ऊनाब्दिकमासिक-श्राद्धेषु एते हस्तार्घास्ते मया दीयन्ते तवोपतिष्ठन्ताम्।

**४. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते त्रैपाक्षिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

**५. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते तृतीयमासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

**६. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते चतुर्थमासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

**७. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते पञ्चममासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

**८. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते षाण्मासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

**९. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते ऊनषाण्मासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

**१०. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गतसप्तममासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

**११. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते अष्टममासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

**१२. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते नवममासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

**१३. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते दशममासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

**१४. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते एकादशमासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

**१५. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते द्वादशमासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

**१६. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते ऊनाब्दिकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति वेद्यां जलं दद्यात्। ततः तत्पवित्रं पुष्पं च पुनः तदर्घपात्रे निधाय अर्घपात्रं तद्व्यूहस्य वामपार्श्वे उत्तानमेव स्थापयेत्, तदुपरि कुशान् दद्यात्। तदर्घपात्रं दक्षिणादानपर्यन्तं न चालयेत्।

ततः तत्तद्व्यूहानामग्रे पाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्य-दक्षिणा-प्रदक्षिणा-नमस्कार-नीराजनादीनि समर्प्य कुशादिकमादाय -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणोत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशम-एकादश-द्वादश-ऊनाब्दिकमासिकश्राद्धेषु एतानि पाद्याचमन-स्नान-वस्त्रोपवीत-गन्ध-पुष्प-धूप-दीपनैवेद्य-दक्षिणा-प्रदक्षिणा-नमस्कार-नीराजनादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

इति वेद्यामुत्सृजेत्।

## अन्नदानम्

ततः **अपसव्येन** जलेन चतुरस्रं मण्डलं विधाय सजलम् अन्नादिकं वेद्याः पुरतो निधाय हस्ते जलकुशादिकमादाय -

**इदमन्नादिकम् एतद्भूस्वामिपितृभ्यो नमः** इति दत्वा पुनः वेद्याः पुरतः मण्डले पञ्चदशभागानि सजलान्यन्नादीनि निधाय -

**ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृते ऽअमृतं जुहोमि स्वाहा।** इत्यालभ्य

**ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधे पदं समूढमस्यपा ँ सुरे। ॐ अपहता असुरा रक्षाँसि वेदिषदः।**

इति अन्नं परितः तिलान् विकीर्य कुशादिकमादाय पञ्चदशान्नभागेषु[२] प्रथमे

**२. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते ऊनमासिक-श्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।**

एवं क्रमेण द्वितीयादिपञ्चदशपर्यन्तं पृथक् पृथक् सङ्कल्प्य दद्यात्।

**३. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते द्वितीय-मासिकश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।**

**४. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते त्रैपाक्षिकश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।**

**५. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते तृतीयमासिक-श्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।**

---

२ एकतन्त्रेण अन्नदानसङ्कल्पः – अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणोत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशम-एकादश-द्वादश-ऊनाब्दिकमासिकश्राद्धेषु इमानि अन्नानि सोपस्कराणि सजलानि ते मया दीयन्ते तवोपतिष्ठन्ताम्।

६. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते चतुर्थमासिक-श्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।

७. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते पञ्चममासिकश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।

८. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते षाण्मासिकश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।

९. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते ऊनषाण्मासिकश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।

१०. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते सप्तममासिकश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।

११. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते अष्टम-मासिकश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।

१२. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते नवममासिक-श्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।

१३. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते दशममासिक-श्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।

१४. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते एकादश-मासिकश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।

१५. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते द्वादशमासिक-श्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।

१६. अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै) उत्तमषोडशश्राद्धान्तर्गते ऊनाब्दिकश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।

इति अन्नदानं कृत्वा **सव्येन** प्रार्थनां कुर्यात् –

ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नःसन्त्वोषधीः।
म ॐ धुनक्तमुतोषसो मधुमत्पार्थिव ६ रजः। मधुद्यौरस्तु नः पिता।
ॐ मधुमान्नो व्वनस्पतिर्मधु माँ२ऽअस्तु सूर्य्यः।
माध्वीर्गावो भवन्तु नः ॥ॐ मधु मधु मधु।

॥ इति अन्नदानम् ॥

# पिण्डदानम्

ततो वेद्यां पिण्डदानाय पुष्पपत्रादीनि स्थापयित्वा कुशान् आस्तीर्य जलेन अभिषिच्य अवनेजनं दद्यात्।

अवनेजनार्थं व्यूहानाम् अग्रे पञ्चदश पुटकानि स्थापयित्वा तेषु जलकुशतिलान् निक्षिप्य प्रथमं पुटकं गृहीत्वा जलकुशादिकमादाय[३] –

**२. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते ऊनमासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

इति किञ्चिज्जलं प्रद्युम्नव्यूहस्याग्रे वेद्यां कुशोपरि दत्वा तत्पुटकं तत्रैव समीपे स्थापयेत्। एवमेव क्रमेण द्वितीयादि पुटकं गृहीत्वा सङ्कल्प्य अवनेजनं दद्यात्। सङ्कल्पवाक्ये विशेषः –

**३. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते द्वितीयमासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**४. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते त्रैपाक्षिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

---

३ एकतन्त्रेण अवनेजनसङ्कल्पवाक्यम् – अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशम-एकादश-द्वादश-ऊनाब्दिकमासिकश्राद्धेषु इमानि अवनेजनानि ते मया दीयन्ते तवोपतिष्ठन्ताम्।

५. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते तृतीयमासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।

६. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते चतुर्थमासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।

७. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते पञ्चममासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।

८. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते षाण्मासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।

९. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते ऊनषाण्मासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।

१०. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते सप्तममासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।

११. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते अष्टममासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।

१२. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते नवममासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।

१३. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते दशममासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।

१४. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते एकादशमासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।

१५. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते द्वादशमासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।

१६. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते ऊनाब्दिककश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।

इति पञ्चदशस्थानेषु जलं दत्वा पुनः प्रथमादारभ्य पिण्डदानं कुर्यात्।

जलतिलकुशसहितं प्रथमं पिण्डमादाय –

**२. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते ऊनमासिकश्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

इति प्रद्युम्नव्यूहस्याग्रे कुशोपरि प्रथमं पिण्डं दद्यात्। एवमेव क्रमेण द्वितीयादिपञ्चदशपिण्डा अपि तत्तत्स्थाने देयाः। सङ्कल्पवाक्ये विशेषः –

**३. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते द्वितीय-मासिकश्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

**४. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते त्रैपाक्षिकश्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

**५. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते तृतीयमासिक-श्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

**६. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते चतुर्थमासिक-श्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

**७. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते पञ्चममासिक-श्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

८. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते षाण्मासिकश्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।

९. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते ऊनषाण्मासिकश्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।

१०. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते सप्तममासिकश्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।

११. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते अष्टममासिकश्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।

१२. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते नवममासिकश्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।

१३. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते दशममासिकश्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।

१४. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते एकादशमासिकश्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।

१५. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते द्वादशमासिकश्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।

**१६. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते ऊनाब्दिक-मासिकश्राद्धे एषः पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

इति पञ्चदश पिण्डान् दत्वा पुनः पूर्वस्थापितावनेजनपुटकानि क्रमेण हस्ते आदाय प्रत्यवनेजनं दद्यात्।

प्रथमं पुटकं हस्ते गृहीत्वा जलकुशादिकमादाय[४] -

**२. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते ऊनमासिक-श्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

इति प्रथमपिण्डोपरि जलं दद्यात्। एवं क्रमेण द्वितीयादि पुटकं गृहीत्वा सर्वेषु पिण्डेषु प्रत्ववनेजनानि दद्यात्। सङ्कल्पवाक्ये विशेषः -

**३. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते द्वितीयमासिक-श्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**४. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते त्रैपाक्षिकश्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**५. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते तृतीयमासिकश्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

---

४. एकतन्त्रेण प्रत्यवनेजनसङ्कल्पवाक्यम् - अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणोत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशम-एकादश-द्वादश-ऊनाब्दिकमासिकश्राद्धेषु इमानि पिण्डप्रत्यवनेजनानि ते मया दीयन्ते तवोपतिष्ठन्ताम्।

६. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते चतुर्थमासिक-श्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।

७. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते पञ्चममासिक-श्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।

८. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते षाण्मासिक-श्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।

९. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते ऊनषाण्मासिक-श्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।

१०. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते सप्तममासिक-श्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।

११. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते अष्टममासिक-श्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।

१२. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते नवममासिक-श्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।

**१३. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते दशममासिक-श्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**१४. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते एकादशमासिक-श्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**१५. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते द्वादशमासिक-श्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**१६. अद्य अमुकगोत्र अमुकनामन् दिवङ्गत (अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते) उत्तमषोडशश्राद्धान्तर्गते ऊनाब्दिकश्राद्धे इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

इति सर्वेषु पिण्डेषु प्रत्यवनेजनानि दत्वा नीवीं विस्रस्य सव्येन आचम्य अपसव्येन पिण्डेषु सूत्राणि समर्प्य गन्धादिभिः पिण्डान् पूजयित्वा हस्ते जलकुशादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशम-एकादश-द्वादश-ऊनाब्दिक-मासिकश्राद्धपिण्डेषु एतानि सूत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

इत्युत्सृजेत्। ततः अक्षय्योदकं दद्यात्।

## अक्षय्योदकदानम्

ततः पञ्चदशपुटकेषु जलं निक्षिप्य प्रथमं पुटकं गृहीत्वा हस्ते जलकुशादिकमादाय[५] –

**२. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गते ऊनमासिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।**

इति अक्षय्योदकं दत्वा पुनः क्रमेण द्वितीयादिपञ्चदशपुटकानि पृथक् पृथक् गृहीत्वा सङ्कल्प्य अक्षय्योदकं दद्यात्। सङ्कल्प्यवाक्ये विशेषः –

**३. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गते द्वितीय-मासिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।**

**४. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गत-त्रैपाक्षिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।**

**५. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गते तृतीय-मासिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।**

**६. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गते चतुर्थ-मासिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।**

---

५ एकतन्त्रेण अक्षय्योदकदानविधिः – अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) क्रियमाणोत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशम-एकादश-द्वादश-ऊनाब्दिकमासिक-श्राद्धेषु दत्तैतानि अन्नपानादिकान्युपतिष्ठन्ताम्।

७. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गते पञ्चम-मासिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।

८. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गते षाण्मासिक-श्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।

९. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गते ऊनषाण्मासिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।

१०.अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)उत्तमषोडशश्राद्धान्तर्गते सप्तममासिक-श्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।

११.अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य(अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडशश्राद्धान्तर्गते अष्टममासिक-श्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।

१२. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडश-श्राद्धान्तर्गते नवममासिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।

१३. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडश-श्राद्धान्तर्गते दशममासिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।

**१४. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडश-श्राद्धान्तर्गते एकादशमासिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।**

**१५. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) उत्तमषोडश-श्राद्धान्तर्गते द्वादशमासिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।**

**१६. अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)उत्तमषोडश-श्राद्धान्तर्गते ऊनाब्दिकश्राद्धे दत्तैतदन्नपानादिकम् उपतिष्ठताम्।**

इति सर्वेभ्यः अक्षय्योदकं दत्वा, गोदुग्धेन पिण्डान् स्नापयित्वा, प्रणम्य, **सव्येन** नम्रीभूय पिण्डानाघ्राय, **अपसव्येन** उत्थापयेत्, छिन्नमूलकुशान् वह्नौ क्षिपेत्। ततः हस्तार्घपात्राणि सञ्चाल्य **सव्येन** ब्राह्मणाय दक्षिणां दद्यात्।

## दक्षिणादानम्

दक्षिणाद्रव्यमग्रे कृत्वा गन्धादिभिः सम्पूज्य हस्ते जलकुशादिकमादाय -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)उत्तमषोडशश्राद्धान्तर्गत-ऊन-द्वितीय-त्रैपाक्षिक-तृतीय-चतुर्थ-पञ्चम-षाड्-ऊनषाड्-सप्तम-अष्टम-नवम-दशम-एकादश-द्वादश-ऊनाब्दिक-मासिकश्राद्धप्रतिष्ठार्थमिमां द्रव्यदक्षिणां राष्ट्रमुद्रां विष्णुदैवताम् अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

इति दक्षिणां दत्वा **अपसव्येन**

**'भो जीवात्मन् स्वस्थानं व्रज**

इति जीवात्मानं विसृज्य **सव्येन** आचम्य पुष्पाक्षतैः भगवन्तम्, अनिरुद्धादिषोडशव्यूहान्, अग्निञ्च विसृज्य प्रार्थयेत् –

**ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।**
**जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥**
**प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।**
**स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥**

**ॐ अच्युताय नमः, ॐ अच्युताय नमः, ॐ अच्युताय नमः**

ततः पञ्चगव्यं प्राश्य शुद्धपाकादिकं निर्माय भगवते निवेद्य स्वयं भुञ्जीत॥

## (पुरुषोत्तममासिकश्राद्धे विशेषः)

**मृतस्य वर्षाभ्यन्तरे पुरुषोत्तममासश्चेत् उत्तमषोडशश्राद्धे सप्तदश व्यूहाः स्थापनीयाः, सप्तदश सिद्धान्नानि देयानि, सप्तदश पिण्डाः देयाः। मासिकेषु यन्मासानन्तरं पुरुषोत्तममासो भवति तत्रैव व्यूहाराधना, सिद्धान्नदानम्, पिण्डदानादिकञ्च कर्तव्यम्। सङ्कल्पवाक्ये पुरुषोत्तममासिकश्राद्ध इति पदं योजनीयम्। व्यूहाराधनायाम् नन्दासहितं पुरुषोत्तमम् आवाहयामि इति योजनीयम्। एवमेव सिद्धान्नदाने, अवनेजनदाने, पिण्डदाने, प्रत्यवनेजनदाने, अक्षय्योदकदाने च पुरुषोत्तममासिकश्राद्धे इति पदविशेषं प्रयुज्य कार्यं कर्तव्यम्।**

**॥ इति उत्तमषोडशश्राद्धविधिः॥**

॥ इति एकादशाहकृत्यानि॥

# ❀ द्वादशाहकृत्यानि ❀

अथ द्वादशाहे सपिण्डीकरणश्राद्धं कुर्यात् । प्रातरेव कर्त्ता स्नानादिनित्यकर्म विधाय नूतनयज्ञोपवीतधारणं कृत्वा पञ्चगव्यं प्राश्य यागोचितां शुद्धभूमिमुपलिप्य भूमेः उत्तरस्यां दिशि भगवद्वेदीम्, ततः दक्षिणे हस्तमितां चतुरस्रां होमवेदीं निर्माय होमवेद्याः दक्षिणे वासुदेवसङ्कर्षणप्रद्युम्ननाम्नां व्यूहानां कृते पूर्वपश्चिमायाताम् एकां लम्बायमानां वेदीम्, तस्याः पश्चिमे अनिरुद्धनाम्नो व्यूहस्य कृते पृथक् एकां वेदीम्, तस्याः पश्चिमे विश्वेदेवानां कृते पृथक् एकां वेदीम् इति तिस्रः वेदीः कुर्यात् । तासु रङ्गवल्यादिकं विधाय प्रथमवेद्याम् उत्तराभिमुखानि त्रीणि कूर्चानि, द्वितीयायां वेद्याम् उत्तराभिमुखम् एकं कूर्चम्, तृतीयायां वेद्याम् पूर्वाभिमुखम् एकं कूर्चं स्थापयेत् ।

(स्थापनक्रमे संशयश्चेत् ४३३ तमे पृष्टे चित्रावलिः द्रष्टव्या)

## अथ सपिण्डीकरणश्राद्धविधिः

कर्त्ता आचम्य प्राणानायम्य कर्मपात्रं विधाय कर्मपात्रोदकेन श्राद्धभूमिं परिषिच्य पीतसर्षपैः दिग्रक्षणं कुर्यात् –

वामहस्ते पीतसर्षपान् गृहीत्वा दक्षिणहस्तेन आच्छाद्य –

**नमो नमस्ते गोविन्द पुराणपुरुषोत्तम ।**
**इदं श्राद्धं हृषीकेश रक्ष त्वं सर्वतो दिशः ॥**

इति पठित्वा दक्षिणहस्तेन सर्वासु दिक्षु प्रक्षिपेत् –

**प्राच्यै नमः** इति पूर्वे । **अवाच्यै नमः** इति दक्षिणे । **प्रतीच्यै नमः** इति पश्चिमे । **उदीच्यै नमः** इति उत्तरे । **अन्तरिक्षाय नमः** इति ऊर्ध्वे । **भूम्यै नमः** इति भूमौ ।

ततो हस्ते जलाक्षतान्यादाय प्रतिज्ञासङ्कल्पं कुर्यात् -

**हरिः ॐ तत्सत्, हरिः ॐ तत्सत्, हरिः ॐ तत्सत् ॐ विष्णुः, ॐ विष्णुः, ॐ विष्णुः अद्य श्रीमद्भगवतो महापुरुषस्य श्रीभूनीलानायकस्य सौशील्यादिसकलकल्याण-गुणगणसमलङ्कृतस्य श्रीमन्नारायणस्य नाभिकमलोद्भवस्य भगवदाज्ञया सकलजगत्सृष्टिं कुर्वतः अखिललोकपितामहस्य परार्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे दिनस्य द्वितीययामे तृतीये मुहूर्ते, अष्टमे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे, अष्टाविंशतितमे सत्यत्रेताद्वापरान्ते कलियुगे कलिप्रथमचरणे श्रीमन्नृपतिविक्रमार्कराज्यात् वर्तमाने अमुकतमे वर्षे, श्रीमद्रामानुजमुनिप्रादुर्भावाद् वर्तमाने अमुकतमे वर्षे, अमुकसंवत्सरे, अमुक-अयने, अमुक-ऋतौ, अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकनक्षत्रे, अमुकयोगे अमुककरणे अमुकराशिस्थिते श्रीसूर्ये, अमुकराशिस्थिते चन्द्रे, अमुकराशिस्थिते देवगुरौ, शेषेषु ग्रहेषु यथा यथास्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्टायां शुभपुण्यतिथौ अस्मिन् भूर्लोके जम्बुद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गते नेपालदेशे अमुकक्षेत्रे अमुकमण्डलान्तर्गते अमुकनगरे/अमुकग्रामे श्रीलक्ष्मीनारायणभगवतः सन्निधौ वर्तमानः, शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनीयशाखाध्यायी अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माऽहं (वर्माऽहं/गुप्तोऽहम्) अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः)**

**अकृत्यकरणकृत्याकरणभगवदपचारभागवतापचारासह्याप-चारनिवृत्तिपूर्वकं भगवत्सायुज्यप्राप्तये भगवदाज्ञया भगवत्कैङ्कर्यत्वेन भगवत्पूजन-हवन-व्यूहाराधनापूर्वकं सपिण्डीकरणश्राद्धं करिष्ये।**

ततः हवनवेद्याः पूर्वस्यां दिशि दीपं प्रज्वाल्य सम्पूज्य सम्प्रार्थ्य पत्रपुटकादौ स्थापिततण्डुलपुञ्जे कुशकुर्चे सूत्रवतीसहितं विष्वक्सेनं पूजयेत्।

## अथ विष्वक्सेनपूजनम्

तत्रादौ पीताक्षतैः विष्वक्सेनमावाहयेत् -

**ॐ विश्वकर्मन्हविषावावृधानः स्वयंयजस्वपृथिवी मुतद्याम्।**
**मुह्यन्त्वन्येऽअभितः सपत्नाऽइहास्माकं मघवासूरिरस्तु।**
**आवाहयामि सेनेशं सर्वविघ्नविनाशकम्।**
**सूत्रवत्यासमेतञ्च ब्रह्माण्डपरिपालकम्॥**

**ॐ सूत्रवतीसहिताय श्रीमते विष्वक्सेनाय नमः सूत्रवतीसहितं श्रीमन्तं विष्वक्सेनम् आवाहयामि स्थापयामि पूजयामि।**

इति सपरिवारं सूत्रवतीसहितं विष्वक्सेनमावाह्य षोडशोपचारैः सम्पूज्य प्रणमेत् -

**ॐ यस्य द्विरदवक्त्राद्याः शासने स्थिरवृत्तयः।**
**स मे वैकुण्ठसेनानीर्भूयात् सर्वत्र विघ्नहा॥**

इति प्रार्थयित्वा भगवद्वेद्यां स्थापिते कुशकूर्चे सश्रीकं भगवन्तं नारायणम् आवाह्य पूजयेत् -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) सपिण्डीकरणश्राद्धे सश्रीकं नारायणम् आवाहयामि स्थापयामि पूजयामि।**

इति आवाह्य आसनार्घ्यपाद्य-आचमनस्नानवस्त्रोपवीतगन्धाक्षत-पुष्पालङ्कारधूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणा—प्रदक्षिणादीन् समर्प्य पूजयेत्।

ततः हवनवेद्यां पञ्चभूसंस्कारान् कुर्यात्। ते च यथा - **१. त्रिभिर्दर्भैः परिसमूह्य २. गोमयोदकेन उपलिप्य ३. श्रुवेण दर्भमूलेन वा दक्षिणोत्तर-क्रमेण तिस्रो रेखा उल्लिख्य ४. अनामिकाङ्गुष्ठाभ्याम् उल्लेखनक्रमेण मृदम् उद्धृत्य ऐशान्यां क्षिपेत् ५. शुद्धजलेन सम्प्रोक्ष्य कुशैः आच्छादयेत्।**

ततः तृतीयायां वेद्यां कामकालसंज्ञकानां विश्वेदेवानां कृते पृथक् एकं तिलरहितं यवयुक्तं कर्मपात्रं पूजासामग्रीश्च विधाय पूजयेत् -

## विश्वेदेवपूजनम्

आवाहनम् -

**ॐ विश्वेदेवासः आगत श्रृणुतेम६ँहवम्। एदं बर्हिर्निषीदत।**

**ॐ विश्वेदेवाःश्रुणुतेम ६ हवं मे येऽअन्तरिक्षे यऽउपद्यविष्ठ।**

**येऽअग्निजिह्वाऽउतवा यजत्राऽआसद्यास्मिन् बर्हिषिमादयद्ध्वम्॥**

**आगच्छन्तु महाभागा विश्वेदेवा महाबलाः।**

**ये ह्यत्र योजिताः श्राद्धे सावधाना भवन्तु ते॥**

इति मन्त्रेण आवाह्य -

**ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्द्दिवेत्वान्तरिक्षायत्वा।**

**पृथिव्यैत्वाशुन्धन्ताँल्लोकाःपितृषदनाःपितृषदनमसि॥**

इति मन्त्रेण विश्वेदेवानामासने यवान् विकिरेत् । ततः हस्तेजलकुशादिकमादाय आसनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकप्रवरान्वितस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे दिवङ्गतपितृपितामहप्रपितामहानाम् अमुकगोत्राणाम् अमुकामुकशर्मणां (वर्मणां/गुप्तानां) प्रद्युम्नसङ्कर्षणवासुदेवस्वरूपाणां श्राद्धसम्बन्धिनां कामकालसंज्ञकानां विश्वेषां देवानाम् इदमासनं वो नमः।**

**(स्त्री० – ॐ अद्य अमुकगोत्रायाः अमुकप्रवरान्वितायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे दिवङ्गता–श्वश्रू–प्रश्वश्रू–वृद्धप्रश्वश्रूणाम् अमुकगोत्राणाम् अमुक–अमुकदेवीनाम्, सत्याहिरण्या–हरिणीस्वरूपाणां श्राद्धसम्बन्धिनां कामकालसंज्ञकानां विश्वेषां देवानाम् इदमासनं वो नमः।)**

इति आसनं दत्वा हस्तार्घं दद्यात्।

विश्वेदेवानाम् अग्रे एकं पुटकं स्थापयित्वा तस्मिन् पुटके कुशपवित्रं निक्षिपेत् –

**ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥**

जलं निक्षिपेत् –

**ॐ शन्नो देवीरभीष्टयऽआपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः॥**

यवान् निक्षिपेत् –

**ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्द्दिवेत्वान्तरिक्षायत्वा। पृथिव्यैत्वाशुन्धन्ताँल्लोकाःपितृषदनाःपितृषदनमसि॥**

चन्दनं निक्षिपेत् –

**ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।**
**ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥**

पुष्पाणि निक्षिपेत् –

**ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकं मऽइषाण ॥**

ततः हस्तार्घपात्रं वामहस्ते आदाय दक्षिणहस्तेन हस्तार्घपात्रस्थपवित्रमादाय –

**ॐ नमो नारायणाय** इति मन्त्रेण सजलपवित्रं विश्वेदेवानाम् अग्रे निदध्यात्। ततः न्यूब्जदक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य अभिमन्त्रयेत् –

**ॐ या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्षा उत पार्थवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शिवाःशꣳस्योनाः सुहवाभवन्तु ॥**

इति अभिमन्त्र्य हस्ते यवजलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकप्रवरान्वितस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे दिवङ्गतपितृपितामह-प्रपितामहानाम् अमुकगोत्राणाम् अमुकामुकशर्मणाम् (वर्मणां/गुप्तानां) प्रद्युम्नसङ्कर्षणवासुदेवस्वरूपाणां श्राद्ध-सम्बन्धिनां कामकालसंज्ञकानां विश्वेषां देवानाम् एष हस्तार्घो वो नमः।**

**(स्त्री० ॐ अद्य अमुकगोत्रायाः अमुकप्रवरान्वितायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे दिवङ्गता-श्वश्रू-प्रश्वश्रू-वृद्धप्रश्वश्रूणाम् अमुकगोत्राणाम् अमुक-अमुकदेवीनाम्, सत्याहिरण्याहरिणीस्वरूपाणां श्राद्धसम्बन्धिनां कामकालसंज्ञकानां विश्वेषां देवानाम् एष हस्तार्घो वो नमः।)**

इति सङ्कल्प्य पवित्रोपरि हस्तार्घ्यजलं दद्यात्। ततः **अर्घे पुनः प्रत्यर्घमस्तु** इति उक्त्वा पूर्वस्थापितपवित्रं पुनः अर्घपात्रे स्थापयित्वा

तदर्घपात्रं **विश्वेभ्यो देवेभ्यो नमः** इति उच्चारयन् विश्वेदेव-दक्षिणपार्श्वे उत्तानमेव स्थापयित्वा प्रणमेत् -

**आगता हि महाभागाः स्वागतं कृपया मयि।**
**यावत् श्राद्धं प्रवर्तेत तावत् सन्निहिता ननु॥**

इति अर्घं दत्वा गन्धादिभिः सम्पूज्य प्रणमेत्।

## अथ चतुर्व्यूहपूजनम्

ततः प्रथमनिर्मितकर्मपात्रं पूजासामग्रीश्च अग्रे कृत्वा प्रथमायां वेद्यां स्थापितेषु त्रिषु कूर्चेषु पुष्पाक्षतैः सशक्तिकान् वासुदेवसङ्कर्षणप्रद्युम्नान् आवाह्य पूजयेत्। प्रथमं हरिणीसहितवासुदेवाह्वानम् -

**आवाहयाम्यहं देवं वासुदेवं जगत्पतिम्।**
**अमृताध्मातमेघाभं विद्युत्सदृशवाससम्॥**
**एह्येहि पुण्डरीकाक्ष शरणागतवत्सल।**
**सर्वकामप्रदाचिन्त्य सर्वशक्तिबलान्वित॥**

**ॐ हरिणीसहिताय वासुदेवाय नमः, हरिणीसहितं वासुदेवम् आवाहयामि स्थापयामि पूजयामि।**

हिरण्यासहितसङ्कर्षणाह्वानम् -

**आवाहयाम्यहं देवं सङ्कर्षणमनामयम्।**
**शशाङ्कशतसङ्काशं सजलाम्बुदवाससम्॥**
**एहि सङ्कर्षणाचिन्त्य देव भक्तजनप्रिय।**
**वाङ्मनःकायसम्भूतमलत्रितयनाशन॥**

**ॐ हिरण्यासहिताय सङ्कर्षणाय नमः, हिरण्यासहितं सङ्कर्षणम् आवाहयामि स्थापयामि पूजयामि।**

सत्यासहितप्रद्युम्नाह्वानम् -

**देवमावाहयाम्यद्य प्रद्युम्नमपराजितम् ।**
**दुर्वाङ्कुरदलश्यामं शशाङ्कांशु समाम्वरम् ॥**
**काम कामप्रद शान्त कमनीयगुणालय ।**
**प्रद्युम्नाभ्येहि देवेश प्रद्योतितचराचर ॥**

**ॐ सत्यासहिताय प्रद्युम्नाय नमः, सत्यासहितं प्रद्युम्नम् आवाहयामि स्थापयामि पूजयामि ।**

ततो द्वितीयायां वेद्यां नित्यानन्दासहितम् अनिरुद्धम् आवाह्य पूजयेत् -

**आवाहयाम्यहं देवमनिरुद्धं जगद्गुरुम् ।**
**पद्मपत्राग्रसङ्काशं रक्ताम्बरविभूषणम् ॥**
**अनिरुद्ध त्वमभ्येहि व्याप्ताशेषचराचर ।**
**सर्वेषां प्राणिनां कर्मसाक्षिभूत परात्पर ॥**

**ॐ नित्यानन्दासहिताय अनिरुद्धाय नमः, नित्यानन्दासहितम् अनिरुद्धमावाहयामि स्थापयामि पूजयामि ।**

इत्यावाह्य आसनार्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्य-ताम्बूलदक्षिणाप्रदक्षिणानमस्कारैः सर्वान् चतुर्व्यूहान् सम्पूज्य प्रार्थयेत् -

**सर्वे चतुर्भुजा ध्येयाः शङ्खचक्रगदाधराः ।**
**किरीटकौस्तुभधरा वैनतेयासनेस्थिताः ॥**
**प्रोद्यता इव चोद्धर्तुं प्रेतभूतं हि नारद ॥**

इति सम्प्रार्थ्य मधुपर्कं निवेदयेत् ।

**मधुपर्कनिवेदनम् –**

चतुर्षु रौप्यादिपात्रेषु पर्णपुटकेषु वा पलैकं दधि, पलैकं सर्पिः, पलैकं मधु, कर्पूरञ्च सम्मेल्य तुलसीदलं निक्षिप्य मूलमन्त्रेण अभिमन्त्र्य चतुर्भ्यो व्यूहेभ्यो निवेदयेत् –

**ॐ योऽसौ भवाँस्तिष्ठति सर्वदेहे नारायणः सर्वजगत्प्रधानः।**
**गृहाण चैवं सुरलोकनाथ भक्तोपनीतं मधुपर्कसंज्ञम्॥**

इति मधुपर्कं प्रदाय हस्तमुखशोधनं कारयित्वा जितन्तेस्तोत्रेण स्तुवीत। (जितन्तेस्तोत्रम्, पृ. ३१६)

## अथ होमविधानम्

ततो हवनवेद्यामग्निं प्रज्वाल्य आवाहयेत् –

**ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥**
**ॐ विष्णुनामाग्नये नमः, विष्णुनामाग्निम् आवाहयामि।**

इति आवाह्य पीताक्षतैः षोडशसंस्कारान् कुर्यात् –

१. ॐ हं नमः अग्नये शुचिषदे नमः, गर्भाधानसंस्कारं सम्पादयामि।
२. ॐ हं नमः अग्नये शुचिषदे नमः, पुंसवनसंस्कारं सम्पादयामि।
३. ॐ हं नमः अग्नये शुचिषदे नमः, सीमन्तोन्नयनसंस्कारं सम्पादयामि।
४. ॐ हं नमः अग्नये शुचिषदे नमः, जातकर्मसंस्कारं सम्पादयामि।
५. ॐ हं नमः अग्नये शुचिषदे नमः, नामकरणसंस्कारं सम्पादयामि।
६. ॐ हं नमः अग्नये शुचिषदे नमः, निष्क्रमणसंस्कारं सम्पादयामि।
७. ॐ हं नमः अग्नये शुचिषदे नमः, अन्नप्राशनसंस्कारं सम्पादयामि।
८. ॐ हं नमः अग्नये शुचिषदे नमः, कर्णवेधसंस्कारं सम्पादयामि।
९. ॐ हं नमः अग्नये शुचिषदे नमः, चूडाकरणसंस्कारं सम्पादयामि।
१०. ॐ हं नमः अग्नये शुचिषदे नमः, उपनयनसंस्कारं सम्पादयामि।
११. ॐ हं नमः अग्नये शुचिषदे नमः, सावित्रीश्रावणसंस्कारं सम्पादयामि।
१२. ॐ हं नमः अग्नये शुचिषदे नमः, वेदारम्भसंस्कारं सम्पादयामि।

१३. ॐ हं नमः अग्नये शुचिषदे नमः, गोदानसंस्कारं सम्पादयामि।
१४. ॐ हं नमः अग्नये शुचिषदे नमः, स्नातकव्रतसंस्कारं सम्पादयामि।
१५. ॐ हं नमः अग्नये शुचिषदे नमः, समावर्तनसंस्कारं सम्पादयामि।
१६. ॐ हं नमः अग्नये शुचिषदे नमः, विवाहसंस्कारं सम्पादयामि।

इति संस्कारान् सम्पाद्य गन्धादिभिः यथोपचारैः सम्पूज्य प्रार्थयेत् -

**द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम्।**
**वरदं शक्तिपाणिञ्च बिभ्राणं स्रुक्स्रुवौ तथा॥**
**स्वाहाञ्च दक्षिणे पार्श्वे वामे देवीं स्वधान्तथा।**
**रक्तमाल्याम्बरधरमेवमग्निं विचिन्तयेत्॥**

ततः पात्रासादनं (याज्ञिकपात्रशुद्धिप्रयोगः पात्रासादनमित्युच्यते) कुर्यात्। अग्नेर्दक्षिणतः त्रिभिर्दर्भैः ब्रह्मासनम् आस्तीर्य तत्र ब्रह्माणम् आवाह्य पूजयेत् -

**ॐ ब्रह्मणे नमः ब्रह्माणम् आवाहयामि स्थापयामि पूजयामि।**

इति सर्वोपचारैः सम्पूज्य अग्नेरुत्तरतः प्रणीताप्रोक्षण्यौ स्रुक्-स्रुवे इध्म आज्यञ्च संस्थाप्य वेद्याः अष्टदिक्षु तण्डुलपुञ्जेषु अष्टवसून् आवाह्य पूजयेत् -

पूर्वे - **ॐ अग्नये नमः, अग्निम् आवाहयामि स्थापयामि पूजयामि।**

आग्नेये - **ॐ जातवेदसे नमः, जातवेदसम् आवाहयामि स्थापयामि पूजयामि।**

दक्षिणे - **ॐ सहोजसे नमः, सहोजसम् आवाहयामि स्थापयामि पूजयामि।**

नैर्ऋत्ये - **ॐ अजिराप्रभवे नमः, अजिराप्रभुम् आवाहयामि स्थापयामि पूजयामि।**

पश्चिमे - ॐ वैश्वानराय नमः, वैश्वानरम् आवाहयामि स्थापयामि पूजयामि।

वायव्ये - ॐ नर्यापसे नमः, नर्यापसम् आवाहयामि स्थापयामि पूजयामि।

उत्तरे - ॐ पङ्क्तिराधसे नमः, पङ्क्तिराधसम् आवाहयामि स्थापयामि पूजयामि।

ईशाने - **ॐ विसर्पिणे नमः, विसर्पिणम् आवाहयामि स्थापयामि पूजयामि।**

समन्ततः - **ॐ यज्ञपुरुषाय नमः, यज्ञपुरुषम् आवाहयामि स्थापयामि पूजयामि ।**

स्वशिरसि - **ॐ आत्मने नमः ।**

श्रीवैष्णवशिरस्सु - **ॐ सर्वेभ्यः श्रीवैष्णवेभ्यो नमः ।**

इति पीताक्षतैः पूजयित्वा ततः कुशान्तर्हितायाः प्रोक्षण्याः उदकं निनीय तेन पात्राणि होमसामग्रीश्च प्रोक्ष्य कुशैः परिस्तरणं कुर्यात् । ततः परिस्तरणोपरि प्रोक्षण्युदकेन परिषेचनं कुर्यात् ।

**ॐ अदिते अनुमन्यस्व।** इति दक्षिणे पश्चिमतः प्राचीनां जलधारां दद्यात्।

**ॐ अनुमते अनुमन्यस्व।** इति पश्चिमे दक्षिणत उदीचीनां जलधारां दद्यात्।

**ॐ सरस्वते अनुमन्यस्व।** इति उत्तरे पश्चिमतः प्राचीनां जलधारां दद्यात्।

**ॐ देवसवितः प्रसुव ।** इति समन्ततः प्रागारभ्य प्रदक्षिणक्रमेण जलधारां दद्यात्।

ततो घृताक्ताः पञ्चदशसमिधः पुष्पाक्षतैरलङ्कृत्य प्रजापतिं मनसा ध्यात्वा तूष्णीं प्रज्वलितेऽग्नौ जुहुयात्।

## पञ्चवारुणीहोमः

ततः श्रुवेण आज्यमादाय -

**ॐ प्रजापतये स्वाहा प्रजापतये इदं न मम**

इति नैऋत्यादीशानान्तं जुहुयात्।

**ॐ इन्द्राय स्वाहा इन्द्राय इदं न मम**

इति वायव्यादाग्नेयान्तं जुहुयात्।

**ॐ अग्नये स्वाहा अग्नये इदं न मम**

इति अग्नेर्दक्षिणतो जुहुयात्।

**ॐ सोमाय स्वाहा सोमाय इदं न मम**

इति अग्नेरुत्तरतो जुहुयात्।

**ॐ भूः अग्नये स्वाहा अग्नये इदं न मम।**

**ॐ भुवः वायवे स्वाहा वायवे इदं न मम।**

**ॐ स्वः सूर्याय स्वाहा सूर्याय इदं न मम।**

**ॐ भूर्भुवःस्वः प्रजापतये स्वाहा प्रजापतये इदं न मम।**

**ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्याम् इदं न मम।**

**ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्याम् इदं न मम।**

**ॐ अग्नये स्वाहा अग्नये इदं न मम।**

**ॐ वरुणाय स्वाहा वरुणाय इदं न मम ।**

**ॐ सवित्रे स्वाहा सवित्रे इदं न मम।**

**ॐ विष्णवे स्वाहा विष्णवे इदं न मम**

**ॐ विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं न मम।**

**ॐ वरुणाय स्वाहा वरुणाय इदं न मम।**

ततः घृतपायसेन पुरुषसूक्तेन, आज्येन श्रीसूक्तेन, सर्पिःशर्करात्ततिलैः विष्णुसूक्त-नारायणानुवाक-भूसूक्तैर्हुत्वा मूलमन्त्रेण अष्टोत्तरशताहुतीः घृतेन जुहुयात्। एवमेव घृतचरुभ्यां वासुदेवद्वादशाक्षरेण विष्णुषडक्षरेण द्वयमन्त्रेणाऽपि प्रत्येकम् अष्टोत्तरशतं हुत्वा -

**ॐ वासुदेवाय स्वाहा, ॐ सङ्कर्षणाय स्वाहा, ॐ प्रद्युम्नाय स्वाहा, ॐ अनिरुद्धाय स्वाहा**

इत्येभिर्मन्त्रैः प्रत्येकमष्टोत्तरशताहुतीर्हुत्वा केशवादिचतुर्विंशतिनामभिर्वैकुण्ठपार्षदनामभिश्च जुहुयात् । (सूक्तानि, पार्षदनामानि च पृ. ३७-५४ द्रष्टव्यानि)।

## स्विष्टकृद्धोमः

**ॐ अग्नये स्विष्टकृते स्वाहा अग्नये स्विष्टकृते इदं न मम।**

**ॐ भूः अग्नये स्वाहा अग्नये इदं न मम।**

**ॐ भुवः वायवे स्वाहा वायवे इदं न मम।**

**ॐ स्वः सूर्याय स्वाहा सूर्याय इदं न मम।**

**ॐ भूर्भुवः स्वः प्रजापतये स्वाहा प्रजापतये इदं न मम।**

**ॐ अग्निवरुणाभ्यां स्वाहा अग्निवरुणाभ्यां इदं न मम।**

**ॐ अग्नये अयसे स्वाहा अग्नये अयसे इदं न मम।**

**ॐ वरुणाय स्वाहा वरुणाय इदं न मम।**

**ॐ सवित्रे स्वाहा सवित्रे इदं न मम।**

**ॐ विष्णवे स्वाहा विष्णवे इदं न मम।**

**ॐ विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं न मम।**

**ॐ मरुद्भ्यः स्वाहा मरुद्भ्य इदं न मम।**

**ॐ अर्केभ्यः स्वाहा अर्केभ्य इदं न मम।**

**ॐ आदित्याय स्वाहा आदित्याय इदं न मम।**

**ॐ अदितये स्वाहा अदितये इदं न मम।**

## पूर्णाहुतिः

स्रुवां चतुःकृत्वः पूरयित्वा नारिकेलपूगीफलानि निधाय चित्रतन्तुभिः वेष्टयित्वा प्रजापतिं मनसा ध्यायन् पूर्णाहुतिं जुहुयात्।

**ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत।**
**वस्नेव विक्रीणावहाऽइषमूर्जꣳशतक्रतो॥**
**अग्नये पूर्णाय सप्तवते स्वाहा।**

ततः परिस्तरणोपरि प्रोक्षण्युदकेन परिषेचनं कुर्यात् -
**ॐ अदिते अन्वमꣳस्थाः,** इति दक्षिणे पश्चिमतः प्राचीनां जलधारां दद्यात्।
**ॐ अनुमते अन्वमꣳस्थाः,** इति पश्चिमे दक्षिणत उदीचीनां जलधारां दद्यात्।
**ॐ सरस्वते अन्वमꣳस्थाः,** इत्युत्तरे पश्चिमतः प्राचीनां जलधारां दद्यात्।
**ॐ देवसवितः प्रासावीः,** इति समन्ततः प्रागारभ्य प्रदक्षिणक्रमेण जलधारां दद्यात्।

ततो जलपूर्णां प्रणीतां सव्यहस्तेन आदाय दक्षिणहस्तेन जलधारां दद्यात् -
**ॐ देवा ऋषयो मार्जयन्ताम्,** इति प्राच्यां किञ्चिज्जलं क्षिपेत्।
**ॐ मासाः पितरो मार्जयन्ताम्,** इति दक्षिणे किञ्चिज्जलं क्षिपेत्।
**ॐ गृहाः पशवो मार्जयन्ताम्,** इति पश्चिमे किञ्चिज्जलं क्षिपेत्।
**ॐ आप ओषधयो वनस्पतयो मार्जयन्ताम्,** इति उदीच्यां किञ्चिज्जलं क्षिपेत्।
**ॐ यज्ञः संवत्सरो यज्ञपतिर्मार्जयन्ताम्,** इत्यूर्ध्वं किञ्चिज्जलं क्षिपेत्।
**ॐ सुमित्रियानआप ओषधयः सन्तु,** इति भूमौ किञ्चिज्जलं क्षिपेत्।
**ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टियञ्च वयन्द्विष्मः।**

इति प्रणीतां न्युब्जीकुर्यात्।

## दिक्पालबलिविधानम्

यथालब्धपक्वान्नानां चतुरः पिण्डान् कृत्वा तेषु एकमादाय पूर्वे बलिं दद्यात् -
**ॐ आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशि स्थिताः।**
**प्रसन्नाः परितुष्टास्ते गृह्णन्तु बलिमुत्तमम्॥**

अन्यपिण्डम् आदाय दक्षिणे –

**ॐ वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः ।**
**भूमौ व्योम्नि स्थिता ये च बलिं गृह्णन्तु ते त्वमुम् ॥**

तृतीयपिण्डम् आदाय पश्चिमे –

**ॐ विनायकाः क्षेत्रपाला ये चान्ये बलिकाङ्क्षिणः ।**
**पूषाद्याः पार्षदाश्चैव प्रतिगृह्णन्तु ते बलिम् ॥**

चतुर्थपिण्डम् आदाय उत्तरे –

**ॐ ये भूता प्रचरन्ति दिवानक्तं बलिमिच्छन्तो वितुदस्य प्रेष्ठाः ।**
**तेभ्यो बलिं पुष्टिकामो ददामि मयि पुष्टिं पुष्टिपतिर्ददातु ॥**

इति बलीन् दत्वा सपिण्डनवेदीं गत्वा दिवङ्गताद्यावाहनं कुर्यात् ।

## दिवङ्गताद्यावाहनम्

ततः अनिरुद्धवेदिकासमीपमागत्य तत्रत्यपवित्रधारणं कृत्वा नीवीबन्धनं कुर्यात् ।

**नीवीबन्धनम्** –

**अपसव्येन** पुष्पं कुशञ्च गृहीत्वा निम्नमन्त्रं पठन् दक्षिणकट्यां धारयेत् –

**ॐ निहन्मि सर्वं यदमेध्यकृद्भवेत्, हताश्च सर्वेऽसुरदानवा मया।**
**यक्षाश्च रक्षांसि पिशाचगुह्यका हता मया यातुधानाश्च सर्वे ॥**
**ॐ सोमस्य नीविरसि विष्णोः शर्मासि शर्मयजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि ।**

इति नीवीबन्धनं कृत्वा अनिरुद्धवेदिकायां कुशानास्तीर्य तत्र हस्ते तिलान् आदाय दिवङ्गतम् आवाहयेत् –

**ॐ अद्य अमुकगोत्रम् अमुकनामानं दिवङ्गतं त्वाम् (अमुकगोत्राम् अमुकनाम्नीं दिवङ्गतां त्वाम्) अत्र आवाहयामि ।**

इति अनिरुद्धवेदिकायां तिलान् विकीर्य प्रार्थयेत् –

**आवाहयाम्यहं देवं जीवं सर्वगतं विभुम् ।**
**वेद्यामस्यामदृश्यत्वं प्रविशाद्य नमोऽस्तु ते ॥**

इत्यावाह्य ततो हस्ते सजलकुशत्रयमादाय दिवङ्गताय (दिवङ्गतायै) आसनं दद्यात् –

**अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य सपिण्डीकरणश्राद्धे इदं त्रिकुशात्मकम् आसनं ते मया दीयते तवोपतिष्ठताम् ।**
**(स्त्री० – अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे इदं त्रिकुशात्मकम् आसनं ते मया दीयते तवोपतिष्ठताम् ।)**

इति आसनं दत्वा पुनः प्रद्युम्नादिव्यूहवेदीमागत्य पातितवामजानुः व्यूहवेदिकायां कुशानास्तीर्य हस्ते तिलान् आदाय पितृपितामहप्रपितामहान् आवाहयेत् –

**अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य सपिण्डीकरणश्राद्धे अमुकगोत्रान् दिवङ्गतपितृपितामहप्रपितामहान् अमुकामुकशर्मणः (वर्मणः/गुप्तान्) प्रद्युम्नसङ्कर्षणवासुदेवस्वरूपान् आवाहयामि ।**
**(स्त्री० – अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे अमुकगोत्राः दिवङ्गताश्वश्रू–प्रश्वश्रू–वृद्धप्रश्वश्रूः अमुकामुकदेवीः सत्याहिरण्याहरिणीस्वरूपाः आवाहयामि) ।**

इति व्यूहवेदिकायां तिलान् विकीर्य –

**ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि ।**
**उशन्नुशत आवह पितॄन् हविषे अत्तवे ॥**

**ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन् यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान्॥**

इति मन्त्रं जपेत्। ततो हस्ते मोटकानि आदाय आसनानि दद्यात् -

**अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य सपिण्डीकरणश्राद्धे दिवङ्गतपितृपितामहप्रपितामहानाम् अमुकामुकशर्मणां (वर्मणां/गुप्तानां) प्रद्युम्नसङ्कर्षणवासुदेवस्वरूपाणाम् एतानि आसनानि युष्मभ्यं नमः।**

**(स्त्री० - अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे दिवङ्गताश्वश्रू-प्रश्वश्रू-वृद्धप्रश्वश्रूणाम् अमुकामुकनाम्नीनां देवीनां सत्याहिरण्याहरिणीस्वरूपाणाम् एतानि आसनानि युष्मभ्यं नमः)**। इति आसनानि दद्यात्।

## अथ हस्तार्घविधिः

पुनः अनिरुद्धवेद्याः अग्रे गत्वा हस्तार्घार्थं वेद्या अग्रे पुटकं संस्थाप्य तत्र कुशपवित्रं निक्षिपेत् -

**ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥**

जलं निक्षिपेत् -

**ॐ शन्नो देवीरभीष्टयऽआपोभवन्तु पीतये। शंयोरभिस्रवन्तुनः॥**

तिलान् निक्षिपेत् -

**ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः।**
**प्रत्नमद्भिः पृक्तः स्वधया पितृँल्लोकान् प्रीणाहि नः स्वाहा॥**

**इति निक्षिप्य गन्धपुष्पे तूष्णीं निक्षिपेत्।**

ततः हस्तार्घपात्रं वामहस्ते स्थापयित्वा दक्षिणहस्तेन हस्तार्घपात्रस्थं पवित्रमादाय –

**ॐ नमो नारायणाय** इति मन्त्रेण सजलपवित्रम् अनिरुद्धाग्रे निदध्यात्।

ततः उत्तानदक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य अभिमन्त्रयेत् –

**ॐ या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्षा उत पार्थवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शिवाःशँस्योनाः सुहवाभवन्तु॥**

इति अभिमन्त्र्य हस्ते जलकुशादिकमादाय–

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत सपिण्डीकरणश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते सपिण्डीकरणश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्।)**

इति पूर्वस्थापितपवित्रोपरि चतुर्थभागं जलं दद्यात्। ततः तत्पवित्रं पुष्पञ्च पुनरर्घपात्रे निधाय अर्घपात्रं दिवङ्गतस्य अग्रे स्थापयेत्।

पुनः प्रद्युम्नसङ्कर्षणवासुदेवादीनामग्रे त्रीणि पुटकानि संस्थाप्य तेषु पूर्ववत् पवित्रं जलं गन्धपुष्पे च निक्षिप्य प्रद्युम्नस्य अर्घपात्रं वामहस्ते गृहीत्वा –

**ॐ नमो नारायणाय** इति मन्त्रेण उत्तराग्रं पवित्रं प्रद्युम्नस्थाने निक्षिप्य उत्तानदक्षिणहस्तेन आच्छाद्य अभिमन्त्रयेत् –

**ॐ या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्षा उत पार्थवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शिवाःशँस्योनाः सुहवाभवन्तु॥**

इति अभिमन्त्र्य हस्ते जलमोटकादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे अमुकगोत्र अमुकनामन् दिवङ्गतपितः प्रद्युम्नस्वरूप एष हस्तार्घस्ते नमः ।**
**(स्त्री० – अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे अमुकगोत्रे अमुकनाम्नि दिवङ्गताश्वश्रु सत्यास्वरूपे एष हस्तार्घस्ते नमः ।)**

इति प्रद्युम्नाय पूर्वस्थापितपवित्रोपरि अर्घं दद्यात्। पुनः तत्पवित्रं पुष्पञ्च अर्घपात्रे स्थापयित्वा तदर्घपात्रं प्रद्युम्नस्य अग्रे स्थापयेत्।

पुनः सङ्कर्षणस्य अर्घपात्रं वामहस्ते गृहीत्वा –

**ॐ नमो नारायणाय** इति मन्त्रेण उत्तराग्रं पवित्रं सङ्कर्षणस्थाने निक्षिप्य उत्तानदक्षिणहस्तेन आच्छाद्य अभिमन्त्रयेत् –

**ॐ या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्षा उत पार्थवीर्याः ।**
**हिरण्यवर्णा यज्ञियास्ता न आपः शिवाःशꣳस्योनाः सुहवाभवन्तु ॥**

इति अभिमन्त्र्य हस्ते जलमोटकादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे अमुकगोत्र अमुकनामन् दिवङ्गतपितामह सङ्कर्षणस्वरूप एष हस्तार्घस्ते नमः ।**
**(स्त्री० – अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे अमुकगोत्रे अमुकनाम्नि दिवङ्गताप्रश्वश्रु हिरण्यास्वरूपे एष हस्तार्घस्ते नमः ।)**

इति सङ्कर्षणाय पूर्वस्थापितपवित्रोपरि अर्घं दत्वा पुनः तत्पवित्रं पुष्पञ्च अर्घपात्रे स्थापयित्वा तदर्घपात्रं सङ्कर्षणस्य अग्रे स्थापयेत्।

पुनः वासुदेवस्य अर्घपात्रं वामहस्ते गृहीत्वा –

**ॐ नमो नारायणाय** इति मन्त्रेण उत्तराग्रं पवित्रं वासुदेवस्थाने निक्षिप्य उत्तानदक्षिणहस्तेन आच्छाद्य अभिमन्त्रयेत् –

**ॐ या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्षा उत पार्थवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शिवाःशꣳस्योनाः सुहवाभवन्तु॥**

इति अभिमन्त्र्य हस्ते जलमोटकादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे अमुकगोत्र अमुकनामन् दिवङ्गतप्रपितामह वासुदेवस्वरूप एष हस्तार्घस्ते नमः।**

**(स्त्री० – अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे अमुकगोत्रे अमुकनाम्नि दिवङ्गतावृद्धप्रश्वश्रु हरिणीस्वरूपे एष हस्तार्घस्ते नमः।)**

इति वासुदेवाय पूर्वस्थापितपवित्रोपरि अर्घं दत्वा पुनः तत्पवित्रं पुष्पञ्च अर्घपात्रे स्थापयित्वा तदर्घपात्रं वासुदेवस्य अग्रे स्थापयेत्।

## जलसंयोजनम्

ततः हस्ते जलकुशादिकमादाय जलसंयोजनार्थे सङ्कल्पं कुर्यात् –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य भगवत्सायुज्यप्राप्तये दिवङ्गतार्घपात्रोदकम् अमुकगोत्राणां दिवङ्गतस्य पितृपितामह–प्रपितामहानाम् अमुक–अमुकनामशर्मणां (वर्मणां/गुप्तानां) प्रद्युम्न–सङ्कर्षणवासुदेवस्वरूपाणाम् अर्घपात्रोदकैः सह संयोजयिष्ये।**

**(स्त्री० – अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः भगवत्सायुज्यप्राप्तये दिवङ्गतार्घपात्रोदकम् अमुकगोत्राणां दिवङ्गतायाः श्वश्रू–प्रश्वश्रू–वृद्धप्रश्वश्रूणाम् अमुक–अमुकदेवीनां सत्याहिरण्याहरिणीस्वरूपाणाम् अर्घपात्रोदकैः सह संयोजयिष्ये)।**

इति सङ्कल्प्य पुनः दिवङ्गतस्य अग्रे अन्यानि त्रीणि पुटकानि निधाय –

**ॐ ये समाना समनसः पितरो यमराज्ये।**
**तेषाँल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम्॥**
**ये समाना समनसो जीवा जीवेषु मामकाः।**
**तेषाꣳश्रीर्मयि कल्पतामस्मिँल्लोके शतꣳ समाः॥**

इति दिवङ्गतस्य अर्घजलं त्रिषु पुटकेषु समानरूपेण विभज्य निक्षिपेत्। दिवङ्गतार्घपात्रं तत्रैव उत्तानमेव स्थापयेत्।

ततः प्रथमपुटकस्थ–अर्घजलं पुनः दिवङ्गतार्घपात्रे कृत्वा रिक्तं पुटकं स्वपृष्ठभागे निक्षिप्य पवित्रपुष्पसहितं दिवङ्गतार्घमादाय –

**ॐ ये समाना समनसः पितरो यमराज्ये।**
**तेषाँल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम्॥**
**ये समाना समनसो जीवा जीवेषु मामकाः।**
**तेषाꣳश्रीर्मयि कल्पतामस्मिँल्लोके शतꣳ समाः॥**

इति पठित्वा दिवङ्गतार्घजलं दिवङ्गतपितुः अर्घपात्रजले मेलयेत्।

एवं द्वितीयभागं जलं दिवङ्गतार्घपात्रे कृत्वा रिक्तं पुटकं स्वपृष्ठभागे निक्षिप्य पवित्रपुष्पसहितं दिवङ्गतार्घमादाय उपर्युक्तमन्त्रद्वयं पठन् दिवङ्गतपितामहस्य अर्घपात्रजले मेलयेत्।

पुनः तृतीयभागं जलं दिवङ्गतार्घपात्रे कृत्वा रिक्तं पुटकं स्वपृष्ठभागे निक्षिप्य पवित्रपुष्पसहितं दिवङ्गतार्घमादाय उपर्युक्तमन्त्रद्वयं पठन् दिवङ्गतप्रपितामहस्य अर्घपात्रजले मेलयेत्। ततः हस्ते जलमोटकादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत अमुकगोत्रैः अमुकअमुकनामभिः स्वपितृपितामहप्रपितामहैः प्रद्युम्नसङ्कर्षण–वासुदेवस्वरूपैः सह सायुज्यं गच्छ।**

**(स्त्री० - अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते अमुकगोत्राभिः अमुकामुकदेवीभिः स्वश्वश्रू-प्रश्वश्रू-वृद्धप्रश्वश्रूभिः सत्याहिरण्याहरिणीस्वरूपाभिः सह सायुज्यं गच्छ।)**

इति प्रद्युम्नसङ्कर्षणवासुदेवानामग्रे उत्सृजेत्।

ततः दिवङ्गतार्घपात्रं दिवङ्गतपार्श्वे उत्तानमेव स्थापयित्वा तदुपरि कुशान् दद्यात् । दिवङ्गतप्रपितामह-अर्घपात्रस्थं जलादिकं दिवङ्गतपितामहार्घपात्रे कृत्वा, पुनः दिवङ्गगतपितामहार्घपात्रस्थं सर्वं जलादिकं दिवङ्गतपितृपात्रे संगृह्णीयात् । ततः दिवङ्गतपित्रर्घपात्रम् उत्ताने पितामहार्घपात्रे धृत्वा तद्द्वयम् उत्ताने एव प्रपितामहार्घपात्रे धृत्वा पात्रत्रयमेकदैव प्रद्युम्नस्य वामपार्श्वे न्युब्जं विधाय तदुपरि कुशत्रयं दद्यात्। एवं स्थापितम् अर्घपात्रचतुष्टयं व्यूहविसर्जनपर्यन्तं न चालयेत्।

**। इति जलसंयोजनविधिः ।**

## विश्वेदेवपूजनम्

ततः **सव्यं** कृत्वा गन्धादिभिः विश्वेदेवान् पूजयेत् -

पाद्याचमनीयस्नानवस्त्रोपवीतधूपदीपनैवेद्यपुनराचमनीयताम्बूलदक्षिणा-प्रदक्षिणानमस्कारान् समर्प्य हस्ते कुशजलादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकप्रवरान्वितस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे दिवङ्गतपितृपितामहप्रपितामहानाम् अमुकगोत्राणाम् अमुकामुकशर्मणाम् (वर्मणां/गुप्तानां) प्रद्युम्नसङ्कर्षणवासुदेवस्वरूपाणां श्राद्धसम्बन्धिनः कामकालसंज्ञकाः विश्वेदेवाः एतानि अर्चनानि वो नमः।**

**(स्त्री० - ॐ अद्य अमुकगोत्रायाः अमुकप्रवरान्वितायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे दिवङ्गता-श्वश्रू-प्रश्वश्रू-वृद्धप्रश्वश्रूणाम् अमुकगोत्राणाम् अमुक-अमुकदेवीनाम्, सत्याहिरण्याहरिणीस्वरूपाणां श्राद्धसम्बन्धिनः कामकालसंज्ञकाः विश्वेदेवाः एतानि अर्चनानि वो नमः।)**

## दिवङ्गतपूजनम्

ततः **अपसव्येन** अनिरुद्धवेदिकायां पाद्याचमनीयगन्धपुष्पाक्षतधूपदीपनैवेद्य-पुनराचमनीयताम्बूलदक्षिणाप्रदक्षिणानमस्कारान् समर्प्य दिवङ्गतं पूजयित्वा हस्ते जलकुशादिकमादाय -

**अद्य अमुकगोत्रस्य अमुकनामदिवङ्गतस्य सपिण्डीकरणश्राद्धे दिवङ्गत एतानि अर्चनानि पाद्याचमनीयगन्धपुष्पाक्षतधूपदीप-नैवेद्यपुनराचमनीयताम्बूलदक्षिणाप्रदक्षिणानमस्कारादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

**(स्त्री० - अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे दिवङ्गते एतान्यर्चनानि पाद्याचमनीय-गन्धपुष्पाक्षतधूपदीपनैवेद्यपुनराचमनीयताम्बूलदक्षिणाप्रदक्षिणा-नमस्कारादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।)**

इति दिवङ्गतं सम्पूज्य पितृवेद्याः अग्रे उपविश्य पितॄन् पूजयेत्।

## पितृपूजनम्

ततः प्रद्युम्नादिव्यूहवेदिकामागत्य **अपसव्येन** पाद्याचमनीयगन्धपुष्पाक्षत-धूपदीपनैवेद्यपुनराचमनीयताम्बूलदक्षिणाप्रदक्षिणानमस्कारादीन् समर्प्य दिवङ्गतपितृपितामहप्रपितामहान् पूजयित्वा हस्ते जलमोटकादिकमादाय -

**अद्य अमुकगोत्रस्य अमुकनाम्नः दिवङ्गतस्य सपिण्डीकरणश्राद्धे दिवङ्गतपितृपितामहप्रपितामहाः अमुकामुकगोत्राः अमुकामुकनामशर्माणः (वर्माणः/गुप्ताः) प्रद्युम्नसङ्कर्षणवासुदेवस्वरूपाः एतान्यर्चनानि पाद्याचमनीय-गन्ध-पुष्पाक्षत-धूप-दीपनैवेद्यपुन-राचमनीय-ताम्बूल-दक्षिणा-प्रदक्षिणा-नमस्कारादीनि युष्मभ्यं नमः।**

(स्त्री० - अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे दिवङ्गताश्वश्रू-प्रश्वश्रू-वृद्धप्रश्वश्र्वः अमुकामुकगोत्राः अमुकामुकदेव्यः सत्याहिरण्याहरिणीस्वरूपाः एतानि अर्चनानि पाद्याचमनीय-गन्ध-पुष्पाक्षत-धूपदीपनैवेद्य-पुनराचमनीय-ताम्बूल-दक्षिणा-प्रदक्षिणा-नमस्कारादीनि युष्मभ्यं नमः ।)

## सिद्धान्नदानम्

अथ **सव्येन** दधिघृतशर्कराफलव्यञ्जनादिसहितानि षड्भागसिद्धान्नानि सम्पाद्य तेषु एकभागं सिद्धान्नं विश्वेदेवानामग्रे निधाय तस्मिन् मधुव्वातेति पठन् मधु निक्षिपेत् -

**ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः ।**
**माध्वीर्नः सन्त्वोषधीः ।**
**ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः । मधुद्यौरस्तु नः पिता ।**
**ॐ मधुमान्नो व्वनस्पतिर्मधु माँ२ऽअस्तु सूर्य्यः ।**
**माध्वीर्गावो भवन्तु नः ॥ ॐ मधु मधु मधु ।**

ततः उत्तानवामहस्ते उत्तानमेव दक्षिणहस्तं स्थापयित्वा सिद्धान्नं स्पृशेत् -

**ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृतेअमृतं जुहोमि स्वाहा ।**
**ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधे पदं समूढमस्यपाꣳसुरे ।**
**ॐ कृष्ण हव्यमिदं रक्ष मदीयम् ।**

ततः वामहस्तेन सिद्धान्नं स्पृशन् दक्षिणहस्तस्य अङ्गुष्ठेन -

**इदमन्नम्** इति अन्नम्, **इमा आपः** इति जलम्, **इदमाज्यम्** इति आज्यम्, **इदं हव्यम्** इति सर्वं **सिद्धान्नं स्पृशेत्** । ततः सिद्धान्नं परितः यवान् विकिरेत् -

**ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्द्दिवेत्वान्तरिक्षायत्वा। पृथिव्यैत्वाशुन्धन्ताँल्लोकाःपितृषदनाःपितृषदनमसि ॥**

ततः वामहस्तेन सिद्धान्नं स्पृशन् दक्षिणहस्ते जलकुशादिकमादाय -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे दिवङ्गतपितृपितामहप्रपितामहानाम् अमुकामुकनामशर्मणां(वर्मणां/गुप्तानां) प्रद्युम्नसङ्कर्षणवासुदेवस्वरूपाणां श्राद्धसम्बन्धिभ्यः कामकालसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यः इदमन्नं सोपस्करं वो नमः।**

**(स्त्री० - अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे दिवङ्गता-श्वश्रू-प्रश्वश्रू-वृद्धप्रश्वश्रूणाम् अमुकामुकदेवीनां सत्याहिरण्याहरिणीस्वरूपाणां श्राद्धसम्बन्धिभ्यः कामकालसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यः इदमन्नं सोपस्करं वो नमः।)**

ततः **अपसव्येन** जलेन चतुरस्रं मण्डलं विधाय तस्मिन् मण्डले एकभागं सिद्धान्नं स्थापयित्वा हस्ते मोटकजलमादाय -

**इदमन्नादिकम् एतद्भूस्वामिपितृभ्यो नमः** इति भूस्वामिपितृभ्यो दद्यात् । ततः दिवङ्गतस्य अग्रे एकभागसिद्धान्नं स्थापयित्वा मधुव्वातेति पठन् मधु निक्षिपेत् -

**ॐ मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः।**
**ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ६ रजः। मधुद्यौरस्तु नः पिता।**
**ॐ मधुमान्नोव्वनस्पतिर्मधुमाँ२ऽअस्तु सूर्य्यः।**
**माध्वीर्गावोभवन्तु नः॥ ॐ मधु ॐ मधु ॐ मधु।**

ततः हस्ते जलकुशादिकमादाय -

**अद्य अमुकगोत्राय अमुकनाम्ने दिवङ्गताय सपिण्डीकरणश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै सपिण्डीकरणश्राद्धे इदमन्नं सजलं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।)**

इति दिवङ्गताय अन्नं दत्वा व्यूहानामग्रे आगत्य **सव्येन** आचम्य **अपसव्येन** वासुदेवादिव्यूहानामग्रे पृथक् पृथक् एकैकभागं सिद्धान्नं स्थापयित्वा प्रथमं प्रद्युम्नसिद्धान्ने मधुव्वातेति पठन् मधु निक्षिपेत् –

**ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ँ रजः। मधुद्यौरस्तु नः पिता। ॐ मधुमान्नो व्वनस्पतिर्मधु माँ२ऽअस्तु सूर्य्यः। माध्वीर्गावो भवन्तु नः॥ॐ मधु ॐ मधु ॐ मधु।**

ततो न्युब्जदक्षिणहस्तोपरि वामहस्तं न्युब्जीकृत्य सिद्धान्नं स्पृशेत् –

**ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा।**

**ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधे पदं समूढमस्यपा ँ सुरे।**

**ॐ कृष्ण कव्यमिदं रक्ष मदीयम् ।**

ततो वामहस्तेन सिद्धान्नं स्पृशन् दक्षिणहस्तस्य न्युब्जाङ्गुष्ठेन –

**इदमन्नम्** इति अन्नम्, **इमा आपः** इति जलम्, **इदमाज्यम्** इति आज्यम्, **इदं कव्यम्** इति सर्वं सिद्धान्नं स्पृशेत्। ततः सिद्धान्नंपरितः तिलान् विकिरेत् –**ॐ अपहता असुरा रक्षा ँ सि वेदिषदः।**

ततो वामहस्तेन सिद्धान्नं स्पृशन् दक्षिणहस्ते जलमोटकादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे दिवङ्गतपित्रे अमुकगोत्राय अमुकनामशर्मणे (वर्मणे/गुप्ताय) प्रद्युम्नस्वरूपाय इदमन्नं सोपस्करं ते स्वधा।**

**(स्त्री० – अद्यामुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे दिवङ्गताश्वश्र्वै अमुकदेव्यै सत्यास्वरूपायै इदमन्नं सोपस्करं ते स्वधा।)**

ततः सङ्कर्षणस्य अग्रे एकभागसिद्धान्नं स्थापयित्वा मधुव्वातेति पठन् मधु निक्षिपेत् –

**ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः। मधुद्यौरस्तु नः पिता। ॐ मधुमान्नो व्वनस्पतिर्मधु माँ२ऽअस्तु सूर्य्यः। माध्वीर्गावो भवन्तु नः॥ ॐ मधु ॐ मधु ॐ मधु।**

ततो न्युब्जदक्षिणहस्तोपरि वामहस्तं न्युब्जीकृत्य सिद्धान्नं स्पृशेत् –

**ॐपृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा।**
**ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधे पदं समूढमस्यपाꣳसुरे।**
**ॐ कृष्ण कव्यमिदं रक्ष मदीयम्।**

ततो वामहस्तेन सिद्धान्नं स्पृशन् दक्षिणहस्तस्य न्युब्जाङ्गुष्ठेन –
**इदमन्नम्** इति अन्नम्, **इमा आपः** इति जलम्, **इदमाज्यम्** इति आज्यम्, **इदं कव्यम्** इति सर्वं सिद्धान्नं स्पृशेत्। ततः सिद्धान्नं परितः तिलान् विकिरेत् –

**ॐ अपहता असुरा रक्षाꣳसि वेदिषदः।**

ततो वामहस्तेन सिद्धान्नं स्पृशन् दक्षिणहस्ते जलमोटकादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे दिवङ्गतपितामहाय अमुकगोत्राय अमुकामुकनामशर्मणे (वर्मणे/गुप्ताय) सङ्कर्षणस्वरूपाय इदमन्नं सोपस्करं ते स्वधा।**

**(स्त्री० – अद्य अमुकगोत्राया अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे दिवङ्गताप्रश्वश्र्वै अमुकदेव्यै हिरण्यास्वरूपायै इदमन्नं सोपस्करं ते स्वधा।)**

ततः वासुदेवस्य अग्रे एकभागसिद्धान्नं स्थापयित्वा मधुव्वातेति पठन् मधु निक्षिपेत् –

**ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः। मधुद्यौरस्तु नः पिता। ॐ मधुमान्नो व्वनस्पतिर्मधु माँ२ऽअस्तु सूर्य्यः। माध्वीर्गावो भवन्तु नः॥ ॐ मधु ॐ मधु ॐ मधु।**

ततो न्युब्जदक्षिणहस्तोपरि वामहस्तं न्युब्जीकृत्य सिद्धान्नं स्पृशेत् –

**ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृते ऽअमृतं जुहोमि स्वाहा। ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधे पदं समूढमस्यपाꣳसुरे। ॐ कृष्ण कव्यमिदं रक्ष मदीयम्।**

ततो वामहस्तेन सिद्धान्नं स्पृशन् दक्षिणहस्तस्य न्युब्जाङ्गुष्ठेन – **इदमन्नम्** इति अन्नम्, **इमा आपः** इति जलम्, **इदमाज्यम्** इत्याज्यम्, **इदं कव्यम्** इति सर्वं सिद्धान्नं स्पृशेत्। ततः सिद्धान्नं परितः तिलान् विकिरेत् –

**ॐ अपहता असुरा रक्षाꣳसि वेदिषदः।**

ततो वामहस्तेन सिद्धान्नं स्पृशन् दक्षिणहस्ते जलमोटकादिकमादाय –

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे दिवङ्गतप्रपितामहाय अमुकगोत्राय अमुकामुकनामशर्मणे (वर्मणे/ गुप्ताय) वासुदेवस्वरूपाय इदमन्नं सोपस्करं ते स्वधा। (स्त्री० – अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे दिवङ्गतावृद्धप्रश्वश्र्वै अमुकदेव्यै हरिणीस्वरूपायै इदमन्नं सोपस्करं ते स्वधा।)**

इति सर्वेभ्यः सिद्धान्नानि दत्वा **सव्येन** मधुव्वातेति पठन् प्रार्थयेत् -

**ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः। मधुद्यौरस्तु नः पिता। ॐ मधुमान्नो व्वनस्पतिर्मधु माँ२ऽअस्तु सूर्य्यः। माध्वीर्गावो भवन्तु नः॥ ॐ मधु ॐ मधु ॐ मधु।**

इति प्रार्थयित्वा विकिरदानं कुर्यात्।

## विकिरदानम्

**अपसव्येन** दक्षिणाभिमुखो भूत्वा प्रद्युम्नादिपितॄणां दक्षिणपार्श्वे भूमौ जलेन सम्प्रोक्ष्य विकिरदानाय कुशत्रयस्य आसनं दद्यात्। हस्ते मोटकादिकमादाय -

**असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्।**
**उच्छिष्टभागधेयानां दर्भेषु विकिरासनम्॥**

इति आसनं दत्वा सतिलघृतमन्नमादाय जलेनाप्लाव्य-

**अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम।**
**भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥**

इति आस्तृतकुशोपरि तदन्नं विकिरेत्। ततः तत्रैव पवित्रादिकं विसर्जयित्वा **सव्येन** हस्तौ पादौ च प्रक्षाल्य आचम्य हरिं स्मरेत्।

## अथ पिण्डदानविधिः

ततः **अपसव्येन** घृतशर्करासंयुक्तेन पायसेन विल्व-फलोपमान् वर्तुलान् त्रीन् पिण्डान्, किञ्चिल्लम्वायमानं नारिकेलफलसदृशम् एकपिण्डञ्च कुर्यात्। ततः अनिरुद्धस्याग्रे दिवङ्गतपिण्डदानार्थम् एकां पृथक् पिण्डवेदीम्, प्रद्युम्नादीनामग्रे पितृपिण्डदानार्थमपरां चतुरङ्गुलोच्छ्रितां दक्षिणप्लवां पिण्डवेदीं कुर्यात्।

**दिवङ्गतपिण्डवेदिकायां रेखोल्लेखनम् अङ्गारभ्रामणादिकं च न कर्तव्यम्। पितृपिण्डवेद्यान्तु रेखोल्लेखनम् अङ्गारभ्रामणादिकं च कर्तव्यम्।**

## दिवङ्गतपिण्डदानम्

ततः दिवङ्गतपिण्डवेद्यां पुष्पाणि छिन्नमूलकुशानि च आस्तीर्य अवनेजनार्थम् एकस्मिन् पुटके तिलजलचन्दनपुष्पाणि निक्षिप्य तत् पुटकं हस्ते गृहीत्वा कर्मपात्रस्थजलकुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामदिवङ्गत सपिण्डीकरणश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते सपिण्डीकरणश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

इति सङ्कल्प्य वेद्यां कुशं स्थापयित्वा तत्कुशोपरि पुटकस्थं किञ्चिज्जलं पितृतीर्थेन दद्यात्। शेषजलयुतं पुटकं तु तत्रैव अग्रे स्थापयेत्।

ततः पूर्वनिर्मितं नारिकेलफलसदृशं पिण्डं दक्षिणहस्ते गृहीत्वा जलकुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत सपिण्डीकरणश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते सपिण्डीकरणश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।)**

इति पितृतीर्थेन कुशोपरि पिण्डं दद्यात्। ततः हस्तौ प्रक्षाल्य पूर्वस्थापितं जलयुतं पुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत सपिण्डीकरणश्राद्धे पिण्डोपरि इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।**

**(स्त्री० – अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते सपिण्डीकरणश्राद्धे पिण्डोपरि इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।)**

इति सङ्कल्प्य पितृतीर्थेन पिण्डोपरि पुटकस्थं सर्वं जलं दत्वा पिण्डोपरि वामहस्तेन धृतं सूत्रं दक्षिणहस्तेन आदाय मन्त्रपाठं विना –

**दिवङ्गत एतत्ते वासः** इति सूत्रं दत्वा आचमनीय–गन्ध–पुष्पाक्षत–तिल–पुष्प–धूप–दीप–नैवेद्य–पुनराचमनीय–दक्षिणादीनि समर्प्य हस्ते जलकुशादिकमादाय सङ्कल्पं कुर्यात् –

**अद्य अमुकगोत्र अमुकनामन् दिवङ्गत सपिण्डीकरणश्राद्धे दिवङ्गतपिण्डोपरि एतानि अर्चनानि सूत्र-आचमनीय-गन्ध-पुष्पाक्षत-तिल-पुष्प-धूप-दीप-नैवेद्य-पुनराचमनीयदक्षिणादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

**(स्त्री० - अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते सपिण्डीकरणश्राद्धे दिवङ्गतपिण्डोपरि एतानि अर्चनानि सूत्र-आचमनीय-गन्ध-पुष्पाक्षत-तिल-पुष्प-धूप-दीप-नैवेद्य-पुनराचमनीय-दक्षिणादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।)**

## पितृपिण्डदानम्

ततः प्रद्युम्नादिव्यूहपिण्डवेद्याः अग्रे उपविश्य **अपसव्येन** कुशत्रयस्य मूलभागं दक्षिणहस्तेन गृहीत्वा अग्रभागं वामहस्तस्य अङ्गुष्ठतर्जनीभ्यां गृहीत्वा प्रद्युम्नादिव्यूहपिण्डवेद्याम् उत्तरतः दक्षिणक्रमेण रेखात्रयम् -

**ॐ अपहता असुरा रक्षाᳪसि वेदिषदः।**

इति मन्त्रेण कृत्वा तत्कुशम् ईशानकोणे क्षिपेत्। ततः

**ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति।**
**परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात्॥**

इति मन्त्रेण वेद्याम् अङ्गारं वामावर्तेन भ्रामयित्वा वेद्याः दक्षिणतः क्षिपेत्। ततः वेद्यां पुष्पाणि छिन्नमूलकुशानि च आस्तीर्य प्रद्युम्नादीनाम् अग्रे अवनेजनार्थं पृथक् पृथक् पुटकत्रयं स्थापयित्वा तेषु जलं तिलान् पवित्रञ्च निक्षिप्य प्रद्युम्नस्य अग्रे स्थितं पुटकं हस्ते गृहीत्वा जलमोटकादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकदिवङ्गतस्य सपिण्डीकरणश्राद्धे अमुकगोत्र दिवङ्गतपितः अमुकनामशर्मन् (वर्मन्/गुप्त) प्रद्युम्नस्वरूप पिण्डस्थाने अत्रावनेनिक्ष्व ते नमः।**

**(स्त्री० – ॐ अद्य अमुकगोत्रायाः अमुकदिवङ्गतायाः सपिण्डीकरणश्राद्धे अमुकगोत्रे दिवङ्गताश्वश्रु अमुकदेवि सत्यास्वरूपे पिण्डस्थाने अत्रावनेनिक्ष्व ते नमः ।)**

इति प्रद्युम्नाग्रे वेद्यां मोटकं स्थापयित्वा तदुपरि पितृतीर्थेन किञ्चिज्जलं दत्वा तत्पुटकं तत्रैव स्थापयेत् ।

पुनः सङ्कर्षणस्य अग्रे स्थितं पुटकं हस्ते गृहीत्वा जलमोटकादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे अमुकगोत्र दिवङ्गतपितामह अमुकनामशर्मन् (वर्मन्/गुप्त) सङ्कर्षणस्वरूप पिण्डस्थाने अत्रावनेनिक्ष्व ते नमः ।**

**(स्त्री० – ॐ अद्य अमुकगोत्रायाः अमुकदिवङ्गतायाः सपिण्डीकरणश्राद्धे अमुकगोत्रे दिवङ्गताप्रश्वश्रु अमुकदेवि हिरण्यास्वरूपे पिण्डस्थाने अत्रावनेनिक्ष्व ते नमः ।)**

इति सङ्कर्षणस्य अग्रे वेद्यां मोटकं स्थापयित्वा तदुपरि पितृतीर्थेन किञ्चिज्जलं दत्वा तत्पुटकं तत्रैव स्थापयेत् ।

पुनः वासुदेवस्य अग्रे स्थितं पुटकं हस्ते गृहीत्वा जलमोटकादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकदिवङ्गतस्य सपिण्डीकरणश्राद्धे अमुकगोत्र दिवङ्गतप्रपितामह अमुकनामशर्मन् (वर्मन्/गुप्त) वासुदेवस्वरूप पिण्डस्थाने अत्रावनेनिक्ष्व ते नमः ।**

**(स्त्री० – ॐ अद्य अमुकगोत्रायाः अमुकदिवङ्गतायाः सपिण्डीकरणश्राद्धे अमुकगोत्रे दिवङ्गतावृद्धप्रश्वश्रु अमुकदेवि हरिणीस्वरूपे पिण्डस्थाने अत्रावनेनिक्ष्व ते नमः ।)**

इति वासुदेवाग्रे वेद्यां मोटकं स्थापयित्वा तदुपरि पितृतीर्थेन किञ्चिज्जलं दत्वा तत्पुटकं तत्रैव स्थापयेत् ।

ततः तिलघृतमधुयुतम् एकपिण्डं हस्ते गृहीत्वा मोटकजलादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकदिवङ्गतस्य सपिण्डीकरणश्राद्धे अमुकगोत्र दिवङ्गतपितः अमुकनामशर्मन् (वर्मन्/गुप्त) प्रद्युम्नस्वरूप एषः अन्नपिण्डः अमृतस्वरूपस्ते स्वधा।**

**(स्त्री० - ॐ अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे अमुकगोत्रे दिवङ्गताश्वश्रु अमुकदेवि सत्यास्वरूपे एषः अन्नपिण्डः अमृतस्वरूपस्ते स्वधा।)**

इति प्रद्युम्नस्य अवनेजनोपरि पितृतीर्थेन पिण्डं दद्यात्। पुनः अपरं पिण्डं हस्ते गृहीत्वा मोटकजलादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे अमुकगोत्र दिवङ्गतपितामह अमुकनामशर्मन् (वर्मन्/गुप्त) सङ्कर्षणस्वरूप एषः अन्नपिण्डः अमृतस्वरूपस्ते स्वधा।**

**(स्त्री० - ॐ अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे अमुकगोत्रे दिवङ्गताप्रश्वश्रु अमुकदेवि हिरण्यास्वरूपे एषः अन्नपिण्डः अमृतस्वरूपस्ते स्वधा।)**

इति सङ्कर्षणस्य अवनेजनोपरि पितृतीर्थेन पिण्डं दद्यात्। पुनः अपरं पिण्डं हस्ते गृहीत्वा मोटकजलादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे अमुकगोत्र दिवङ्गतप्रपितामह अमुकनामशर्मन् (वर्मन्/गुप्त) वासुदेवस्वरूप एषः अन्नपिण्डः अमृतस्वरूपस्ते स्वधा।**

**(स्त्री० - ॐ अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे अमुकगोत्रे दिवङ्गतावृद्धप्रश्वश्रु अमुकदेवि हरिणीस्वरूपे एषः अन्नपिण्डः अमृतस्वरूपस्ते स्वधा।)**

इति वासुदेवस्य अवनेजनोपरि पितृतीर्थेन पिण्डं दद्यात्। ततः

**लेपभागभुजः पितरस्तृप्यन्ताम्** इति पिण्डशेषान्नं कुशाग्रभागे दत्वा कुशमूलभागेन वारत्रयं हस्तं प्रोक्ष्य सव्येन आचम्य हरिं स्मरेत्। ततः अपसव्येन प्रत्यवनेजनं दद्यात्।

प्रथमं प्रद्युम्नस्य अग्रे स्थापितम् अवनेजनपुटकं हस्ते गृहीत्वा जलमोटकादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुककनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे अमुकगोत्र दिवङ्गतपितः अमुकशर्मन् (वर्मन्/गुप्त) प्रद्युम्नस्वरूप पिण्डोपरि प्रत्यवनेनिक्ष्व ते नमः।**
**(स्त्री० – ॐ अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे अमुकगोत्रे दिवङ्गताश्वश्रु अमुकदेवि सत्यास्वरूपे पिण्डोपरि प्रत्यवनेनिक्ष्व ते नमः।)**

इति प्रथमपिण्डोपरि जलं दत्वा पुनः द्वितीयं सङ्कर्षणस्य अग्रे स्थापितम् अवनेजनपुटकं हस्ते गृहीत्वा जलमोटकादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरण श्राद्धे अमुकगोत्र दिवङ्गतपितामह अमुकशर्मन् (वर्मन्/गुप्त) सङ्कर्षणस्वरूप पिण्डोपरि प्रत्यवनेनिक्ष्व ते नमः।**
**(स्त्री० – ॐ अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डी–करणश्राद्धे अमुकगोत्रे दिवङ्गताप्रश्वश्रु अमुकदेवि हिरण्यास्वरूपे पिण्डोपरि प्रत्यवनेनिक्ष्व ते नमः।)**

इति द्वितीयपिण्डोपरि जलं दत्वा पुनः तृतीयं वासुदेवस्य अग्रे स्थापितम् अवनेजनपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे अमुकगोत्र दिवङ्गतप्रपितामह अमुकशर्मन् (वर्मन्/गुप्त) वासुदेस्वरूप पिण्डोपरि प्रत्यवनेनिक्ष्व ते नमः।**

**(स्त्री० – ॐ अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डी-करणश्राद्धे अमुकगोत्रे दिवङ्गतावृद्धप्रश्वश्रु अमुकदेवि हरिणीस्वरूपे पिण्डोपरि प्रत्यवनेनिक्ष्व ते नमः।)**

इति तृतीयपिण्डोपरि जलं दद्यात्।

ततो नीवीं विस्रस्य ऐशान्यां क्षिपेत्। ततः सव्येन आचम्य अपसव्येन वक्ष्यमाणमन्त्रं पठन् वामेन पाणिना धृतं सूत्रं दक्षिणहस्तेन आदाय त्रिषु पिण्डेषु पृथक् पृथक् सूत्रं दद्यात् –

**ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वःपितरो जीवाय नमो वः पितरः स्वधायै नमो वःपितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वः देष्मैतद्वः पितरो वासः।**

ततो हस्ते जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्र दिवङ्गतपितः अमुकशर्मन् (वर्मन्/गुप्त) सपिण्डीकरणश्राद्धपिण्डे एतत्ते वासः स्वधा।**

**(स्त्री० – अद्य अमुकगोत्रे दिवङ्गताश्वश्रु अमुकदेवि सपिण्डीकरणश्राद्धपिण्डे एतत्ते वासः स्वधा।)**

इति प्रथमपिण्डोपरि उत्सृजेत्। पुनः हस्ते जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्र दिवङ्गतपितामह अमुकशर्मन् (वर्मन्/गुप्त) सपिण्डीकरणश्राद्धपिण्डे एतत्ते वासः स्वधा।**

**(स्त्री० – अद्य अमुकगोत्रे दिवङ्गताप्रश्वश्रु अमुकदेवि सपिण्डीकरणश्राद्धपिण्डे एतत्ते वासः स्वधा।)**

इति द्वितीयपिण्डोपरि उत्सृजेत्। पुनः हस्ते जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्र दिवङ्गतप्रपितामह अमुकशर्मन् (वर्मन्/गुप्त) सपिण्डीकरणश्राद्धपिण्डे एतत्ते वासः स्वधा।**

(स्त्री० - अद्य अमुकगोत्रे दिवङ्गतावृद्धप्रश्वश्रु अमुकदेवि सपिण्डीकरण-श्राद्धपिण्डे एतत्ते वासः स्वधा।)

इति तृतीयपिण्डोपरि उत्सृजेत्।

ततो जलगन्धपुष्पाधूपदीपनैवेद्याचमनीयफलताम्बूलदक्षिणादीभिः पिण्डान् पूजयित्वा हस्ते जलकुशाादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य सपिण्डीकरणश्राद्धे दिवङ्गतपितृपितामहप्रपितामहाः अमुकगोत्राः अमुकामुकशर्माणः (वर्माणः/गुप्ताः) प्रद्युम्नसङ्कर्षणवासुदेवस्वरूपाः पिण्डोपरि एतानि अर्चनानि जल-गन्ध-पुष्पाक्षत-धूप-दीप-नैवेद्याचमनीय-फल-ताम्बूल-दक्षिणादीनि युष्मभ्यं स्वधा।**

**(स्त्री० - ॐ अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः सपिण्डीकरणश्राद्धे दिवङ्गता-श्वश्रू-प्रश्वश्रू-वृद्धप्रश्वश्र्वः अमुकगोत्राः अमुकामुकदेव्यः सत्याहिरण्याहरिणीस्वरूपाः पिण्डोपरि एतानि अर्चनानि जलगन्धपुष्पाक्षतधूपदीप-नैवेद्याचमनीयफलताम्बूलदक्षिणादीनि युष्मभ्यं स्वधा।)**

इति सङ्कल्पजलमुत्सृजेत्।

## पिण्डमेलनविधिः

अथ दिवङ्गतपिण्डस्याग्रे आगत्य **अपसव्येनैव** दिवङ्गतपिण्डोपरि वर्तमानानि सर्वाणि पुष्पादीनि निष्काश्य तं पिण्डम् एकस्मिन् पुटके उत्तरदक्षिणक्रमेण स्थापयेत्। ततः पिण्डमेलनार्थं सङ्कल्पं कुर्यात्। जलकुशादिकमादाय -

**अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य पिण्डं तत्पित्रादिपिण्डैः सह संयोजयिष्ये।**

**(स्त्री० – अद्य अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः पिण्डं तच्छ्वश्र्वादिपिण्डैः सह संयोजयिष्ये ।**

इति सङ्कल्प्य लम्बायमानं सुवर्णतन्तुम्, रौप्यतन्तुम्, कुशं वा द्वाभ्यां हस्ताभ्यां गृहीत्वा पिण्डोपरि बलेन स्थापयित्वा वक्ष्यमाणमन्त्रं पठन् तं पिण्डं समानं त्रेधा विभजेत् –

**ॐ ये समानाः समनसः पितरो यमराज्ये ।**
**तेषाँल्लोकःस्वधानमो यज्ञो देवेषु कल्पताम् ।**
**ॐ ये समानाः समनसो जीवा जीवेषु मामकाः ।**
**तेषाꣳ श्री मयि कल्पतामस्मिँल्लोके शतꣳ समाः ॥**

इति त्रेधा विभज्य भागत्रयमपि पितृपिण्डवेद्याः अग्रे स्थापयेत् । ततः पितृपिण्डानामुपरि वर्तमानानि पुष्पादीनि निष्काश्य वामजानु पातयित्वा नारायणं स्मरन् दक्षिणहस्तेन दिवङ्गतपिण्डस्य प्रथमभागमादाय, वामहस्तेन दिवङ्गतपितृपिण्डम् आदाय वक्ष्यमाणवाक्यं मन्त्रान् च पठेत् –

**अद्य अमुकगोत्रम् अमुकनामानं दिवङ्गतम् अमुकनाम्नि प्रद्युम्नस्वरूपे तत्पितरि विलापयामि ।**
**(स्त्री० – अद्य अमुकगोत्राम् अमुकनाम्नीं दिवङ्गताम् अमुकनाम्न्यां सत्यास्वरूपायां तच्छ्वश्र्वां विलापयामि ।)**

**ॐ ये समानाः समनसः पितरो यमराज्ये ।**
**तेषाँल्लोकःस्वधानमो यज्ञो देवेषु कल्पताम् ।**
**ॐ ये समानाः समनसो जीवा जीवेषु मामकाः ।**
**तेषाꣳ श्रीर्मयि कल्पतामस्मिँल्लोके शतꣳ समाः ॥**
**ॐ संसृजन्तु त्वा पृथिवी वायुरग्निः प्रजापतिः ।**
**संसृजध्वं पूर्वेभिः पितृभिः सह ।**
**ॐ समानीआकूतिः समानाहृदयानिवः ।**

**समानमस्तुवोमनोयथानः सुसहासति ॥**

**ॐ सङ्गच्छध्वं संवदध्वं संवोमनांसि जानताम्।**

**देवाभागंयथापूर्वे सञ्जानानाउपासते ॥**

**ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः।**

**माध्वीर्नः सन्त्वोषधीः।**

**ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ६ रजः। मधुद्यौरस्तु नः पिता।**

**ॐ मधुमान्नो व्वनस्पतिर्मधु माँ२ऽअस्तु सूर्य्यः।**

**माध्वीर्गावो भवन्तु नः ॥**

इति मन्त्रान् पठित्वा –

**अमुकगोत्र अमुकदिवङ्गत अमुकगोत्रेण स्वपित्रा अमुकशर्मणा (वर्मणा/गुप्तेन) प्रद्युम्नस्वरूपेण सह संसृजस्व।**
**(स्त्री० – अमुकगोत्रे अमुकदिवङ्गते अमुकगोत्रया स्वश्वश्र्वा अमुकदेव्या सत्यास्वरूपया सह संसृजस्व।)**

इति वदन् दिवङ्गतपितृपिण्डेन (दिवङ्गताश्वश्रूपिण्डेन) सह संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कृत्वा प्रद्युम्नस्याग्रे स्थापयेत्।

**द्वितीयभागमेलनम् –**

पुनः वामजानु पातयित्वा नारायणं स्मरन् दक्षिणहस्तेन दिवङ्गतपिण्डस्य द्वितीयभागमादाय, वामहस्तेन दिवङ्गतपितामहपिण्डम् आदाय वक्ष्यमाणवाक्यं मन्त्रान् च पठेत् –

**अद्य अमुकगोत्रम् अमुकनामानं दिवङ्गतम् अमुकनाम्नि संकर्षणस्वरूपे तत्पितामहे विलापयामि।**

**(स्त्री० – अद्य अमुकगोत्राम् अमुकनाम्नीं दिवङ्गताम् अमुकनाम्न्यां हिरण्यास्वरूपायां तत्प्रश्वश्र्वां विलापयामि।)**

ॐ ये समानाः समनसः पितरो यमराज्ये।
तेषाँल्लोकः स्वधानमो यज्ञो देवेषु कल्पताम्।
ॐ ये समानाः समनसो जीवा जीवेषु मामकाः।
तेषाᳮश्रीर्मयि कल्पतामस्मिँल्लोके शतᳬ समाः॥
ॐ संसृजन्तु त्वा पृथिवी वायुरग्निः प्रजापतिः।
संसृजध्वं पूर्वेभिः पितृभिः सह।
ॐ समानीआकूतिः समानाहृदयानिवः।
समानमस्तुवोमनोयथानः सुसहासति॥
ॐ सङ्गच्छध्वं संवदध्वं संवोमनांसि जानताम्।
देवाभागंयथापूर्वे सञ्जानानाउपासते॥
ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः।
माध्वीर्नः सन्त्वोषधीः।
ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ᳬ रजः। मधुद्यौरस्तु नः पिता।
ॐ मधुमान्नो व्वनस्पतिर्मधु माँ२ऽअस्तु सूर्य्यः।
माध्वीर्गावो भवन्तु नः॥

इति मन्त्रान् पठित्वा -

**अमुकगोत्र अमुकदिवङ्गत अमुकगोत्रेण स्वपितामहेन अमुकशर्मणा(वर्मणा/गुप्तेन) सङ्कर्षणस्वरूपेण सह संसृजस्व। (स्त्री० - अमुकगोत्रे अमुकदिवङ्गते अमुकगोत्रया स्वप्रश्वश्र्वा अमुकदेव्या हिरण्यास्वरूपया सह संसृजस्व।)**

इति वदन् दिवङ्गतपितामहपिण्डेन (दिवङ्गताप्रश्वश्रूपिण्डेन) सह संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कृत्वा सङ्कर्षणस्याग्रे स्थापयेत्।

तृतीयभागमेलनम् –

पुनः वामजानु पातयित्वा नारायणं स्मरन् दक्षिणहस्तेन दिवङ्गतपिण्डस्य तृतीयभागमादाय, वामहस्तेन दिवङ्गतप्रपितामहपिण्डम् आदाय वक्ष्यमाणवाक्यं मन्त्रान् च पठेत् –

**अद्य अमुकगोत्रम् अमुकनामानं दिवङ्गतम् अमुकनाम्नि वासुदेवस्वरूपे तत्प्रपितामहे विलापयामि।**

**(स्त्री० – अद्य अमुकगोत्राम् अमुकनाम्नीं दिवङ्गताम् अमुकनाम्न्यां हरिणीस्वरूपायां तद्वृद्धप्रश्वश्र्वां विलापयामि।)**

**ॐये समानाः समनसः पितरो यमराज्ये।**
**तेषाँल्लोकः स्वधानमो यज्ञो देवेषु कल्पताम्।**
**ॐ ये समानाः समनसो जीवा जीवेषु मामकाः।**
**तेषाꣳश्रीर्मयि कल्पतामस्मिँल्लोके शतꣳ समाः॥**
**ॐ संसृजन्तु त्वा पृथिवी वायुरग्निः प्रजापतिः।**
**संसृजध्वं पूर्वेभिः पितृभिः सह।**
**ॐ समानीआकूतिः समानाहृदयानिवः।**
**समानमस्तुवोमनोयथानः सुसहासति॥**
**ॐ सङ्गच्छध्वं संवदध्वं संवोमनांसि जानताम्।**
**देवाभागंयथापूर्वे सञ्जानानाउपासते॥**
**ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः।**
**माध्वीर्नः सन्त्वोषधीः।**
**ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳ रजः। मधुद्यौरस्तु नः पिता।**
**ॐ मधुमान्नो व्वनस्पतिर्मधुमाँ२ऽअस्तु सूर्य्यः।**
**माध्वीर्गावो भवन्तु नः॥**

इति मन्त्रान् पठित्वा

**अमुकगोत्र अमुकदिवङ्गत अमुकगोत्रेण स्वप्रपितामहेन अमुकशर्मणा (वर्मणा/गुप्तेन) वासुदेवस्वरूपेण सह संसृजस्व। (स्त्री० – अमुकगोत्रे अमुकदिवङ्गते अमुकगोत्रया स्ववृद्धप्रश्वश्वा अमुकदेव्या हरिणीस्वरूपया सह संसृजस्व।)**

इति वदन् दिवङ्गतप्रपितामहपिण्डेन (दिवङ्गतावृद्धप्रश्वश्रूपिण्डेन) सह संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कृत्वा वासुदेवस्याग्रे स्थापयेत्।

ततः पिण्डत्रयं सूत्रजलगन्धपुष्पाक्षततिलधूपदीपनैवेद्याचमनीय-फलदक्षिणातुलसीदलादिभिः सम्पूज्य हस्ते जलमोटकादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकशर्मणः (वर्मणः/गुप्तस्य) सपिण्डीकरणश्राद्धपिण्डेषु अमुकगोत्राः तदीयपितृपितामह-प्रपितामहाः अमुकामुकशर्माणः (वर्माणः/गुप्ताः) प्रद्युम्नसङ्कर्षणवासुदेवस्वरूपाः एतानि अर्चनानि युष्मभ्यं स्वधा।**

**(स्त्री० – ॐ अद्य अमुकगोत्रायाः अमुकदेव्याः सपिण्डीकरणश्राद्धपिण्डेषु अमुकगोत्राः तदीयाश्वश्रू-प्रश्वश्रू-वृद्धप्रश्वश्वः अमुकामुकदेव्यः सत्याहिरण्याहरिणीस्वरूपाः एतानि अर्चनानि युष्मभ्यं स्वधा।)**

इति सङ्कल्प्य जलादिकमुत्सृजेत्। ततः गोदुग्धेन स्नापयित्वा वस्त्रेण आच्छाद्य नीराजनं विधाय हस्ते पुष्पाण्यादाय महापुरुषविद्यया प्रार्थयेत् –

## महापुरुषविद्या

ॐतस्मान्न्यासमेषां तपसामतिरिक्तमाहुर्वसुरण्वोविभूरसिप्राणे त्वमसि सन्धाता ब्रह्मन् त्वमसि विश्वसृत्तेजोदास्त्वमस्यग्नि-रसिवर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमसः उपयामगृहीतोसि ब्रह्मणे त्वा महसे ओमित्यात्मानं युञ्जीत । तस्यैवं विदुषो यज्ञस्यात्मा यजमानश्श्रद्धापत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोग्निश्शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्यु र्मनोब्रह्मा श्रोत्रमग्नीद्यावद्ध्रियते सा दीक्षा यदश्नाति यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदोयत्संचरत्युपविशतित्युत्तिष्ठते च सप्रवर्ग्यो यन्मुखं तदाहवनीयो यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधो यत्प्रातर्मध्यंदिनँसायं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्चते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये संवथ्सराश्च परिवथ्सराश्च तेऽहर्गणास् सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथ एतद्वै जरामर्यमग्निहोत्रं सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यङ्गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानम् आप्नोति तस्मात् ब्रह्मणो महिमानम् ॥

ॐ शान्तिः ॐ शान्तिः ॐ शान्तिः ।

ॐ वेदान्त विज्ञान सुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्वाः।
ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ॥

इति प्रार्थयित्वा कर्मपात्रोदकेन स्वशिरसि अभिषिञ्चेत् –

**ॐ अस्मत्कुले दीर्घमायुरस्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ यद्यच्छ्रेयस्तदस्तु।**

ततः भूमौ अभिषिञ्चेत् **ॐ यत्पापं तत्प्रतिहतमस्तु।**

पुनः शिरसि **ॐ द्विपदेचतुष्पदेभ्यः शान्तिरस्तु।**

## अक्षय्योदकदानम्

ततः विश्वेदेवमण्डलमागत्य **सव्येन** विश्वेदेवानामग्रे

**ॐ शिवा आपः सन्तु** इति जलम्,
**ॐ सौमनस्यमस्तु** इति पुष्पम्,
**ॐ अक्षतं चारिष्टं चास्तु** इति यवान् उत्सृजेत्।

ततो हस्ते जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकशर्मणः (वर्मणः/गुप्तस्य) सपिण्डीकरणश्राद्धे अमुकगोत्राणां तदीयपितृपितामह-प्रपितामहानाम् अमुकामुकशर्मणाम्(वर्मणाम्/गुप्तानाम्) प्रद्युम्नसङ्कर्षणवासुदेवस्वरूपाणां सपिण्डीकरणश्राद्धसम्बन्धिनां कामकालसंज्ञकानां विश्वेषां देवानां दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

**(स्त्री० – ॐ अद्य अमुकगोत्रायाः अमुकदेव्याः सपिण्डीकरणश्राद्धे अमुकगोत्राणां तदीयश्वश्रू-प्रश्वश्रू-वृद्धप्रश्व-श्रूणाम् अमुकामुकदेवीनां सत्याहिरण्याहरिणीस्वरूपाणां सपिण्डीकरणश्राद्धसम्बन्धिनां कामकालसंज्ञकानां विश्वेषां देवानां दत्तैतदन्नपानादिकम् अक्षय्यमस्तु॥)**

इति किञ्चिज्जलं विश्वेदेवानामग्रे दत्वा पुनः व्यूहमण्डलमागत्य **अपसव्येन** प्रद्युम्नसङ्कर्षणवासुदेवानामग्रे –

**ॐ शिवा आपः सन्तु** इति जलम्,

**ॐ सौमनस्यमस्तु** इति पुष्पम्,

**ॐ अक्षतं चारिष्टं चास्तु** इति अक्षतान् उत्सृजेत् । ततो हस्ते जलमोटादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकशर्मणः (वर्मणः/गुप्तस्य) सपिण्डीकरणश्राद्धे अमुकगोत्रस्य तदीयपितुः अमुकशर्मणः (वर्मणः/गुप्तस्य) प्रद्युम्नस्वरूपस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु ।**

**(स्त्री० – ॐ अद्य अमुकगोत्रायाः अमुकदेव्याः सपिण्डीकरणश्राद्धे अमुकगोत्रायाः तदीयश्वश्र्वाः अमुकदेव्याः सत्यास्वरूपायाः दत्तैतदन्नपानादिकम् अक्षय्यमस्तु ॥)**

इति प्रद्युम्नस्य पिण्डोपरि अक्षय्योदकं दद्यात् । पुनः जलमोटकादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकशर्मणः (वर्मणः/गुप्तस्य) सपिण्डीकरणश्राद्धे अमुकगोत्रस्य तदीयपितामहस्य अमुकशर्मणः (वर्मणः/गुप्तस्य) सङ्कर्षणस्वरूपस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु ।**

**(स्त्री० – ॐ अद्य अमुकगोत्रायाः अमुकदेव्याः सपिण्डीकरणश्राद्धे अमुकगोत्रायाः तदीयप्रश्वश्र्वाः अमुकदेव्याः हिरण्यास्वरूपायाः दत्तैतदन्नपानादिकम् अक्षय्यमस्तु ॥)**

इति सङ्कर्षणस्य पिण्डोपरि अक्षय्योदकं दद्यात् । पुनः जलमोटकादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकशर्मणः (वर्मणः/गुप्तस्य) सपिण्डी–करणश्राद्धे अमुकगोत्रस्य तदीयप्रपितामहस्य अमुकशर्मणः (वर्मणः/गुप्तस्य) वासुदेवस्वरूपस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु ।**

(स्त्री० – ॐ अद्य अमुकगोत्रायाः अमुकदेव्याः सपिण्डीकरणश्राद्धे अमुकगोत्रायाः तदीयवृद्धप्रश्वश्र्वाः अमुकदेव्याः हरिणीस्वरूपायाः दत्तैतदन्नपानादिकम् अक्षय्यम् अस्तु ॥)

इति वासुदेवस्य पिण्डोपरि अक्षय्योदकं दद्यात्।

ततः **सव्येन** दक्षिणाभिमुखो भूत्वा **ॐ अघोराः पितरः सन्तु** इति पिण्डत्रयोपरि पूर्वाग्रां जलधारां दद्यात् । ततः पूर्वाभिमुखो भूत्वा आशीषप्रार्थनां कुर्यात् –

यजमानः –

**ॐ गोत्रं नो वर्द्धताम्, दातारो नोऽभिवर्द्धन्ताम्। वेदाः सन्ततिरेव च। श्रद्धा च नो मा व्यगमद्, बहुदेयं च नोऽस्तु। अन्नं च नो बहु भवेत्, अतिथींश्च लभेमहि। याचितारश्च नः सन्तु, मा च याचिष्म कञ्चन। एताः सत्या आशिषः सन्तु॥**

ब्राह्मणः वदेत् –

**ॐ गोत्रं वो वर्द्धताम्, दातारो वोऽभिवर्द्धन्ताम्। वेदाः सन्ततिरेव च। श्रद्धा च वो मा व्यगमद्, बहुदेयं च वोऽस्तु। अन्नं च वोबहु भवेत्, अतिथींश्च लभध्वम्। याचितारश्च वः सन्तु, मा याचध्वम्। एताः सत्या आशिषः सन्तु॥**

ततः पिण्डोपरि दुग्धधारां दद्यात् –

**ॐ ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधा स्थ तर्पयत मे पितॄन्॥**

ततः नम्रीभूय पिण्डान् आघ्राय **अपसव्येन** उत्थाप्य एकस्मिन् पुटके स्थापयित्वा पिण्डाधारकुशान् वह्नौ क्षिपेत्। ततः **सव्येन** वेद्यां शङ्खचक्रे लिखित्वा गन्धयवपुष्पैः सम्पूजयेत् –

**ॐ चक्राय नमः, ॐ शङ्खाय नमः ।**

इति पूजयित्वा कर्पूरेण नीराजनं च कुर्यात् । पुनः तत्र वेद्यां पिण्डान् स्थापयित्वा वसन्तादिपूजनं कुर्यात् (अत्रैव कर्तुः भ्रातरः, पत्नी, भ्रातृवध्वः, भगिन्यश्च गन्धपुष्पाक्षतधूपदीपनैवेद्याचमनीयताम्बूल-दक्षिणाप्रदक्षिणानीराजनादिभिः पिण्डान् पूजयेयुः) –

**ॐ नमो विष्णुपदस्थेभ्यः स्वधाः वः पितरो नमः ।**
**हरये पितृनाथाय अग्निसोमात्मने नमः ॥**
**ससोमपात्मने विष्णो नमो वर्हिषदात्मने ।**
**आसंसाराभिजनका अग्निष्वाता तथाच्युत ॥**
**पितामहाः सोमपास्त्वं त्वमन्ये प्रपितामहाः ।**
**तुभ्यं नमो भगवते पितृमूर्तेऽच्युताय च ॥**
**पिता पितामहश्चैव तथैव प्रपितामहः ।**
**मम तृप्तिं प्रयान्त्वद्य होमाप्यायितमूर्तयः ॥**
**पिता पितामहश्चैव तथैव प्रपितामहः ।**
**तृप्तिं प्रयान्तु पिण्डेन मया दत्तेन भूतले ॥**
**ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः ।**
**वर्षाभ्यश्च शरत्संज्ञऋतवे च नमो नमः ॥**
**हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ।**
**माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ॥**

हवने आवाहितान् देवान् विष्वक्सेनं ब्रह्माणमग्निं च सम्पूज्य विसर्जयेत् । परिस्तरणकुशान् अग्नौ जुहुयात् –

**ॐ समुद्रं वः प्रहिणोमि स्वां योनिमधिगच्छत ।**
**अरिष्टास्माकं वीरामापरासेचिमत्पयः ॥**

ततः प्रार्थयेत् -

**यस्य स्मृत्या च नामोक्त्या जपयज्ञक्रियादिषु।**
**न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥**
**ॐअच्युताय नमः, ॐअच्युताय नमः, ॐअच्युताय नमः ।**

## दक्षिणादानम्

ततः पञ्चसु पुटकेषु यथाशक्ति प्रभूतदक्षिणाद्रव्यं सज्जीकृत्य विश्वेदेवमण्डलं गत्वा विश्वेदेवार्घपात्रं सञ्चाल्य हस्ते सद्रव्यजलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रः अमुकशर्मा (वर्मा/गुप्तः) अहम् अमुकगोत्रस्य अमुकशर्मणः (वर्मणः/गुप्तस्य) सपिण्डीकरणश्राद्धे अमुकगोत्राणां तदीयपितृपितामह-प्रपितामहानाम् अमुकामुकशर्मणाम् (वर्मणाम्/गुप्तानाम्) प्रद्युम्नसङ्कर्षणवासुदेवस्वरूपाणां सपिण्डीकरणश्राद्ध-सम्बन्धिनां कामकालसंज्ञकानां विश्वेषां देवानां श्राद्धप्रतिष्ठार्थम् इमां दक्षिणाम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय भवते सम्प्रददे।**

**(स्त्री० - ॐ अद्यामुकगोत्रः अमुकशर्मा (वर्मा/गुप्तः) अहम् अमुकगोत्रायाः अमुकदेव्याः सपिण्डीकरणश्राद्धे अमुकगोत्राणां तदीयश्वश्रू-प्रश्वश्रू-वृद्धप्रश्वश्रूणाम् अमुकामुकदेवीनां सत्याहिरण्याहरिणीस्वरूपाणां सपिण्डी-करणश्राद्धसम्बन्धिनां कामकालसंज्ञकानां विश्वेषां देवानां श्राद्धप्रतिष्ठार्थम् इमां दक्षिणाम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय भवते सम्प्रददे।)**

ततः अनिरुद्धवेद्याः अग्रे आगत्य **अपसव्येन** तदर्घपात्रं सञ्चाल्य **सव्येन** हस्ते द्रव्यसहितं जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रः अमुकशर्मा (वर्मा/गुप्तः) अहम् अमुकगोत्रस्य अमुकशर्मणः (वर्मणः/गुप्तस्य) सपिण्डीकरणश्राद्धे दिवङ्गतश्राद्धप्रतिष्ठार्थम् इमां दक्षिणां राष्ट्रमुद्रां विष्णुदैवतां अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय भवते सम्प्रददे।**

**(स्त्री० – ॐ अद्यामुकगोत्रः अमुकशर्मा(वर्मा/गुप्तः) अहम् अमुकगोत्रायाः अमुकदेव्याः सपिण्डीकरणश्राद्धे दिवङ्गताश्राद्धप्रतिष्ठार्थम् इमां दक्षिणां राष्ट्रमुद्रां विष्णुदैवतां अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय भवते सम्प्रददे।)**

इति दिवङ्गतश्राद्धदक्षिणां दद्यात्। ततः व्यूहवेद्याः अग्रे आगत्य **अपसव्येन** पितृपितामहप्रपितामहानाम् अर्घपात्राणि सञ्चाल्य उत्तानीकृत्य **सव्येन** हस्ते सद्रव्यं जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रः अमुकशर्मा (वर्मा/गुप्तः) अहम् अमुकगोत्रस्य अमुकशर्मणः (वर्मणः/गुप्तस्य) सपिण्डीकरण-श्राद्धे अमुकगोत्राणां तदीयपितृपितामहप्रपितामहानाम् अमुकामुकशर्मणाम् (वर्मणाम्/गुप्तानाम्) प्रद्युम्नसङ्कर्षण-वासुदेवस्वरूपाणां सपिण्डीकरणश्राद्धप्रतिष्ठार्थम् इमां दक्षिणां राष्ट्रमुद्रां विष्णुदैवतां अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय भवते सम्प्रददे।**

**(स्त्री० – ॐ अद्यामुकगोत्रः अमुकशर्मा (वर्मा/गुप्तः) अहम् अमुकगोत्रायाः अमुकदेव्याः सपिण्डीकरणश्राद्धे अमुकगोत्राणां तदीयश्वश्रू-प्रश्वश्रू-वृद्धप्रश्वश्रूणाम् अमुकामुकदेवीनां सत्याहिरण्याहरिणीस्वरूपाणां सपिण्डी-करणश्राद्धप्रतिष्ठार्थम् इमां दक्षिणाम् राष्ट्रमुद्रां विष्णुदैवताम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय भवते सम्प्रददे।)**

इति पितृश्राद्धदक्षिणां दत्वा भूयसीदक्षिणार्थे हस्ते सद्रव्यं जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रः अमुकशर्मा (वर्मा/गुप्तः) अहम् अमुकगोत्रस्य अमुकशर्मणः(वर्मणः/गुप्तस्य) सपिण्डीकरण-श्राद्धे अमुकगोत्राणां तदीयपितृपितामहप्रपितामहानाम् अमुकामुकशर्मणाम् (वर्मणाम्/गुप्तानाम्) प्रद्युम्नसङ्कर्षण-वासुदेवस्वरूपाणां कृतैतत्सपिण्डीकरणश्राद्धप्रतिष्ठार्थम् इमां भूयसीदक्षिणाम् राष्ट्रमुद्रां विष्णुदैवताम् अमुकामुकगोत्रेभ्यः अमुकामुकशर्मभ्यः ब्राह्मणेभ्यः यथाभागं विभज्य दातुमहमुत्सृजे। (स्त्री० – ॐ अद्यामुकगोत्रः अमुकशर्मा (वर्मा/गुप्तः) अहम् अमुकगोत्रायाः अमुकदेव्याः सपिण्डीकरणश्राद्धे अमुकगोत्राणां तदीयश्वश्रू-प्रश्वश्रू-वृद्धप्रश्वश्रूणाम् अमुकामुकदेवीनां सत्याहिरण्या-हरिणीस्वरूपाणां कृतैतत्सपिण्डीकरणश्राद्धप्रतिष्ठार्थम् इमां भूयसीदक्षिणाम् राष्ट्रमुद्रां विष्णुदैवताम् अमुकामुकगोत्रेभ्यः अमुकामुकशर्मभ्यः ब्राह्मणेभ्यः यथाभागं विभज्य दातुमहमुत्सृजे ।) इति दक्षिणां दत्वा ब्राह्मणविसर्जनं कुर्यात्।**

## ब्राह्मणविसर्जनम्

तत्र प्रथमम् – **अभिरम्यताम्** इति कथयन् अनिरुद्धवेद्याम् अवाहितदिवङ्गतं विसर्जयेत्। ततः

**ॐ वाजे वाजे वत वाजिनो नोधनेषु विप्रा ऽअमृता ऽऋतज्ञाः।**
**अस्यमध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥**
**ॐ विष्णवे नमः**

इति मन्त्रं पठन् प्रद्युम्नादिव्यूहान् विसर्जयेत्।

ततः **विश्वेदेवाः प्रीयन्ताम्** इति वदन् यवान् विकीर्य विश्वेदेवान् विसर्जयेत्। ततः प्रार्थयेत् –

**ॐ नमो विष्णुपदस्थेभ्यः स्वधाः वः पितरो नमः।**
**हरये पितृनाथाय अग्निसोमात्मने नमः॥**
**ससोमपात्मने विष्णो नमो वर्हिषदात्मने।**
**आसंसाराभिजनका अग्निष्वाता तथाच्युत॥**
**पितामहाः सोमपास्त्वं त्वमन्ये प्रपितामहाः।**
**तुभ्यं नमो भगवते पितृमूर्तेऽच्युताय च॥**
**पिता पितामहश्चैव तथैव प्रपितामहः।**
**मम तृप्तिं प्रयान्त्वद्य होमाप्यायितमूर्तयः॥**
**पिता पितामहश्चैव तथैव प्रपितामहः।**
**तृप्तिं प्रयान्तु पिण्डेन मया दत्तेन भूतले॥**
**प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु च।**
**स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥**
**यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।**
**न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥**
**ॐ विष्णवे नमः ॐ विष्णवे नमः ॐ विष्णवे नमः॥**

ततो द्वादशविप्रान् भोजयित्वा द्वादशघटान् दत्वा प्रणमेत्। पिण्डान् जले क्षिपेत् । यथाशक्ति ब्राह्मणेभ्यः, स्वजातिबन्धूभ्यः, दीनानाथपंग्वन्ध-बधिरेभ्यश्च भोजनं दत्वा स्वयं भुञ्जीत॥

**॥ इति सपिण्डीकरणश्राद्धविधिः॥**

卐 卐 卐 卐

# ❀ विविधदानविधिः ❀

सपरिवारः कर्ता सपिण्डीकरणश्राद्धं समाप्य क्रियावस्त्राणि त्यक्त्वा, स्नात्वा, नूतनवस्त्राणि परिधाय, नूतनपूजासमग्रीः सम्पाद्य, हवनपद्धतिविधिना शुद्धशान्तिहवनादिकञ्च समाप्य आचम्य, प्राणानायम्य, अपरकर्मपात्रं विधाय अपवित्रेति मन्त्रेण दानस्थानं स्वात्मानञ्च परिषिच्य विविधदानानि कुर्यात्।

## तत्रादौ त्रयोदशपददानविधिः

**छत्रोपानहवस्त्राणि मुद्रिका च कमण्डलुः।**
**आसनं पञ्चपात्राणि पदं पञ्चविधं स्मृतम्॥**
**दण्डेन ताम्रपात्रेण ह्यामान्नैर्भोजनैरपि।**
**अर्थयज्ञोपवीतैश्च पदं सम्पूर्णतां व्रजेत्॥**

अत्र सति सम्भवे त्रयोदशवस्तूनाम् एकपदं कृत्वा, तादृशानि त्रयोदश पदानि त्रयोदशब्राह्मणेभ्यो दद्यात् नो चेत् त्रयोदशवस्तूनाम् एकपदं एकस्मै एव ब्राह्मणाय दद्यात्। पददानस्य सर्वाः सामग्रीः एकत्रीकृत्य कर्ममात्रं निर्माय तज्जलेन **अपवित्रः ...** इत्यादिमन्त्रेण कर्मभूमिं स्वात्मानञ्चाभिषिच्य पुनः दानसामग्रीः अभिषिच्य गन्धपुष्पादिभिः दानवस्तूनि सम्पूजयेत् –

**ॐ पददानीयछत्रादिसकलवस्तुभ्यो नमः।**
**तदधिष्ठातृदेवेभ्यश्च नमः।**

इति सम्पूज्य ब्राह्मणञ्च सम्पूज्य कुशादिकमादाय सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् .....देशकालादिसङ्कीर्त्य अद्येह अमुकगोत्रः अमुकनामशर्मा (वर्मा/गुप्तः) अहं मम पितुः अमुकगोत्रस्य अमुकनाम्नः शर्मणः (वर्मणः/गुप्तस्य), (मातुः अमुकगोत्रायाः**

अमुकनाम्न्याः देव्याः। अथवा अमुकसम्बन्धिनः अमुकगोत्रस्य अमुकनाम्नः शर्मणः/वर्मणः/गुप्तस्य) भगवत्सायुज्यप्राप्तये भगवदाज्ञया छत्र-उपानह्-आसनानि उत्तानाङ्गिरदैवतानि, वस्त्राणि बृहस्पतिदैवतानि, कमण्डलु-आसन-पञ्चपात्राणि वरुणदैवतानि, आमान्नानि भोजनानि च प्रजापतिदैवतानि, मुद्रिका-दण्ड-अर्थ-यज्ञोपवीतानि विष्णुदैवतानि, अमुकगोत्राय अमुकशर्मणे श्रीवैष्णवाय ब्राह्मणाय तुभ्यमहं सम्प्रददे।

इति ब्राह्मणहस्ते कुशादिकं दत्वा ब्राह्मणं प्रणमेत्।

दानप्रतिष्ठा - दानप्रतिष्ठार्थं हस्ते किञ्चिद्द्रव्यं गृहीत्वा जलकुशादिकमादाय -

**ॐ अद्य कृतैतत् पददानसाङ्गतासिद्ध्यर्थमिदं द्रव्यम् अमुकदैवतम् अमुकगोत्राय अमुकशर्मणे सुपूजिताय ब्राह्मणाय पददानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे।**

इति दानप्रतिष्ठाद्रव्यं दत्वा पददानवस्तूनि च ब्राह्मणहस्ते दद्यात्।

## अर्चिरादिमार्गश्रवणदानविधिः

अर्चिरादिमार्गकथावाचकाय देयवस्तूनि सर्वाणि एकस्मिन् विस्तृतपात्रे निधाय देयद्रव्याणि वाचकञ्च सम्पूज्य हस्ते कुशतिलाक्षतजलान्यादाय पूर्वोक्तप्रकारेण सङ्कल्पं कुर्यात् -

**हरिः ॐ तत्सत् .....देशकालादिसङ्कीर्त्य अद्येह अमुकगोत्रः अमुकनामशर्मा (वर्मा/गुप्तः) अहं मम पितुः अमुकगोत्रस्य अमुकनाम्नः शर्मणः (वर्मणः/गुप्तस्य), (मातुः अमुकगोत्रायाः अमुकनाम्न्याः देव्याः। अथवा अमुकसम्बन्धिनः अमुकगोत्रस्य**

अमुकनाम्नः शर्मणः/वर्मणः/गुप्तस्य) भगवत्सायुज्यप्राप्तये भगवदाज्ञया भगवद्मुखकमलविकासार्थम् अर्चिरादिमार्गकथा-श्रवणजन्यफलप्राप्त्यर्थम् इमानि देयद्रव्याणि यद्यद्द्रव्याणि तत्तद्दैवतानि अमुकगोत्राय अमुकशर्मणे अर्चिरादिमार्गकथा-वाचकाय ब्राह्मणाय श्रीवैष्णवाचार्याय तुभ्यमहं सम्प्रददे ।
ॐ तत्सन्न मम ।

इति दत्वा प्रार्थयेत् -

वाचकाय नमस्तुभ्यं कथाश्रवणकारिणे।
संसारसागरे मग्नजीवोद्धरणशालिने॥

इति सम्प्रार्थ्य दानप्रतिष्ठां कुर्यात् -

दानप्रतिष्ठा - दानप्रतिष्ठार्थं हस्ते किञ्चिद्द्रव्यं गृहीत्वा जलकुशादिकञ्चादाय -

**ॐ अद्य कृतस्य सोपस्करणदेयवस्तुदानकर्मणो न्यूनतापरिपूर्णार्थं राजमुद्राङ्कितमिदं द्रव्यं विष्णुदैवतम् अमुकगोत्राय अमुकशर्मणे अर्चिरादिमार्गकथावाचकाय श्रीवैष्णवाचार्याय ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

इति दानप्रतिष्ठाद्रव्यं दत्वा दानवस्तूनि च ब्राह्मणहस्ते दद्यात् ।

## गोदानप्रयोगः

तत्रादौ हस्ते चन्दनाक्षतपुष्पाणि गृहीत्वा गोसूक्तेन गां प्रार्थयेत् -

**ॐ अपश्याम यवतिमाचरन्तीं मृताय जीवां परिणीयमानाम् ।
अन्धेन या तमसा प्रावृतासि प्राचीमवाचीमवयन्नरिष्ट्यै॥
ॐ मयैतामास्तां भ्रियमाणा देवी सती पितृलोकं यदैषि।
विश्ववारा नभसा संव्यन्त्युभौ नो लोकौ पयसा वृणीहि॥**

**ॐ रयिष्ठामग्निं मधुमन्तमुर्मिणमूर्जः सन्तं त्वा पयसोपसंसदेम।**
**संख्या समुवर्चसा स च स्वानः स्वस्तये॥**
**ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः।**
**प्रणुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ठ॥**
**ॐ ये जीवा ये च मृता ये जाता ये च जन्याः।**
**तेभ्यो घृतस्य धारयितुं मधुधाराव्युदन्तीम्॥**

इति गोसूक्तं पठित्वा गोरुपरि **"ॐ सुं सुरभ्यै नमः"** इति पुष्पाणि समर्प्य कर्मपात्रोदकेन गां प्रोक्ष्य अर्घ्यपाद्याचमनीयस्नानवस्त्रपुष्पाक्षतागन्धादिभिः गां पूजयेत्।

**ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।**
**नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥**
**ॐ इरावती धेनुमती हि भूत७ँसूयवसिनीमनवेदशस्या। व्यस्कभ्ना रोदसी विष्णवे ते दाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा॥**

इति पूजयित्वा गोः अङ्गपूजां कुर्यात् –

पृष्ठे **ॐ ब्रह्मणे नमः**। गले **ॐ विष्णवे नमः**। मुखे **ॐ रुद्राय नमः**। मध्ये **ॐ देवगणेभ्यो नमः**। रोमकूपेषु **ॐ सर्वेभ्यो महर्षिभ्यो नमः**। पुच्छे **ॐ सर्वनागेभ्यो नमः**। स्तनेषु **ॐ चतुस्समुद्रेभ्यो नमः**। खुरेषु **ॐ अष्टकुलपर्वतेभ्यो नमः**। नेत्रयोः **ॐ शशिभास्कराभ्यां नमः**। श्रृङ्गयोर्मध्ये **ॐ सर्वतीर्थेभ्यो नमः**। गोमूत्रे (योनौ) **ॐ गङ्गादिसर्वनदीभ्यो नमः**। गोमये (गुदद्वारे) **ॐ लक्ष्म्यै नमः**। कर्णयोः **ॐ अश्विनीकुमाराभ्यां नमः**। जिह्वायाम् **ॐ सरस्वत्यै नमः**। नासापुटयोः **ॐ सुमुखाय नमः**। उदरे **ॐ पृथिव्यै नमः**। दक्षिणपार्श्वे **ॐ कुबेराय नमः**। वामपार्श्वे **ॐ वरुणाय नमः**। हुङ्कारे **ॐ सर्वदेवेभ्यो नमः**।

इत्यङ्गपूजां विधाय धूपदीपनैवेद्यदक्षिणाप्रदक्षिणादीनि च समर्प्य प्रार्थनां कुर्यात् –

**पृष्ठे ब्रह्मा गले विष्णुर्मुखे रुद्रः प्रतिष्ठितः ।**
**मध्ये देवगणाः सर्वे रोमकूपे महर्षयः ॥**
**नागाः पुच्छे खुराग्रेषु ये चाष्टौ कुलपर्वताः ।**
**मूत्रे गङ्गादयो नद्यो नेत्रयोः शशिभास्करौ ॥**
**शृङ्गयोः सर्वतीर्थानि गोमये कमलालया ।**
**स्तनेषु सागराः सर्वे जिह्वायां च सरस्वती ॥**
**कर्णयोरश्विनौ नासापुटयोः सुमुखः स्मृतः ।**
**दक्षपार्श्वे कुबेरस्तु वामे जलधिनायकः ॥**
**हुङ्कारे सर्वदेवाश्च धरा चैवोदरे स्थिता ।**
**एते यस्याः स्तनौ देवाः सा धेनुर्वरदास्तु मे ॥**
**या लक्ष्मीः सर्वभूतानां यत्र देवा व्यवस्थिताः ।**
**धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥**

इति प्रार्थयित्वा ब्राह्मणं पूजयेत् –

**ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।**
**हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन् ॥**
**नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।**
**जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥**

इति ब्राह्मणं पूजयित्वा गोपुच्छोदकेन स्वशिरसि अभिषिञ्चेत् –

**ॐ मनो मे तर्पयत व्वाचम्मे तर्पयतप्प्राणम्मे तर्पयत चक्षुर्म्मे तर्प्पयतश्श्रोत्रम्मे तर्पयतात्मानं मे तर्पयतप्प्रजाम्मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मावितृषन् ॥**

ततो गोपुच्छोदकतर्पणं देवतीर्थेन कुर्यात् –

**ॐ ब्रह्माणं तर्पयामि। ॐ विष्णुं तर्पयामि। ॐ रुद्रं तर्पयामि। ॐ मरुतं तर्पयामि। ॐ दक्षं तर्पयामि। ॐ भृगुं तर्पयामि। ॐ धर्मं तर्पयामि। ॐ यमं तर्पयामि। ॐ मरीचिं तर्पयामि। ॐ अङ्गिरसं तर्पयामि। ॐ अत्रिं तर्पयामि। ॐ पुलस्त्यं तर्पयामि। ॐ पुलहं तर्पयामि। ॐ क्रतुं तर्पयामि। ॐ वशिष्ठं तर्पयामि। ॐ परमेष्ठिनं तर्पयामि। ॐ विवस्वन्तं तर्पयामि। ॐ सोमं तर्पयामि। ॐ कर्दमं तर्पयामि। ॐ क्रोधं तर्पयामि। ॐ विक्रीतं तर्पयामि।**

निवीति **(कण्ठे सूत्रं)** विधाय कायतीर्थेन –

**ॐ ऋषिं तर्पयामि। ॐ महर्षीन् तर्पयामि। ॐ ब्रह्मर्षीन् तर्पयामि। ॐ देवर्षीन् तर्पयामि। ॐ राजर्षीन् तर्पयामि। ॐश्रुतर्षीन् तर्पयामि। ॐ सप्तर्षीन् तर्पयामि। ॐ काण्डर्षीन् तर्पयामि। ॐ ऋषीकाः तर्पयामि । ॐ ऋषिपत्नीः तर्पयामि। ॐऋषिपुत्रान् तर्पयामि। ॐकाण्वं बोधायनं तर्पयामि। ॐ आपस्तम्भं सूत्रकारं तर्पयामि। ॐ सत्याषाढं हिरण्यकेशिनं तर्पयामि। ॐ वाजसनेयिनं तर्पयामि। ॐ याज्ञवल्क्यं तर्पयामि। ॐ व्यासं तर्पयामि। ॐ आश्वलायनं शौनकं तर्पयामि। ॐ प्रणवं तर्पयामि। ॐ व्याहृतीः तर्पयामि। ॐ सावत्रीं तर्पयामि। ॐ गायत्रीं तर्पयामि। ॐ छन्दांसि तर्पयामि। ॐ ऋग्वेदं तर्पयामि। ॐ यजुर्वेदं तर्पयामि। ॐ सामवेदं तर्पयामि। ॐ अथर्ववेदं तर्पयामि। ॐ अथर्वाङ्गिरसं तर्पयामि। ॐ इतिहासपुराणे तर्पयामि। ॐ सर्वदेवान् तर्पयामि। ॐ सर्वदेवजनान् तर्पयामि। ॐ सर्वभूतानि तर्पयामि।**

प्राचीनावीति **(अपसव्येन)** पितृतीर्थेन –

**ॐ कव्यवाडनलं तर्पयामि। ॐ सोमं तर्पयामि। ॐ यमं तर्पयामि। ॐ अर्यमाणं तर्पयामि। ॐ अग्निष्वत्तारं तर्पयामि। ॐ बर्हिष्वदः तर्पयामि। ॐ सोमपापितॄन् तर्पयामि। ॐ धर्मराजं तर्पयामि।**

ॐ मृत्युं तर्पयामि। ॐ अन्तकं तर्पयामि। ॐ वैवस्वतं तर्पयामि। ॐ कालं तर्पयामि। ॐ सर्वभूतक्षयकरं तर्पयामि। ॐ उदुम्बरं तर्पयामि। ॐ दध्नं तर्पयामि। ॐ नीलं तर्पयामि। ॐ परमेष्ठिनं तर्पयामि। ॐ वृकोदरं तर्पयामि। ॐ चित्रं तर्पयामि। ॐ चित्रगुप्तं तर्पयामि।

अग्रिममन्त्रैस्तर्पयेत् –

मातृपक्षाश्च ये केचिद् ये केचित् पितृपक्षकाः।
गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः॥
ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः।
क्रियालोपगतश्चैव जात्यन्धाः पङ्गवस्तथा॥
विरूपा आमगर्भाश्च ज्ञाताज्ञातकुले मम।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः॥
वृक्षयोनिगता ये च पर्वतत्वं गताश्च ये।
पशुयोनिगता ये च ये च कीटपतङ्गकाः॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः।
नरके रौरवे ये च महारौरवसंस्थिताः॥
असिपत्रवने घोरे कुम्भीपाकस्थिताश्च ये।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदक तर्पणैः॥
स्वार्थबद्धामृता ये च शस्त्रघातमृताश्च ये च।
ब्रह्महस्तमृता ये च नारीहस्तमृताश्च ये॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः॥
पाशमध्ये मृता ये च स्वल्पमृत्युवशं गताः।
सर्वे च मानवा नागाः पशवः पक्षिणस्तथा।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः॥
आब्रह्मतम्बर्पयन्तं देवर्षिपितृमानवाः।
तृप्यन्तु सर्वदा सर्वे गोपुच्छोदकतर्पणैः॥

ततः **सव्येन** हस्ते तिलाक्षतकुशादीनादाय गोपुच्छं गृहीत्वा सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत्, हरिः ॐ तत्सत्, हरिः ॐ तत्सत् ॐ विष्णुः, ॐ विष्णुः, ॐ विष्णुः, अद्य श्रीमद्भगवतो महापुरुषस्य श्रीभूनीलानायकस्य सौशील्यादिसकलकल्याणगुणगणसम–लङ्कृतस्य श्रीमन्नारायणस्य नाभिकमलोद्भवस्य भगवदाज्ञया सकलजगत्सृष्टिं कुर्वतः अखिललोकपितामहस्य परार्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे दिनस्य द्वितीययामे तृतीये मुहूर्ते, अष्टमे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे, अष्टाविंशतितमे सत्यत्रेताद्वापरान्ते कलियुगे कलिप्रथमचरणे श्रीमन्नृपतिविक्रमार्कराज्यात् वर्तमानेऽमुकतमे वर्षे, श्रीमद्रामानुजमुनिप्रादुर्भावाद् वर्तमानेऽमुकतमे वर्षे, अमुकसंवत्सरे, अमुक–अयने, अमुक–ऋतौ, अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकनक्षत्रे, अमुकयोगे अमुककरणे अमुकराशिस्थिते श्रीसूर्ये, अमुकराशिस्थिते चन्द्रे, अमुकराशिस्थिते देवगुरौ, शेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्टायां शुभपुण्यतिथौ अस्मिन् भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गते नेपालदेशे अमुकक्षेत्रे अमुकमण्डलान्तर्गते अमुकनगरे/अमुकग्रामे श्रीलक्ष्मीनारायणभगवतः सन्निधौ वर्तमानः, शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनीयशाखाध्यायी अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माऽहं/वर्माऽहं/गुप्तोऽहं मम (पितुः अमुकनामशर्मणः/वर्मणः/गुप्तस्य, मातुः अमुकदेव्याः वा) मृतद्वादशाहे मृतदिनात् द्वादशाहपर्यन्तं कृतस्य**

**सकलकर्मपरिसमाप्तिपूर्वकशुद्धशान्त्यर्थम्, अकृत्यकरण-कृत्याकरणभगवदपचारभागवतापचार-असह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्-कैङ्कर्यत्वेन रौप्यखुरां ताम्रपृष्ठां सुवर्णशृङ्गां मुक्तापुच्छां कांस्यदोहनीं सुरत्नमालिकां दुकूलादिपरिवृतां सोपस्कराम् इमां सवत्सां गां रुद्रदैवताम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यम् अहं सम्प्रददे ।**

इति जलाक्षतसहितं गोपुच्छं ब्राह्मणकरे दद्यात्।

ब्राह्मणश्च कोदात् इत्यादि पठन् गृह्णीयात् -

**ॐ कोदात्कस्माऽअदात्कामोदात्कामायादात्।**

**कामो दाता कामः प्रतिग्रहीता कामै तत्ते॥**

ततो हस्ते पुष्पमादाय गोप्रार्थनां कुर्यात् -

**ॐ गावो ममैनः प्रणुदन्तु सौर्यास्तथा सौम्याः स्वर्गयानाय सन्तु।**

**आत्मानं मे मातृवच्चाश्रयन्तु तथानुक्ताः सन्तु सत्याशिषो मे॥**

**ॐ स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां यतः ।**

**सर्वपापहराधेनुस्तस्माच्छान्तिं प्रयच्छ मे॥**

इति गां ब्राह्मणञ्च प्रदक्षिणीकृत्य अभिवादयेत्।

ततो दानप्रतिष्ठां कुर्यात्।

सुवर्णादिद्रव्यं सम्पूज्य हस्ते जलकुशादिकमादाय -

**ॐ अद्य कृतैतद्गोदानप्रतिष्ठार्थं हिरण्यादिद्रव्यम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यम् अहं दातुमुत्सृजे ।**

इति ब्राह्मणहस्ते दद्यात्। विप्रश्च गोपुच्छेन यजमानम् अभिषिञ्चेत्।

ॐ द्यौः शान्तिरन्तरिक्ष॰शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः । वनस्प्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व॰शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥

## शय्यादानविधिः

शय्यादाने अत्यावश्यकानि सर्वाण्युपकरणानि सम्पाद्य दीपं प्रज्वाल्य श्रीलक्ष्मीनारायणयोः स्वर्णमयीं प्रतिमां संस्थाप्य प्राणप्रतिष्ठां कृत्वा पुरुषसूक्तेन पूजयित्वा, देयद्रव्याणि च पूजयित्वा ब्राह्मणञ्च सम्पूज्य हस्ते जलकुशाक्षततिलान्यादाय सङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत् .....देशकालादीन् सङ्कीर्त्य अद्य अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकशर्माहं भगवदाज्ञया भगवन्मुखविकासार्थं सारदारुमयीम् इमां शय्यां सतूलिकाम् उत्तरच्छदप्रच्छन्नां गण्डोपधानयुतां सप्रावरणां ताम्बूलकर्पूर-कुङ्कुमागरु-चन्दन-दीपिका-चामरासनसहितां लक्ष्मी-नारायणप्रतिमायुतां घृतकुम्भसप्तधान्यसहिताम् उत्तानाङ्गिरदैवतां परिधानीयवस्त्राणि बृहस्पतिदैवतानि सौवर्णरजतादीन्याभरणानि पाकभोजनपात्राणि च विश्वकर्मदैवतानि सौभाग्यद्रव्याणि विष्णुदैवतानि तण्डुलमाषलवणानेकविधफलशाकादिवस्तूनि प्रजापति-दैवतानि अमुकगोत्राय अमुकशर्मणे सपत्नीकाय सुपूजिताय श्रीवैष्णवाय ब्राह्मणाय तुभ्यमहं सम्प्रददे तत्सन्न मम ।**

इत्युक्त्वा कुशजलादिकं विप्रकरे दत्वा प्रार्थयेत् –

**देवदेव जगन्नाथ शरणागतवत्सल ।**
**शय्यादानेन लक्ष्मीश प्रसन्नो भव सर्वदा ॥**

शरण्यं सर्वलोकानां लज्जाया रक्षणं परम्।
वस्त्रं तस्य प्रदानेन प्रसन्नोऽस्तु हरिः सदा॥
नराभरणदानेन तुष्टिं याति हरिः सदा।
योषिदाभरणैर्दत्तैः प्रीयते हरिवल्लभा॥
अन्नदानं महादानं जीवानां प्राणरक्षकम्।
अन्नदानेन देवेश पितृमोक्षप्रदो भव॥

इति सम्प्रार्थ्य दानप्रतिष्ठां कुर्यात् -

**ॐ अद्येह कृतस्य सोपस्करणशय्यादानकर्मणः न्यूनातिरिक्त-परिपूणार्थं राजमुद्राङ्कितमिदं द्रव्यं विष्णुदैवतम् अमुकगोत्राय अमुकशर्मणे श्रीवैष्णवाय ब्राह्मणाय तुभ्यम् अहं सम्प्रददे।**

इत्युक्त्वा विप्रकरे कुशादिकं दद्यात्।

॥ इतिशय्यादान विधिः॥

卐卐卐卐

# ❀ मासिकविधिः ❀

मासिकश्राद्धस्य पूर्वदिने एव कर्ता पुष्पताम्बूलादिकमादाय आचार्यान् प्रार्थयित्वा निमन्त्रयेत् –

**भो आचार्याः श्वः आगत्य भगवद्दासस्य मे पितुः (मातुः/ अमुकसम्बन्धिनः) मासिकश्राद्धकर्म कारयन्तु।**

इत्युक्त्वा प्रणमेत्।

श्राद्धदिने कर्त्ता प्रातः स्नात्वा नित्यकर्म समाप्य पञ्चगव्यं प्राश्नीयात्। ततः आगतान् आचार्यान् सत्कृत्य अर्घ्याद्युपचारैः सम्पूज्य शुभासने स्थापयेत् । ततो गोमयादिना शोधितस्थाने दीपं प्रज्वाल्य सम्पूज्य पुरुषसूक्तविधिना अर्घ्यपाद्याचमनीयस्नानवस्त्रोपवीतगन्ध-पुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाप्रदक्षिणादिभिः सश्रीकं भगवन्तं सम्पूज्य अष्टोत्तरशतनामभिः अर्चयित्वा कर्पूरेण नीराज्य प्रार्थयेत् –

**ॐ भगवन् देवदेवेश भक्तरक्षणतत्पर।**
**अस्मत्पितृस्वरूपिन् त्वं प्रसन्नो भव सर्वदा॥**
**पत्रपुष्पादिकं सर्वं यद्द्रव्यं ते समर्पितम्।**
**तत्सर्वं गृह्यतां देव पितृतृप्तिकरो भव॥**

ततः कर्मपात्रं निर्मीयात् –

## कर्मपात्रविधानम्

कर्मपात्रम् अभिमन्त्रयेत् –

**ॐ यद्देवाद्देवहेडनन्देवासश्चकृमावयम्।**
**अग्निर्म्मातस्मादेनसो विश्वान्मुञ्चत्व६ हसः॥**
**ॐ यदि दिवा यदि नक्तमेनाᳪसि चकृमावयम्।**
**वायुर्म्मातस्मादेनसो विश्वान्मुञ्चत्व ६ हसः॥**

ॐ यदि जाग्रद्यदिस्वप्नऽएना ६ सि चकृमावयम् ।
सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्व ँ हसः ॥

कुशपवित्रं निक्षिपेत् –

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥

जलं निक्षिपेत् –

ॐ शन्नो देवीरभीष्टयऽआपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः ॥

तिलान् निक्षिपेत् –

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः ।
प्रत्नमद्भिः पृक्तः स्वधया पितृँल्लोकान् प्रीणाहि नः स्वाहा ॥

यवान् निक्षिपेत् –

ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्द्विवेत्वान्तरिक्षायत्वा पृथिव्यै त्वा। शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥

चन्दनं निक्षिपेत् –

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

पुष्पाणि निक्षिपेत् –

ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकं मऽइषाण ॥

अक्षतान् निक्षिपेत्–

ॐ अक्षन्नमीमदन्त ह्यवप्रिया अधूषत। अस्तोषत स्वभानवो विप्रा न विष्ठया मतीयोजान्विन्द्रते हरी ॥

इति कर्मपात्रजलेन श्राद्धभूमिं श्राद्धद्रव्याणि च अभिषिञ्चेत् –

**ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।**
**यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥**
**ॐ पुण्डरीकाक्षः पुनातु , ॐ पुण्डरीकाक्षः पुनातु,**
**ॐ पुण्डरीकाक्षः पुनातु॥**

ततः पवित्रधारणं कृत्वा एकस्मिन् तण्डुलपुञ्जे कुशकूर्चम्, तस्य पश्चिमे अन्यस्मिन् तण्डुलपुञ्जे सुगन्धिद्रव्यशर्करान्वितजलयुतं ताम्रघटं (मृण्मयघटं वा) स्थापयेत्।

ततः प्रतिज्ञासङ्कल्पं कुर्यात् –

**हरिः ॐ तत्सत्, हरिः ॐ तत्सत्, हरिः ॐ तत्सत् ॐ विष्णुः ॐ विष्णुः, ॐ विष्णुः अद्य श्रीमद्भगवतो महापुरुषस्य श्रीभूनीलानायकस्य सौशील्यादिसकलकल्याणगुणगणसम-लङ्कृतस्य श्रीमन्नारायणस्य नाभिकमलोद्भवस्य भगवदाज्ञया सकलजगत्सृष्टिं कुर्वतः अखिललोकपितामहस्य परार्धद्वय-जीविनो ब्रह्मणो द्वितीयपरार्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे दिनस्य द्वितीययामे तृतीये मुहूर्ते, अष्टमे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे, अष्टाविंशतितमे सत्यत्रेताद्वापरान्ते कलियुगे कलिप्रथमचरणे श्रीमन्नृपतिविक्रमार्कराज्यात् वर्तमाने अमुकतमे वर्षे श्रीमद्रामानुजमुनिप्रादुर्भावाद् वर्तमाने अमुकतमे वर्षे, अमुक-संवत्सरे, अमुक-अयने, अमुक-ऋतौ, अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकनक्षत्रे, अमुकयोगे अमुककरणे अमुकराशिस्थिते श्रीसूर्ये, अमुकराशिस्थिते चन्द्रे, अमुकराशिस्थिते देवगुरौ, शेषेषु ग्रहेषु यथा यथास्थानस्थितेषु सत्सु एवं ग्रहगण-विशेषेण विशिष्टायां शुभपुण्यतिथौ अस्मिन् भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गते नेपालदेशे अमुकक्षेत्रे**

अमुकमण्डलान्तर्गते अमुकनगरे/अमुकग्रामे श्रीलक्ष्मीनारायण-भगवतः सन्निधौ वर्तमानः, शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनीय-शाखाध्यायी अमुकगोत्रोत्पन्नोऽमुकप्रवरान्वितः, अमुकनामशर्माऽहं/वर्माऽहं/गुप्तोऽहं मम (पितुः अमुकनाम्नः शर्मणः/वर्मणः/गुप्तस्य, मातुः अमुकनाम्न्याः देव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचार-भागवतापचार-असह्यापचारनिवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन अमुकमासिकश्राद्धं करिष्ये।

ततः प्रायश्चित्तगोदानं कुर्यात् –

## गोदानप्रयोगः

तत्र प्रथमं गन्धपुष्पाक्षतादिभिः गोपूजनं कुर्यात् –

**ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।**
**नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥**
**ॐ इरावती धेनुमती हि भूत ँ सूयवसिनीमनवेदशस्या।**
**व्यस्कब्भ्ना रोदसी विष्णवे ते दाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा॥**
**ॐ सुं सुरभ्यै नमः॥**

इति यथोपचारैः गां सम्पूज्य ब्राह्मणं पूजयेत् –

**ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।**
**जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥**

इति ब्राह्मणं पूजयित्वा गोपुच्छोदकेन स्वशिरसि अभिषिञ्चेत् –

**ॐ मनो मे तर्पयत व्वाचम्मे तर्पयतप्राणम्मे तर्पयत चक्षुर्म्मेतर्प्पयतश्श्रोत्रम्मे तर्पयतात्मानं मे तर्पयतप्रजाम्मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मावितृषन् ।**

ततो हस्ते तिलाक्षतकुशादीनादाय गोपुच्छं गृहीत्वा सङ्कल्पं कुर्यात् -

**हरिः ॐ तत्सत् अद्येत्यादि .... अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माऽहं/वर्माऽहं/गुप्तोऽहं मम (पितुः अमुकनाम्नः शर्मणः/वर्मणः/गुप्तस्य, मातुः अमुकदेव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचारभागवतापचारासह्यापचार-निवृत्तिपूर्वकं भगवन्मुखोल्लासार्थं भगवदाज्ञया भगवत्कैङ्कर्यत्वेन करिष्यमाणामुकमासिकश्राद्धकर्माधिकारप्राप्त्यर्थं शरीरशुद्ध्यर्थं प्रायश्चित्तनिमित्ताम् इमां गां रुद्रदैवतां (गवर्थे परिकल्पितं द्रव्यं विष्णुदैवतम्) अमुकगोत्राय अमुकनामशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।**

इति ब्राह्मणकरे दद्यात्। ब्राह्मणश्च स्वस्तीत्युक्त्वा गृह्णीयात् । ततो हस्ते पुष्पमादाय गोप्रार्थनां कुर्यात् -

**ॐ स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां यतः ।**
**सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे ॥**

ततो हिरण्यादिकमादाय दानप्रतिष्ठां कुर्यात्-

**अद्य कृतैतत्सर्वप्रायश्चित्तप्रत्याम्नायगोदानप्रतिष्ठासिद्ध्यर्थं हिरण्यादिद्रव्यं यद्द्रव्यं तद्दैवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।** इति दत्वा गोप्रदक्षिणां कुर्यात्। ब्राह्मणश्च कोदादिति मन्त्रमुच्चारयन् गृह्णीयात् -

**ॐ कोदात्कस्माऽअदात्कामोदात्कामायादात्।**
**कामो दाता कामः प्प्रतिग्ग्रहीता कामै तत्ते ॥**

ततो विप्रश्च गोपुच्छेन यजमानम् अभिषिञ्चेत् -

**ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः। वनस्प्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥**

ततः दीपं प्रज्वाल्य सम्पूज्य अपसव्यं विधाय दक्षिणाभिमुखो भूत्वा कूर्चे दिवङ्गतम् (दिवङ्गताम्) आवाहयेत् -

**ॐ अद्य अमुकगोत्रम् अमुकशर्माणम् (अमुकगोत्राम् अमुकदेवीं) अद्य कर्तव्य-अमुकमासिकश्राद्धे अत्र आवाहयिष्ये।**

इत्यावाह्य मोटकादिकमादाय आसनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकशर्मणः/वर्मणः/गुप्तस्य (अमुकगोत्रायाः अमुकदेव्याः) अद्यकर्तव्य-अमुकमासिकश्राद्धे इदमासनं तुभ्यं स्वधा।**

एवमेव घटे च कुशासनं दद्यात्। हस्ते जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणः/वर्मणः/गुप्तस्य (अमुकगोत्रायाः अस्मत्मातुः अमुकदेव्याः) अद्यकर्तव्य-अमुकमासिकश्राद्धे इदमासनं तुभ्यं स्वधा।**

इति कुम्भसमीपे उत्सृजेत्।

ततः गन्धाक्षतपुष्पधूपदीपनैवेद्यद्रव्यवस्त्रादिभिः पितरं कुम्भञ्च सम्पूज्य मोटकादिकमादाय -

**ॐ अद्य अमुकगोत्र अस्मत्पितः अमुकशर्मन्/वर्मन्/गुप्त (अमुकगोत्रे अस्मन्मातः अमुकदेवि) अमुकमासिकश्राद्धे एतानि गन्धाक्षतपुष्प-धूपदीपनैवेद्यताम्बूलवस्त्रदक्षिणाप्रदक्षिणादीनि तुभ्यं स्वधा।**

इति कुम्भसमीपे उत्सृजेत्।

ततः मोटकादिकमादाय सान्नोदककुम्भं स्पृशन् -

**ॐ अद्य अमुकगोत्राय अस्मत्पित्रे अमुकशर्मणे/वर्मणे/गुप्ताय (अमुकगोत्रायै अस्मन्मात्रे अमुकदेव्यै) अमुकमासिकश्राद्धे अयं सान्नोदककुम्भस्तुभ्यं स्वधा।**

इति कूर्चब्राह्मणकरे कुम्भं दद्यात्। ततः अन्नदानं कुर्यात्।

**भूस्वामिने अन्नदानम्** – तिलघृतमधुजलयुतमन्नम् अग्रे कृत्वा हस्ते मोटकादिकमादाय –

**ॐ इदमन्नं सजलम् एतद्भूस्वामिपितृभ्यो नमः।**

इत्युत्सृजेत्।

ततः कूर्चस्य अग्रे एकभागसिद्धान्नं स्थापयित्वा मधुव्वातेति पठन् मधु निक्षिपेत् –

**ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवँरजः। मधुद्यौरस्तु नः पिता। ॐ मधुमान्नो व्वनस्पतिर्मधु माँ२ऽअस्तु सूर्य्यः। माध्वीर्गावो भवन्तु नः॥ ॐ मधु ॐ मधु ॐ मधु।**

ततो न्युब्जदक्षिणहस्तोपरि वामहस्तं न्युब्जीकृत्य सिद्धान्नं स्पृशेत् –

**ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृते ऽअमृतं जुहोमि स्वाहा।**

**ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधे पदं समूढमस्यपाँसुरे।**

**ॐ कृष्ण कव्यमिदं रक्ष मदीयम्।**

ततो वामहस्तेन सिद्धान्नं स्पृशन् दक्षिणहस्तस्य न्युब्जाङ्गुष्ठेन –

**इदमन्नम्** इति अन्नम्, **इमा आपः** इति जलम्, **इदमाज्यम्** इति आज्यम्, **इदं कव्यम्** इति सर्वं सिद्धान्नं स्पृशेत्। ततः सिद्धान्नं परितः तिलान् विकिरेत् –

**ॐ अपहता असुरा रक्षाँसि वेदिषदः।**

ततो वामहस्तेन सिद्धान्नं स्पृशन् दक्षिणहस्ते जलमोटकादिकमादाय –

**अद्य अमुकगोत्राय अस्मत्पित्रे अमुकामुकनामशर्मणे/वर्मणे/गुप्ताय, (अमुकगोत्रायै अस्मन्मात्रे अमुकदेव्यै) अमुकमासिकश्राद्धे इदमन्नं सोपस्करं परिविष्टं परिवेष्यमाणम् अक्षय्यतृप्तिहेतोस्ते स्वधा।** इत्युत्सृजेत्।

ततः **सव्येन** प्रार्थयेत् -

**ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः। मधुद्यौरस्तु नः पिता। ॐ मधुमान्नो व्वनस्पतिर्मधु माँ२ऽअस्तु सूर्य्यः। माध्वीर्गावो भवन्तु नः॥ ॐ मधु ॐ मधु ॐ मधु।**

ततः **अपसव्येन** कूर्चब्राह्मणकरे -

**ॐ शिवा आपः सन्तु** इति जलम्, **ॐ सौमनस्यमस्तु** इति पुष्पम्, **ॐ अक्षतं चारिष्टं चास्तु** इति अक्षतान् उत्सृजेत्। ततः **सव्येन** आशीःप्रार्थनां कुर्यात् -

यजमानः - **ॐ गोत्रं नो वर्द्धताम्, दातारो नोऽभिवर्द्धन्ताम्। वेदाः सन्ततिरेव च। श्रद्धा च नो मा व्यगमद्, बहुदेयं च नोऽस्तु। अन्नं च नो बहु भवेत्, अतिथींश्च लभेमहि। याचितारश्च नः सन्तु, मा च याचिष्म कञ्चन। एताः सत्या आशिषः सन्तु॥**

ब्राह्मणः वदेत् - **ॐ गोत्रं वो वर्द्धताम्, दातारो वोऽभिवर्द्धन्ताम्। वेदाः सन्ततिरेव च। श्रद्धा च वो मा व्यगमद्, बहुदेयं च वोऽस्तु। अन्नं च वो बहु भवेत्, अतिथींश्च लभध्वम्। याचितारश्च वः सन्तु, मा याचध्वम्। एताः सत्या आशिषः सन्तु॥**

ततः दक्षिणां दद्यात् -

एकस्मिन् पुटके द्रव्यं स्थापयित्वा गन्धादिभिः सम्पूज्य हस्ते जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणः/वर्मणः/गुप्तस्य (अमुकगोत्रायाः अस्मत्मातुः अमुकदेव्याः) अमुकमासिकश्राद्ध-प्रतिष्ठार्थम् इमां दक्षिणां राष्ट्रमुद्रां विष्णुदैवताम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

इति दत्वा **अपसव्येन** पीताक्षतैः आवाहितदिवङ्गतं विसर्जयेत् । ततः **सव्यं** भूत्वा शुद्धवस्त्रेण हस्तपादादिशुद्धिं विधाय तत्र मण्डलं परिकल्प्य साग्रदण्डरम्भाफलपत्रादीनि पूर्वाग्राणि निधाय जलेन संशोध्य दक्षिणतो जलपात्रादीनि निधाय पायसं ततः साज्यं गुणान्नं लेह्यपेयभक्ष्यभोज्यादिकं यथाक्रमं वितीर्य भगवत्तीर्थं दत्वा समन्त्रमाचमनं परिषेचनं कारयित्वा शनैः शनैः यावत्तृप्तिं भोजयेत् । भुञ्जानेषु तेषु कर्त्ता विष्णुसहस्रनाम-कठवल्ल्यादिकं पठेत् । तृप्तिं विज्ञायोत्तरापोशनं समन्त्रं दत्वा उत्थाप्य हस्तपादादिशुद्धिं कारयित्वा शुभासने निवेश्य गन्धादिभिः सम्पूज्य दक्षिणाताम्बूलवस्त्रादिकं दत्वा साष्टाङ्गप्रणामं विधाय श्रीपादतीर्थञ्च स्वीकृत्य ततो ब्राह्मणान् स्वगृहं प्रेषयित्वा बालवृद्धादिभ्योऽपि भोजनं दत्वा पश्चात् स्वयमपि भुञ्जीत ।

**॥ इति मासिकविधिः ॥**

卐 卐 卐 卐

# ❀ दुर्मरणमृतानां नारायणबलिप्रयोगः ❀

अथ कर्त्ता एकादशाहे प्रातरेव आचार्यादिसहितः जलाशयं गत्वा तीर्थस्नानविधिना स्नात्वा तिलकधारणं कृत्वा शुद्धासने उपविश्य आचम्य कर्मपात्रं विधाय -

**अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।**
**यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥**

इत्यात्मानं पूजासामग्रीं च सम्प्रोक्ष्य, पञ्चगव्यप्राशनं कुर्यात् -

**यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके।**
**प्राशनात् पञ्चगव्यस्य दहत्वग्निरिवेन्धनम्॥**

ततः प्रतिज्ञासङ्कल्पं कुर्यात् -

**हरिः ॐ तत्सत्, हरिः ॐ तत्सत्, हरिः ॐ तत्सत् ॐ विष्णुः ॐ विष्णुः, ॐ विष्णुः अद्य श्रीमद्भगवतो महापुरुषस्य श्रीभूनीलानायकस्य सौशील्यादिसकलकल्याणगुणगणसमलङ्कृतस्य श्रीमन्नारायणस्य नाभिकमलोद्भवस्य भगवदाज्ञया सकलजगत्सृष्टिं कुर्वतः अखिललोकपितामहस्य परार्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे दिनस्य द्वितीययामे तृतीये मुहूर्ते, अष्टमे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे, अष्टाविंशतितमे सत्यत्रेताद्वापरान्ते कलियुगे कलिप्रथमचरणे श्रीमन्नृपतिविक्रमार्कराज्यात् वर्तमाने अमुकतमे वर्षे, श्रीमद्रामानुजमुनिप्रादुर्भावाद् वर्तमाने अमुकतमे वर्षे, अमुकसंवत्सरे, अमुक-अयने, अमुक-ऋतौ, अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकनक्षत्रे, अमुकयोगे अमुक-करणे अमुकराशिस्थिते श्रीसूर्ये, अमुकराशिस्थिते चन्द्रे, अमुकराशिस्थिते देवगुरौ,**

**शेषेषु ग्रहेषु यथा यथास्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्टायां शुभपुण्यतिथौ अस्मिन् भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गते नेपालदेशे अमुकक्षेत्रे अमुकमण्डलान्तर्गते अमुकनगरे/अमुकग्रामे श्रीलक्ष्मीनारायण-भगवतः सन्निधौ वर्तमानः, शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनीय-शाखाध्यायी अमुकगोत्रोत्पन्नोऽमुकप्रवरान्वितः, अमुकनामशर्माऽहं/ वर्माऽहं/गुप्तोऽहम् अमुकगोत्रस्य अमुकप्रेतस्य (अमुकगोत्रायाः अमुकप्रेतायाः) एकादशाहे शास्त्रोक्तदुर्मरणदोषाणां मध्ये अमुकदुर्मरणदोषपरिहारपूर्वकम् और्ध्वदैहिकसम्प्रदानयोग्यता-प्राप्त्यर्थम् उत्तमलोकप्राप्त्यर्थञ्च नारायणबलिं करिष्ये । तत्र नारायणबलिकर्माङ्गभूतं श्रीमहाविष्णोर्यथोपचारैः पूजनञ्च करिष्ये।**

इति सङ्कल्प्य प्रायश्चित्तगोदानं कुर्यात्।

गोदानार्थं गां गोमूल्यकल्पितं द्रव्यं वा अग्रे कृत्वा गन्धादिभिः गां सम्पूज्य ब्राह्मणञ्च सम्पूज्य हस्ते कुशजलादिकमादाय –

**हरिः ॐ तत्सदिति देशकालौ सङ्कीर्त्यअमुकगोत्रस्य अमुकप्रेतस्य (अमुकगोत्रायाः अमुकप्रेतायाः) अमुकदुर्मरण-दोषपरिहारार्थं करिष्यमाणनारायणबलिकर्माधिकारसिध्यर्थम् इमां प्रायश्चित्तनिमित्तां गां रुद्रदैवतां गोरभावे तन्निष्क्रयीभूतं द्रव्यं विष्णुदैवतम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥**

इति दत्वा गां सम्प्रार्थ्य दानप्रतिष्ठां कुर्यात्। ततो दीपकलशविष्वक्सेनान् सम्पूज्य एकस्मिन् घटे तिलपूर्णपात्रोपरि शालग्रामस्वरूपिणं भगवन्तं पूजयेत् । (नारायणबलिस्थापनप्रकारस्तु ४३२ तमे पृष्टे चित्रावल्यां द्रष्टव्यः ।)

## अङ्गन्यासः

तत्रादौ पुरुषसूक्तेन स्वशरीरे तथा देवाङ्गे एकतन्त्रेण न्यासं कुर्यात्।

ॐ सहस्रशीर्षापुरुषः सहस्राक्षःसहस्रपात्।
सभूमिꣳसर्वतस्पृत्त्वात्यतिष्ठद्दशाङ्गुलम्॥ इति वामहस्ते,
ॐ पुरुषएवेदꣳसर्वंय्यद्भूतंय्यच्चभाव्यम्।
उतामृतत्त्वस्येशानोयदन्नेनातिरोहति॥ इति दक्षिणहस्ते,
ॐ एतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः।
पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि॥ इति वामपादे,
ॐ त्रिपादूर्द्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः।
ततोविष्ष्वङ्व्व्यक्क्रामत्साशनानशने अभि॥ इति दक्षिणपादे,
ततोविराडजायतविराजोऽअधिपूरुषः।
सजातोऽअत्त्यरिच्च्यतपश्चाद्भूमिमथोपुरः॥ इति वामजानुनी,
ॐ तस्माद्यज्ञात्सर्वहुतःसम्भृतम्पृषदाज्ज्यम्।
पशूँस्ताँश्चक्क्रेवायव्यानारण्याग्ग्राम्म्याश्चये॥ इति दक्षिणजानुनी,
ॐ तस्म्माद्यज्ञात्सर्वहुतऽऋचः सामानिजज्ञिरे।
छन्दाꣳसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत॥ इति वामकट्याम्,
ॐ तस्म्मादश्वाऽअजायन्तयेकेचोभयादतः।
गावोहजज्ञिरेतस्म्मात्तस्माज्जाताऽअजावयः॥ इति दक्षिणकट्याम्,
ॐ तंयज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः।
तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये॥ इति नाभौ,
ॐ यत्पुरुषंव्यदधुःकतिधाव्यकल्प्पयन्।
मुखङ्किमस्यासित्त्किम्बाहूकिमूरूपादावुच्च्येते॥ इति हृदये,
ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः कृतः।
ऊरूतदस्ययद्वैश्श्यः पद्भ्याꣳशूद्रोऽअजायत॥ इति कण्ठे,
ॐ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत।
श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत॥ इति वामबाहौ,

ॐ नाब्भ्याऽआसीदन्तरिक्ष९शीर्ष्णोद्यौः समवर्त्तत।
पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथालोकाँ२ऽअकल्पयन्॥ इति दक्षिणबाहौ,
ॐयत्पुरुषेणहविषादेवायज्ञमतन्वत।
व्वसन्तोऽस्यासीदाज्ज्यङ्ग्रीष्मऽइध्मः शरद्धविः॥
सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ।
देवायद्यज्ञन्तन्वानाऽअवध्नन्पुरुषम्पशुम्॥ इति नेत्रयोः,
ॐ यज्ञेन यज्ञमयजन्तदेवास्तानि धर्म्माणि प्प्रथमान्यासन्।
तेहनाकम्महिमानः सचन्तयत्रपूर्व्वेसाद्ध्याः सन्तिदेवाः॥ इति मूर्ध्नि।

## विष्णोः षोडशोपचारपूजा

आवाहनम् - ॐ सहस्रशीर्षा०
आगच्छ देवदेवेश ! संसारार्तिविनाशन !
पूजार्थं त्वं जगन्नाथ ! कुरु मे बहुधा कृपाम्॥ १॥
आसनम् - ॐ पुरुष ऽएवेद०
नानारत्नमये दिव्ये सुनन्दाद्युपलक्षिते।
एहि त्वमासने विष्णो ! पट्टवस्त्राविभूषिते॥ २॥
पाद्यम् - ॐ एतावानस्य०
वस्त्रपूतं शुभं वारि शङ्खे कृत्वा जगद्गुरो !
मया निवेदितं भक्त्या कुरु पाद्यं कृपां विभो॥ ३॥
अर्घ्यम् - ॐ त्रिपादूर्ध्व०
वनमालिन्! जगन्नाथ ! शङ्खचक्रगदाधर !
रुक्मिणीसहितस्त्वं हि गृहाणाऽर्घ्यमिदं हरे॥ ४॥
आचमनम् - ॐ ततो व्विराड०
भक्त्या समर्पितं देवं तुभ्यं मे परमात्मने।
वासुदेवाय नित्याय गृहाणाचमनं विभो॥ ५॥

स्नानम् – ॐ तस्माद्यज्ञात०

पुण्यतीर्थोदकेनाथ पञ्चामृतयुतेन वा।
चन्दनेनाभिमिश्रेण कुरु स्नानं जगत्पते॥ ६ ॥

वस्त्रम् – ॐ तस्माद्यज्ञात०

शुभ्रं नानाविधं देव ! महार्घं दिव्यमद्भुतम्॥
वस्त्रं गृहाण देवेश ! पवित्रं धौतमुज्ज्वलम्॥ ७ ॥

यज्ञोपवीतम् – ॐ तस्मादश्वा०

नवतन्तुकमेवेदं बाहुमूलोपरि स्थितम्।
भक्त्या समर्पितं तुभ्यमुपवीतं गृहाण वै॥ ८ ॥

गन्धम् – ॐ तं यज्ञं०

श्रीखण्डं देवदेवेश ! सुगन्धमतिवल्लभम्।
गृहाण परमानन्द ! बहुमूल्यं सकुङ्कुमम्॥ ९॥

तुलसीपुष्पमाल्यम् – ॐ यत्पुरुष०

वल्लभान्ते जगन्नाथ ! कोमलातिमनोहराम्।
गृहाण तुलसीं विष्णो मया सन्तोषितो भुवि॥१०॥

धूपदानम् – ॐ ब्राह्मणोऽस्य०

श्रीखण्डादियुतं दिव्यं कृष्णाऽगरुविमिश्रितम्।
भक्त्या समर्पितं धूपं गृहाण जगदीश्वर॥ ११ ॥

दीपदानम् – ॐ चन्द्रमा मनसो०

घृतवर्त्तियुतं दिव्यं रत्नरूपं तमोपहम्।
भक्त्या समर्पितं तुभ्यं गृहाण पुरुषोत्तम॥ १२ ॥

नैवेद्यम् – ॐ नाभ्या आसीदन्त०

विपक्वं घृतदुग्धाभ्यां शर्करादियुतं महत्।
नानाविधन्तु नैवेद्यं गृहाण यदुनन्दन॥ १३ ॥

ताम्बूलम् – ॐ यत्पुरुषेण०

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्।

**कर्पूरैलासमायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ १४ ॥**

दक्षिणा – **ॐ हिरण्यगर्भः०**

**हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।**

**अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ १५ ॥**

प्रदक्षिणा – **ॐ सप्तास्यासन्परि०**

**यानि कानि च पापानि ज्ञाताऽज्ञातकृतानि च ।**

**तानि सर्वाणि नश्यन्ति प्रदक्षिणा पदे पदे ॥ १६ ॥**

पुष्पाञ्जलिः – **ॐ यज्ञेन यज्ञ०**

**नानासुगन्धपुष्पाणि यथाकालोद्भवानि च ।**

**पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर ॥**

साष्टाङ्गप्रणामः –

**नमः सर्वहितार्थाय जगदाधारहेतवे ॥**

**साष्टाङ्गोऽयं प्रणामस्ते दीनत्वेन मया कृतः ।**

प्रार्थना –

**आवाहनं न जानामि न जानामि विसर्जनम् ॥**

**पूजां चैव न जानामि शरणं मे भवाऽच्युत ।**

एतत्कृतं यद्विष्णुपूजनं तेन प्रेतस्य/प्रेतायाः विमुक्तिरस्तु, श्रीविष्णुः प्रीणातु ।

इति महाविष्णुं सम्पूज्य ब्राह्मणवरणं कुर्यात् –

## ब्राह्मणवरणम्

तत आचार्यादीनां वरणम् । वरणद्रव्याणि अग्रे कृत्वा गन्धादिभिः पूजयित्वा हस्ते जलकुशादिकमादाय –

हरिः ॐ देशकालौ सङ्कीर्त्य अमुकगोत्रस्य अमुकप्रेतस्य (अमुकगोत्रायाः अमुकप्रेतायाः) दुर्मरणनिमित्तदोषनिवृत्तिपूर्व-

कौर्ध्वदेहिकसम्प्रदानयोग्यतासिद्ध्यर्थं करिष्यमाणनारायणबलिकर्मणि सूक्तपाठकरणार्थं होमादिकर्मकर्तुम् एभिर्वरणद्रव्यैः अमुकाऽमुकगोत्रान् अमुकाऽमुकशर्मणो ब्राह्मणान् युष्मानहं वृणे ।

ब्राह्मणाः – वृताः स्मः ।

यजमानः – **अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया ।**
**सुप्रसन्नैः प्रकर्त्तव्यं कर्मेदं विधिपूर्वकम् ॥**

ब्राह्मणाः – **यथाज्ञानं करिष्यामः ।**

## अष्टशक्तीनां पूजनम्

ततः पूर्वस्योत्तरतः स्थण्डिले श्वेतवस्त्रं प्रसार्य तस्योपरि ताण्डुलस्याष्टदलं कृत्वा तत्र पूर्वाद्यष्टदिक्षु अष्टशक्तीनां स्थापनं कृत्वाआवाहयेत् । तद्यथा –

पूर्वे – **ॐ रुक्मिण्यै नमः, रुक्मिणीम् आवाहयामि ॥ १ ॥**
आग्नेय्याम् – **ॐ सत्यभामायै नमः, सत्यभामाम् आवाहयामि ॥ २ ॥**
दक्षिणे – **ॐ जाम्बवत्यै नमः, जाम्बवतीम् आवाहयामि ॥ ३ ॥**
नैर्ऋत्याम् – **ॐनाग्नजित्यै नमः, नाग्नजितिम् आवाहयामि ॥ ४ ॥**
पश्चिमे – **ॐ कालिन्द्यै नमः, कालिन्दीम् आवाहयामि ॥ ५ ॥**
वायव्ये – **ॐ मित्रविन्दायै नमः, मित्रविन्दाम् आवाहयामि ॥ ६ ॥**
उत्तरे – **ॐ लक्ष्मणायै नमः, लक्ष्मणाम् आवाहयामि ॥ ७ ॥**
ऐशान्ये – **ॐ भद्रायै नमः,भद्राम् आवाहयामि ॥ ८ ॥**

## सत्येशकलशपूजनम्

अष्टदलमध्ये ताम्रकलशं संस्थाप्य तत्र सत्येशं पूजयेत् । तद्यथा–

भूमिस्पर्शं कुर्यात् –

**ॐ भूरसिभूमिरस्यदितिरसिविश्वधाया विश्वस्य भुवनस्यधर्त्री ।**
**पृथिवीं यच्छपृथिवीन्दृ ँ ह पृथिवीम्माहि ँ सीः ॥**

धान्यं विकिरेत् –

**ॐ ओषधयः समवदन्तसोमेनसहराज्ञा।**
**यस्मैकृणोतिब्ब्राह्मणस्तꣳराजन्पारयामसि॥**

कलशं स्थापेयत् –

**ॐ आजिग्घ्रकलशं मह्यात्त्वाव्विशन्त्विन्दवः।**
**पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रन्धुक्ष्वोरुधाराः पयस्वतीः**
**पुनर्म्माव्विशताद्रयि॥**

कलशे जलं पूरयेत् –

**ॐव्वरुणस्योत्तम्भनमसिव्वरुणस्य स्क्कम्भसर्ज्जनीस्थ्योव्वरुणस्य**
**ऋतसदन्यसि व्वरुणस्यऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद॥**

गन्धं निक्षिपेत् –

**ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषिणीम्।**
**ईश्वरींसर्वभूतानां तामिहोपह्वये श्रियम्॥**

सर्वौषधीः निक्षिपेत् –

**ॐ याऽयोषधीः पूर्व्वाजातादेवेब्भ्यस्त्रियुगम्पुरा।**
**मनैनुबब्भ्रूणामहꣳशतन्धामानिसप्तच॥**

दूर्वाङ्कुरान् निक्षिपेत् –

**ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषप्परि।**
**एवानोदूर्व्वेप्प्रतनुसहस्रेणशतेनच॥**

पञ्चवल्लवान् निक्षिपेत् –

**ॐ अश्श्वत्थेवोनिषदनम्पर्णेवोव्वसतिष्कृता।**
**गोभाजऽइत्त्किलासथयत्त्सनवथपूरुषम्।**

सप्तमृत्तिकाः निक्षिपेत् –

**ॐ स्योनापृथिवीनोभवानृक्षरानिवेशनी। यच्छानःशर्म्मसप्प्रथाः॥**

पूगीफलं स्थापयेत् -

**ॐ याः फलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः ।**
**बृहस्पतिप्प्रसूतास्त्तानोमुञ्चन्त्वꣳहसः ॥**

पञ्चरत्नानि निक्षिपेत् -

**ॐहिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकऽआसीत् ।**
**सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥**

हिरण्यं निक्षिपेत् -

**ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।**
**अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥**

युग्मवस्त्रेण  कलशं वेष्टयेत् -

**ॐ बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु ।**
**यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्रविणन्धेहिचित्रम् ।**
**उपयामगृहीतोसिबृहस्प्पतयेत्त्वैषतेयोनिर्बृहस्प्पतयेत्त्वा ॥**

कलशोपरि पूर्णपात्रस्थापयेत् -

**ॐ पूर्णादर्व्विपरापतसुपूर्ण्णापुनरापत ।**
**व्वस्नेवव्विक्क्रीणावहाऽइषमूर्ज्जꣳशतक्क्रतो ॥**

इति कलशं संस्थाप्य कलशोपरि सत्येशमूर्तिम् अग्न्युत्तारणपूर्वकं स्थापयेत् ।

मूर्तिं पात्रे निधाय घृतेनाभ्युक्ष्य तदुपरि दुग्धधारां जलधारां च दद्यात् । ततः अधोनिर्दिष्टम् अग्न्युत्तारणसूक्तञ्च पठेत् -

**ॐ समुद्रस्यत्वावकयाग्नेपरिव्ययामसि ॥**
**पावकोऽअस्मभ्यꣳशिवोभव ॥ १ ॥**

ॐ हिमस्यत्वाजरायुणाग्नेपरिव्ययामसि।
पावकोऽअस्मभ्यᳬशिवोभव ॥ २ ॥
ॐ अपामिदन्ययनᳬसमुद्रस्यनिवेशनम्।
अन्याँस्तेअस्मत्तपन्तुहेतयः। पावकोऽअस्मभ्यᳬशिवोभव ॥ ३ ॥
ॐ नमस्ते हरसेशोचिषेनमस्तेऽअस्त्वर्चिषे।
अन्याँस्तेऽअस्मत्तपन्तुहेतयः। पावकोऽअस्मभ्यᳬशिवोभव ॥ ४ ॥
ॐ प्राणदाऽअपानदाव्यानदावर्चोदावरिवोदा।
अन्याँस्तेअस्मत्तपन्तुहेतयः। पावकोअस्मभ्यᳬशिवोभव ॥ ५ ॥

ततः पञ्चामृतेन संस्नाप्य

ॐ पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसः ॥
सरस्वतीतुपञ्चधासोदेशेऽभवत्सरित् ॥

इति स्थापितकलशोपरि प्रतिमां संस्थापयेत्।

प्राणप्रतिष्ठा –

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञᳬसमिमन्दधातु। विश्वेदेवासऽइहमादयन्तामौँ३म्प्रतिष्ठ ॥

इति मन्त्रेण प्रतिमायाः प्राणप्रतिष्ठां कुर्यात्।

अष्टशक्तिसहित सत्येश ! सुप्रतिष्ठितो वरदो भव।

आवाहनम् – उर्व्यां क्षीरसमुद्रेऽस्मिन् व्योम्नि सत्येशः संस्थितः।
अत्र त्वं सत्यया सार्द्धं सत्येश ! भव सन्निधौ ॥१ ॥
अष्टशक्तिसहिताय सत्येशाय नमः, आवाहयामि।

आसनम् – सोमसूर्याग्निसङ्काशं पद्ममष्टदलान्वितम्।
आसनं गृह्णसत्येश ! सर्वदेवनमस्कृत ॥ २ ॥
आसनं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

पाद्यम् – रत्नाभरणसर्वाङ्ग! सर्वदेवनमस्कृत !
पाद्यं गृहाण देवेश ! गन्धपुष्पाक्षतैर्युतम् ॥ ३ ॥
पाद्यं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

अर्घ्यम् - सत्येश ! सुखभूयिष्ठ ! सत्येश ! सुखदायक !
सत्येश ! सत्यया युक्त ! गृहाणाऽर्घ्यंनमोऽस्तु ते ॥ ४ ॥
अर्घ्यं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

आचमनम् - गङ्गाजलसमानीतं सुवर्णकलशे स्थितम् ।
गृहाणाचमनं देव । त्रैलोक्यस्यापि पावनम् ॥ ५ ॥
आचमनं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

स्नानम् - क्षीरसागरकल्लोलैः स्नाहि पापनिषूदन !
पाहि मां भूतभव्येश ! शीतेन जलबिन्दुना ॥ ६ ॥
स्नानं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

वस्त्रम् - हरस्व सर्वदुरितं येनाऽहं वेष्टितो हरे!
वस्त्रेणाऽनेन शुभ्रेण सत्येश ! कुरु वाञ्छितम् ॥ ७ ॥
वस्त्रं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

यज्ञोपवीतम् - यज्ञे योगे तथा सांख्ये पवित्रस्त्वं सदोच्यसे ।
यज्ञोपवीतदानेन कुरु मां सर्वपावनम् ॥ ८ ॥
यज्ञोपवीतं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

चन्दनम् - सुगन्धं चन्दनं दिव्यं केशरागरुसंयुतम् ।
विलेपनं सुरश्रेष्ठ ! सर्वपापहरो भव ॥ ९ ॥
चन्दनं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

तुलसीपत्रम् - सत्यनामन् ! नमस्तुभ्यं मूर्ताऽमूर्तस्वरूपिणे ।
वासुदेव ! नृसिंहाख्य ! कपिलादित्य !भूधर ! ॥ ९ ॥
तुलसीपत्रं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

पुष्पम् - संकर्षण ! महावीर ! प्रद्युम्नाऽमितविक्रम ! ।
अनिरुद्धेश ! गोविन्द ! शार्ङ्गिन् चक्रिन् ! नमोस्तु ते ॥
वराहयुतयज्ञेश ! लक्ष्मीकान्तामृतेश्वर !
पुत्रपौत्रप्रदस्त्वञ्च पापशत्रो ! निरञ्जन ! ॥ १० ॥
पुष्पं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

धूपम् - शक्तिवृन्दयुतो देव ! पूजाधूपं सुरेश्वर ! ।
गृहाण त्वं तु सत्येश ! सत्यया सह रक्ष माम् ॥ ११ ॥
धूपमाघ्रापयामि, अष्टशक्तिसहिताय सत्येशाय नमः

दीपम् - ज्योतिरूपमरूपं त्वां वदन्ति मुनिपुङ्गवाः ।
ज्योतिर्मध्ये स्थितो देव ! दीपं गृह्ण नमोऽस्तु ते ॥ १२ ॥
दीपं सन्दर्शयामि, अष्टशक्तिसहिताय सत्येशाय नमः

नैवेद्यम् - त्राता त्वमेव सत्येश ! सत्यया सह चिन्त्यसे ।
गृहाण देवदेवेश ! मम नैवेद्यमुत्तमम् ॥ १३ ॥
नैवेद्यं निवेदयामि, अष्टशक्तिसहिताय सत्येशाय नमः

ताम्बूलम् - पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
एलादिचूर्णसंयुक्तं ताम्बुलं प्रतिगृह्यताम् ॥ १४ ॥
ताम्बूलं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

दक्षिणा - हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ १५ ॥
दक्षिणां समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

प्रदक्षिणा - नारायण ! सुराधीश ! पुराणपुरुषोत्तम !
पापोपशमानार्थाय प्रीत्यर्थं प्रतिगृह्यताम् ॥ १६ ॥
प्रदक्षिणां समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

अर्घ्यम् - अनेकजन्मसम्भूतं पापं चैव सुरेश्वर !
मया दत्तार्घ्यदानेन भुक्ति-मुक्तिप्रदो भव ॥ १७ ॥
अर्घ्यं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

नमस्कारः - नारायण ! नमस्तेऽस्तु वासुदेव ! नमो नमः ।
त्रैलोक्यजगदाधार ! त्राहि मां मधुसूदन ॥ १८ ॥
नमस्कारं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

आरार्तिक्यम् - चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ॥ १९ ॥
आरार्तिक्यं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

पुष्पाञ्जलिः – नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च।
पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर॥ २०॥
पुष्पाञ्जलिं समर्पयामि, अष्टशक्तिसहिताय सत्येशाय नमः

प्रणामः – अग्ने ! रुद्रेश ! गोविन्द ! विष्णो ! चक्रिन् ! नमोऽस्तुते।
पूजां गृहाण देवेश ! प्रीयतां गरुडध्वज॥ २१॥

ततः षोडशोपचारैः पूर्वोक्तानामष्टशक्तीनां पूजनं कृत्वा प्रार्थनां कुर्यात्–

प्रार्थना – अपराधसहस्राणि लक्षकोटियुतानि च।
नश्यन्ति तत्क्षणात् पापं सत्येशस्य च पूजनात्॥
सत्येश ! पञ्चवक्त्रस्त्वं लक्ष्म्या सह जगत्पतिः।
वासुदेवः स्थितः पूर्वे नृसिंहो दक्षिणे स्थितः॥
कपिलः पश्चिमास्ये तु वराहश्चोत्तरे स्थितः।
ऊर्ध्ववक्त्रेऽच्युतो ज्ञेय एतद्वै ब्रह्मपञ्चकम्॥
सत्येशसंस्थितं राजन् पूजाकाले सदैव हि।
क्षीरोदपाथे चन्द्रस्थपद्मकर्णिकसंस्थितम्॥
पद्म–कौमोदकी–शङ्ख–चक्राण्यस्त्राणि धारिणम्।

नारिकेलेन अर्घ्यदानम् –

यज्ञेशाऽच्युत ! देवेश। सत्यरूप ! सनातन !
अनेनाऽर्घ्यप्रदानेन सर्वपापाद्विमोचय॥
सत्येशाय नमस्तुभ्यं पापहा परमेश्वर !
मया दत्ताऽर्घ्यदानेन प्रेतमुक्तिप्रदोभव॥

एतत्कृतं यत्सत्येशपूजनं तेन सत्येशः प्रीणातु।

## पञ्चकलशेषु ब्रह्मादीनां पूजनम्

ततोऽग्नेर्दक्षिणतः प्राक्संस्थं कलशस्थापनविधिना पञ्च कलशान् संस्थाप्य तेषां कलशानामुपरि पञ्चमूर्तीनां कृतपूर्वोक्ताग्न्युत्तारणानां पञ्चामृतस्नापितानाम् अधोलिखितमन्त्रैः आवाहनं कुर्यात् -

ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥

ॐ ब्रह्मयज्ञानम्प्रथममपुरस्ताद्द्विसीमतः सुरुचोव्वेनऽआवः।
सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः॥

ॐ ब्रह्मणे नमः, ब्रह्माणम् आवाहयामि॥ १॥

ॐ इषेत्वोर्ज्जेत्वाव्वायवस्थदेवोवः सविताप्प्रार्प्पयतु श्रेष्ठतमाय कर्म्मणऽआप्यायद्ध्वमग्घ्न्याऽइन्द्रायभागं प्रजापतीरन-मीवाऽअयक्ष्मामावस्तेनईशतमाघश६सोद्ध्रुवाऽअस्मिन् गोपतौस्यातबह्वीर्य्यजमानस्यपशून्पाहि॥

ॐ इदंविष्णुर्व्विचक्क्रमेत्रेधानिदधेपदम्।
समूढमस्यपाँ सुरेस्वाहा॥

ॐ विष्णवे नमः, विष्णुम् आवाहयामि॥ २॥

ॐ अग्नऽआयाहिवीतये गृणानोहव्यदातये। निहोतासत्सिबर्हिषि॥

ॐ नमस्तेरुद्द्रमन्यवऽउतोतऽइषवे नमः। बाहुभ्यामुततेनमः॥

ॐ रुद्राय नमः, रुद्रम् आवाहयामि॥ ३॥

ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तु पीतये। शँय्योरभिरस्रवन्तुनः॥

ॐ यमायत्त्वाङ्गिरस्वतेपितृमते स्वाहा। स्वाहाघर्म्मास्वाहाघर्म्मः पित्त्रे॥

यमाय नमः, यमम् आवाहयामि॥ ४॥

ॐ अक्रन्कर्म्मकर्मकृतः सहव्वाचामयोभुवा।
देवेब्भ्यः कर्म्मकृत्वास्तंप्रेतसचाभुवः॥

ॐ प्रेताजयतानरऽइन्द्रोवः शर्म्मयच्छतु॥
उग्ग्रावः सन्तुबाहवोऽनाधृष्ष्यायथासथ॥

**अपसव्येन – अमुकगोत्राऽमुकप्रेतविष्णुरूपाय प्रेताय नमः, प्रेतम् आवाहयामि ॥ ५ ॥**

एवं पञ्चदेवतानां स्थापनं कृत्वा सर्वेषां प्राणप्रतिष्ठां कुर्यात्।

**ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञᳬसमिमन्दधातु। व्विश्श्वेदेवासऽइहमादयन्तामोँ३म्प्रतिष्ठ ॥**

ततो ब्रह्मादिचतुष्टयदेवताः **सव्येन,** प्रेतम् **अपसव्येन** क्रमशः सम्पूजयेत्। ततः **सव्येन** हस्ते जलमादाय – एतत्कृतं ब्रह्मादिपञ्चदेवतानां पूजनं तेन ब्रह्मादयः प्रीणन्तु, न्यूनं सम्पूर्णमस्तु। ततो विष्णुं स्तुवीत–

**जितन्ते पुण्डरीकाक्ष ! नमस्ते विश्वभावन !**
**नमस्तुभ्यं हृषीकेश ! महापुरुषपूर्वज ! ॥**
**अनादिनिधनो देव ! शङ्खचक्रगदाधर !**
**अक्षय !पुण्डरीकाक्ष ! प्रेतमोक्षप्रदो भव ॥**

## अथ हवनम्

अत्र हवनपद्धत्युक्तविधिना अग्निस्थापनं पञ्चवारुणीहोमादिकञ्च कृत्वा प्रधानहोमं कुर्यात् –

### प्रधानहोमः

घृतेन जुहूयात् –

**ॐयुञ्जतेमनऽउतयुञ्जतेधियोव्विप्प्राव्विप्प्रस्यबृहतोव्विपश्चितः व्विहोत्रादधेव्वयुनाविदेकऽइन्महीदेवस्यसवितुः परिष्टुतिः स्वाहा ॥**
**ॐविष्णवे स्वाहा, इदं विष्णवे नमः ॥ १ ॥**
**ॐ इदंव्विष्णुर्व्विचक्क्रमेत्रेधानिदधेपदम्।**
**समूढमस्यपाᳬसुरेस्वाहा ॥**
**ॐविष्णवे स्वाहा, इदं विष्णवे नमः ॥२॥**
**ॐइरावतीधेनुमतीहिभूतᳬसूयवसिनीमनवेदशस्या।**
**व्यस्क्कब्भ्नारोदसीविष्णवेतेदाधर्त्थपृथिवीमभितोमयूखैः स्वाहा ॥ ३ ॥**

ॐ देवश्श्रुतौदेवेष्वाघोषतं
प्राचीप्प्रेतमद्ध्वरङ्कल्पयन्तीऽऊर्द्धयज्ञंनयतं –
माजिह्वरतम्।स्वंगोष्ठमावदतंदेविदुर्य्येऽआयुर्म्मानिर्व्वादिष्टंप्रजां–
मानिर्व्वादिष्टमत्ररमेथांव्वर्ष्मन्पृथिव्याः स्वाहा ॥ ४ ॥
ॐविष्णोर्नुकंव्वीर्य्याणिप्प्रवोचंयः
पार्थिवानिव्विममेरजाᳪसि ॥ योऽअस्क्कभायदुत्तर
ᳪसधस्थंव्विचक्क्रमाणस्त्रेधोरुगायोव्विष्णवेत्त्वास्वाहा ॥ ५ ॥
ॐदिवोवाव्विष्णऽउतवापृथिव्यामहोवाव्विष्णऽउरोरन्तरिक्षात् ॥
उभाहिहस्ताव्वसुनापृणस्वाप्प्रयच्छदक्षिणादोतसव्याद्विष्णवेत्वा
स्वाहा ॥ ६ ॥
ॐ प्रतद्विष्णुः स्तवतेव्वीर्येणमृगोनभीमः कुचरोगिरिष्ठाः ।
यस्योरुषुत्रिषुव्विक्रमणेष्वधिक्षियन्तिभुवनानिव्विश्श्वास्वाहा ॥ ७ ॥
ॐ व्विष्णोरराटमसिव्विष्णोःश्नप्त्रेस्त्थोव्विष्णोःस्यूर
सिव्विष्णोर्द्ध्रुवोसिव्वैष्णवमसिव्विष्णवेत्त्वा स्वाहा ॥ ८ ॥

## षोडषाज्यहोमः

षोडषाज्यहोमः

**ॐ लोमभ्यः स्वाहा लोमभ्य इदं न मम** । इति वारद्वयं (२) जुहुयात्

**ॐ त्वचे स्वाहा त्वचे इदं न मम** । इति वारद्वयं (२) जुहुयात्

**ॐ लोहिताय स्वाहा लोहिताय इदं न मम** । इति वारद्वयं(२)जुहुयात्

**ॐ मेदोभ्यः स्वाहा मेदोभ्य इदं न मम**। इति वारद्वयं(२) जुहुयात्

**ॐ माᳪसेभ्यः स्वाहा माᳪसेभ्य इदं न मम** । इति वारद्वयं(२)जुहुयात्

**ॐ स्नावभ्यः स्वाहा स्नावभ्य इदं न मम**। इति वारद्वयं (२) जुहुयात्

**ॐ स्थभ्यः स्वाहा स्थभ्य इदं न मम**। इति वारद्वयं (२) जुहुयात्

**ॐ मज्जभ्यः स्वाहा मज्जभ्य इदं न मम**। इति वारद्वयं (२) जुहुयात्

पुनराज्यहोमः -

ॐ रेतसे स्वाहा ॥१॥ ॐ पायवे स्वाहा ॥२॥
ॐ आयासाय स्वाहा ॥३॥ ॐ प्रायासाय स्वाहा ॥ ४ ॥
ॐ संयासाय स्वाहा ॥ ५ ॥ ॐ वियासाय स्वाहा ॥ ६ ॥
ॐ उद्यासाय स्वाहा ॥ ७ ॥ ॐ शुचे स्वाहा ॥ ८ ॥
ॐ शोचते स्वाहा ॥ ९ ॥ ॐ शोचमानाय स्वाहा ॥ १० ॥
ॐ शोकाय स्वाहा ॥ ११ ॥ ॐ तपसे स्वाहा ॥ १२ ॥
ॐ तप्यते स्वाहा ॥ १३ ॥ ॐ तप्यमानाय स्वाहा ॥ १४ ॥
ॐ तप्ताय स्वाहा ॥ १५ ॥ ॐ घर्माय स्वाहा ॥ १६ ॥
ॐ निष्कृत्यै स्वाहा ॥ १७ ॥ ॐ प्रायश्चित्त्यै स्वाहा ॥ १८ ॥
ॐ भेषजाय स्वाहा ॥ १९ ॥ ॐ यमाय स्वाहा ॥ २० ॥
ॐ अन्तकाय स्वाहा ॥ २१ ॥ ॐ मृत्यवे स्वाहा ॥ २२ ॥
ॐ ब्रह्मणे स्वाहा ॥ २३ ॥ ॐब्रह्महत्यायै स्वाहा ॥ २४ ॥
ॐ विश्वेभ्यो देवेभ्यः स्वाहा ॥२५॥ ॐ द्यावृथिवीभ्याँ स्वाहा ॥ २६ ॥

इति मन्त्रैराज्यं हुत्वा यथामन्त्रत्यागः ।

## पुरुषसूक्तमन्त्रैर्होमः

ततः पुरुषसूक्तेन षोडशाहुतिभिर्होमं कुर्यात् -

ॐ सहस्रशीर्षा० स्वाहा ॥ इदं विष्णवे न मम ॥ १ ॥ इति त्यागः सर्वत्र ॥ ॐपुरुषऽएवेदँसर्वं० स्वाहा ॥ २ ॥
ॐ एतावानस्य० स्वाहा ॥ ३ ॥
ॐ त्रिपादूर्ध्वम्० स्वाहा ॥ ४ ॥
ॐ ततो विराड० स्वाहा ॥ ५ ॥
ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतं० स्वाहा ॥ ६ ॥
ॐ तस्माद्यज्ञात्सर्वहुत ऋचः० स्वाहा ॥ ७ ॥
ॐ तस्मादश्वा० स्वाहा ॥ ८ ॥

ॐ तं यज्ञं० स्वाहा ॥ ९ ॥

ॐ यत्पुरुषं० स्वाहा ॥ १० ॥

ॐ ब्राह्मणोऽस्य० स्वाहा ॥ ११ ॥

ॐ चन्द्रमा० स्वाहा ॥ १२ ॥

ॐ नाभ्याऽआसी० स्वाहा ॥ १३ ॥

ॐ यत्पुरुषेण० स्वाहा ॥ १४ ॥

ॐ सप्तास्यासन्० स्वाहा ॥ १५ ॥

ॐ यज्ञेन यज्ञ० स्वाहा ॥ १६ ॥

## घृताक्तपायसचरुहोमः

ॐ इदंव्विष्णुर्व्विचक्क्रमेत्रेधानिदधेपदम् । समूढमस्यपाँ सुरेस्वाहा ॥

ॐ विष्णवे स्वाहा, इदं विष्णवे नमः ॥१॥

ॐ अपोदेवामधुमतीरगृभ्णन्नूर्ज्जस्वतीराजस्वश्चिताना: ॥

याभिर्म्मित्राव्वरुणावब्भ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यराती स्वाहा ॥ २ ॥

ॐ विष्णवे स्वाहा, इदं विष्णवे नमः

ॐ प्रपर्व्वतस्यवृषभस्यपृष्ठान्नावश्श्चरन्तिस्वसिचऽइयानाः ॥

ताऽआववृत्रन्नधरागुदक्ताअहिम्बुन्ध्यमनुरीयमाणाः ॥

व्विष्णोर्व्विक्क्रमणमसिव्विष्णोर्विक्रान्तमसिविष्णोः क्रान्तमसिस्वाहा ।

ॐविष्णवे स्वाहा, इदं विष्णवे नमः ॥ ३ ॥

ॐ व्विष्णोर्नुकंवीर्य्याणिप्प्रवोचं य्यः

पार्थिवानिव्विममेरजाँसि । योऽअस्क्कभायदुत्तर

ँसधस्त्थंव्विचक्रमाणस्त्रेधोरुगायोविष्णवेत्वा स्वाहा ।

ॐ विष्णवे स्वाहा, इदं विष्णवे नमः ॥ ४ ॥

ॐ दिवोवाविष्णऽउतवापृथिव्व्यामहोवाव्विष्णऽउरोरन्तरिक्षात् ।

उभाहिहस्ताव्वसुनापृणस्वप्प्रयच्छदक्षिणादोतसव्याद्विष्णवेत्वास्वाहा ॥

ॐ विष्णवे स्वाहा, इदं विष्णवे नमः ॥ ५ ॥

ॐ प्रतद्विष्णुः स्ववतेव्वीर्य्येण मृगोनभीमः कुचरोगिरिष्ठाः।
यस्योरुषुत्रिषुविक्क्रमणेष्ष्वधिक्षियन्तिभुवनानिविश्वास्वाहा॥
ॐ विष्णवे स्वाहा, इदं विष्णवे नमः॥ ६॥
ॐ व्विष्णोरराटमसिव्विष्णोः श्नप्त्रेस्थोव्विष्णोः स्यूर
सिव्विष्णोर्द्ध्रुवोसि॥ व्वैष्णवमसिव्विष्णवेत्त्वा॥
ॐ विष्णवे स्वाहा, इदं विष्णवे नमः॥ ७॥
ॐ तद्विप्प्रासोविपन्न्यवोजागृवाँ॒सःसमिन्धते।
विष्णोर्यत्परमंपदँ॒स्वाहा।
ॐ विष्णवे स्वाहा, इदं विष्णवे नमः॥ ८॥
ॐ व्विष्णोःकर्म्माणिपश्यतयतोव्व्रतानिपस्पशे। इन्द्रस्य
युज्ज्यःसखास्वाहा॥
ॐ विष्णवे स्वाहा, इदं विष्णवे नमः॥ ९॥
ॐ तद्विष्ष्णोःपरमं पदँ॒सदा पश्यन्ति सूरयः। दिवीवचक्षुराततं स्वाहा॥
ॐविष्णवे स्वाहा, इदं विष्णवे नमः॥ १०॥
ॐ अद्भ्यः सम्भृतः पृथिव्यैरसाच्चविश्वकर्मणःसमवर्तताग्रे।
तस्यत्वष्टाविदधुद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रे स्वाहा॥
ॐ विष्णवे स्वाहा, इदं विष्णवे नमः॥ ११॥
ॐ वेदाहमेतंपुरुषंमहान्तमादित्यवर्णं तमसः परस्तात्।
तमेवविदित्वातिमृत्युमेतिनान्यः पन्थाविद्यतेऽयनाय स्वाहा।
ॐ विष्णवे स्वाहा, इदं विष्णवे नमः॥ १२॥
ॐ प्रजापतिश्चरतिगर्भेऽअन्तरजायमानोबहुधा व्विजायते।
तस्ययोनिंपरिपश्यन्तिधीरास्तस्मिन्हतस्त्थुर्ब्भुवनानिव्विश्वास्वाहा॥
ॐविष्णवे स्वाहा, इदं विष्णवे नमः॥ १३॥
ॐ योदेवेभ्यऽआतपतियोदेवानां पुरोहितः।
पूर्वोयोदेवेभ्योजातोनमोरुचायब्राह्मयेस्वाहा।

**ॐ विष्णवे स्वाहा, इदं विष्णवे नमः ॥ १४ ।**

**ॐ रुचंब्राह्मञ्जनयन्तोदेवाअग्रे तदब्रुवन् ।**

**यस्त्वैवंब्राह्मणोविद्यात्तस्यदेवाअसन्वशेस्वाहा ॥**

**ॐ विष्णवे स्वाहा, इदं विष्णवे नमः ॥ १५ ॥**

**ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौ**

**व्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मइषाण स्वाहा ॥**

**ॐ विष्णवे स्वाहा, इदं विष्णवे नमः ॥ १६ ॥**

इति षोडश चर्वाहुतयः ।

## घृताक्ततिलयवशर्करामिश्रितो होमः

ततो घृताक्ततिलयवशर्करामिश्रितैर्जुहुयात् –

**ॐ तद्विप्रासोव्विपन्न्यवोजागृवाँ सः समिन्धते ॥**

**विष्णोर्यत्परमंपदँस्वाहा ॥**

**ॐविष्णवे स्वाहा, इदं विष्णवे नमः ।**

इति मन्त्रेण अष्टोत्तरशतं जुहुयात् । ततः सर्वान् देवान् पुनः सम्पूजयेत् ।

ततः हवनपद्धत्युक्तविधिना उत्तराङ्गहोमं कृत्वा, दिक्पालबलिं दत्वा पूर्णाहुतिं कृत्वा पूर्णपात्रञ्च दद्यात् । ततः उत्तरपरिषेचनादिकञ्च सर्वं समाप्य ब्राह्मणभोजनं दद्यात् –

**ब्राह्मणभोजनम् –**

अद्य अमुकगोत्रस्य अमुकप्रेतस्य (अमुकगोत्रायाः अमुकप्रेतायाः) अमुकदुर्मरणनिमित्तकनारायणबलिहवनकर्मणः साङ्गतासिद्ध्यर्थं यथासम्पन्नेन अन्नेन यथासंख्यकान् ब्राह्मणान् एकं वा भोजयिष्ये ।

विप्रान् सम्भोज्य आमान्नदक्षिणां वा दद्यात् । तेन श्रीविष्णुः प्रीयताम् ।

## विष्णुतर्पणम्

आचम्य सङ्कल्पं कुर्यात् -

**अद्य अमुकगोत्रस्य अमुकप्रेतस्य (अमुकगोत्रायाः अमुकप्रेतायाः) अमुकदुर्मरणनिमित्तकनाराणबलिपूर्वाङ्गभूतं परलोके महत्तृषा-निवारणार्थं वैष्णवैः सूक्तैराद्यन्तयोः पुराणश्लोकत्रयावृत्त्या विष्णोरुपरि विष्णुतर्पणमहं करिष्ये।**

ततो जल-तिल-दुग्ध-यव-सर्वोषधी-तुलसीदल-मिश्रोदकेन शङ्खेन तर्पणं कुर्यात् **सव्येनैव** -

**अनादिनिधनो देवः शङ्खचक्रगदाधरः।**
**अव्ययः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव॥ १॥ विष्णुं तर्पयामि**
**अतसीपुष्पसङ्काशं पीतवाससमच्युतम्।**
**ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम्॥ २॥ विष्णुं तर्पयामि**
**कृष्ण! कृष्ण! कृपालो! त्वमगतीनां गतिर्भव।**
**संसारार्णवमग्नानां प्रसीद पुरुषोत्तम!॥ ३॥ विष्णुं तर्पयामि**
**नारायण! सुरश्रेष्ठ! लक्ष्मीकान्त! जनार्दन!।**
**अनेन तर्पणेनाथ प्रेतमोक्षप्रदो भव॥ ४॥ विष्णुं तर्पयामि**

ततः **ॐ सहस्रशीर्षेति** षोडशमन्त्रैः विष्णुं तर्पयित्वा पुनः **अनादिनिधने**त्यादिचतुर्भिः श्लोकैः विष्णुं तर्पयित्वा ॐ युञ्जते० इत्यादिमन्त्रैस्तर्पणं कुर्यात् -

**ॐ युञ्जते मनऽउतयुञ्जतेधियोव्विप्राव्विप्रस्यबृहतोव्विपश्चितः। व्विहोत्रादधेव्वयुनाविदेकऽइन्महीदेवस्यसवितुः परिष्टुतिः स्वाहा॥१॥**
**विष्णुं तर्पयामि**

**ॐ इदंव्विष्णुर्व्विचक्क्रमेत्रेधानिदधेपदम्। समूढमस्यपाँसुरे स्वाहा॥ २॥**
**विष्णुं तर्पयामि**

**ॐ इरावतीधेनुमतीहिभूतँ सूयवसिनीमनवेदशस्या। व्यस्कब्भ्नारोदसीव्विष्णवेतेदाधर्त्थपृथिवीमभितोमयूखैः स्वाहा॥ ३॥**
**विष्णुं तर्पयामि**

ॐदेवश्रुतौदेवेष्वाघोषतम्प्राचीप्रेत मदध्वरङ्कल्प्पयन्तीऽऊर्द्धयज्ञं नयतम्माजिह्वरतम्। स्वङ्गोष्ठमावदतन्देविदुर्य्येऽआयुर्मानिर्व्वादिष्टं प्रजाम्मानिर्व्वादिष्टमत्ररमेथांवर्ष्मन्पृथिव्व्याः स्वाहा ॥ ४ ॥

विष्णुं तर्पयामि

ॐ व्विष्णोर्नुकंव्वीर्याणिप्प्रवोचंय्यः पार्थिवानिव्विममेरजाᳪंसि। योऽअस्कभायदुत्तरᳪंसधस्थंव्विचक्क्रमाणस्त्रेधोरुगायोविष्णवेत्वास्वाहा ॥ ५ ॥

विष्णुं तर्पयामि

ॐ दिवोवाव्विष्णऽउतवापृथिव्व्यामहोवाव्विष्णऽउरोरन्तरिक्षात् । उभाहि हस्ताव्वसुना पृणस्वप्प्रयच्छदक्षिणादोतसव्व्याद्व्विष्णवेत्त्वास्वाहा ॥६ ॥

विष्णुं तर्पयामि

ॐ प्रतद्व्विष्णुः स्तवतेव्वीर्य्येणमृगोनभीमः कुचरोगिरिष्ठाः। यस्योरुषुत्रिषुव्विक्क्रमणेष्ष्वधिक्षियन्तिभुवनानिव्विश्वा स्वाहा ॥ ७ ॥

विष्णुं तर्पयामि

ॐ व्विष्णोरराटमसिव्विष्णोःश्नप्त्रेस्थोव्विष्णोः स्यूरसि व्विष्णोर्द्ध्रुवोऽसिव्वैष्णवमसिव्विष्णवेत्वास्वाहा ॥ ८ ॥

विष्णुं तर्पयामि

पुनः **अनादिनिधनो देव** इत्यादिचतुर्भिः श्लोकैस्तर्पयेत् –

अनादिनिधनो देवः शङ्खचक्रगदाधरः।
अव्ययः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव ॥ १ ॥ विष्णुं तर्पयामि
अतसीपुष्पसङ्काशं पीतवाससमच्युतम्।
ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥ २ ॥ विष्णुं तर्पयामि
कृष्ण ! कृष्ण ! कृपालो ! त्वमगतीनां गतिर्भव।
संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ! ॥ ३ ॥ विष्णुं तर्पयामि
नारायण ! सुरश्रेष्ठ ! लक्ष्मीकान्त ! जनार्दन !।
अनेन तर्पणेनाथ प्रेतमोक्षप्रदो भव ॥ ४ ॥ विष्णुं तर्पयामि

ततः युजेवाम् इत्यादिमन्त्रैस्तर्पयेत् -

ॐ युजेवांब्रह्मपूर्व्व्यन्नमोभिर्व्विश्लोकऽएतुपथ्येवसूरेः ।
श्रृण्वन्तुव्विश्वेऽअमृतस्यपुत्राऽआयेधामानिदिव्यानितस्त्थुः ॥ १ ॥
विष्णुं तर्पयामि

ॐ यस्यप्प्रयाणमन्न्वन्न्यऽइद्ययुर्द्देवादेवस्यमहिमानमोजसा ।
यः पार्थिवानि व्विममेसऽएतशोरजाँसिदेवः सवितामहित्वना ॥ २ ॥
विष्णुं तर्पयामि

ॐ देवसवितःप्प्रसुवयज्ञंप्रसुवयज्ञपतिंभगाय ।
दिव्योगन्धर्व्वःकेतपूः केतन्नः पुनातु व्वाचस्प्पतिर्व्वाचन्नः स्वदतु ॥ ३ ॥
विष्णुं तर्पयामि

ॐ इमन्नोदेवसवितर्य्यज्ञंप्रणयदेवा व्व्यँसखिविँदसत्राजितंधनजितँ स्वर्जितम् ।
ऋचास्तोमँसमर्द्धयगायत्रेणरथन्तरंबृहद्गायत्रवर्तनिस्वाहा ।४।
विष्णुं तर्पयामि

ॐदेवस्यत्त्वा सवितुः प्प्रसवेऽश्विनोर्ब्बाहुब्भ्यां प्पूष्णोहस्ताभ्याम् ।
आददेगायत्रेण छन्दसाङ्गिरस्वत् पृथिव्याः ॥ ५ ॥
विष्णुं तर्पयामि

ॐ अब्भ्रिरसिनार्य्यसित्त्वयाव्वयमग्निँशकेमखनितुँसधस्त्थऽआ ।
जागतेनछन्दसाङ्गिरस्वत् ॥ ६ ॥ विष्णुं तर्पयामि

ॐ हस्तऽआधायसविताब्बिभ्रदब्भ्रिँहिरण्ययीम् ।
अग्नेर्ज्योतिर्निचाय्य पृथिव्याऽअद्ध्याभरदानुष्टुभेनच्छन्दसाङ्गिरस्वत् ॥ ७ ॥
विष्णुं तर्पयामि

ॐ व्विष्णोः कर्म्माणिपश्यतयतोव्रतानिपस्पशे । इन्द्रस्य युज्यः सखा ॥८॥
विष्णुं तर्पयामि

तद्विष्णोः परमं पदँसदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥९॥
विष्णुं तर्पयामि

पुनः **अनादिनिधनो देवे**त्यादि चतुर्भिः श्लोकैस्तर्पयेत् –

**अनादिनिधनो देवः शङ्खचक्रगदाधरः ।**
**अव्ययः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव ॥ १ ॥ विष्णुं तर्पयामि**

**अतसीपुष्पसङ्काशं पीतवाससमच्युतम् ।**
**ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥ २ ॥ विष्णुं तर्पयामि**

**कृष्ण ! कृष्ण ! कृपालो ! त्वमगतीनां गतिर्भव ।**
**संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ! ॥ ३ ॥ विष्णुं तर्पयामि**

**नारायण ! सुरश्रेष्ठ ! लक्ष्मीकान्त ! जनार्दन ! ।**
**अनेन तर्पणेनाथ प्रेतमोक्षप्रदो भव ॥ ४ ॥ विष्णुं तर्पयामि**

ततः रक्षोहणमित्यादिमन्त्रैस्तर्पयेत् –

**ॐरक्षोहणं ब्बलगहनं व्वैष्ष्णवीमिदमहन्तं बलगमुत्किरामि-यम्मेनिष्ट्योयममात्योनिचखानेदमहन्तं ब्बलगमुत्किरामि यम्मे-समानोयमसमानोनिचखानेदमहन्तं ब्बलगमुत्किरामियम्मे-सबन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्तं ब्बलगमुत्किरामियम्मे-सजातोयमसजातो निचखानोत्कृत्याङ्किरामि ।1।**

**विष्णुं तर्पयामि**

**ॐ स्वराडसिसपत्नहासत्त्रराडस्यभिमातिहाजनराडसिरक्षोहा सर्व्वराडस्यमित्त्रहा ॥ २ ॥ विष्णुं तर्पयामि**

**ॐ दिविव्विष्णुर्व्यक्रँस्तजागतेनछन्दसाततोनिर्भक्तोयोस्मान्द्वेष्टियञ्चवयं द्विष्मोऽन्तरिक्षेव्विष्णुर्व्यक्रँस्तत्रैष्टुभेनछन्दसाततोनिर्भक्तोयोऽस्मान्द्वेष्ट्टिय-ञ्चव्वयंद्विष्मोऽस्म्मादन्नादस्यैप्प्रतिष्ठायाऽअगन्मस्वःसञ्ज्योतिषाभूम ॥ ३ ॥**

**विष्णुं तर्पयामि**

**ॐ प्रेताजयतानरऽइन्द्रोवःशर्म्मच्छतु ।**
**उग्रावः सन्तुबाहवोऽनाधृष्या यथासथ ॥ ४ ॥ विष्णुं तर्पयामि**

ॐ अश्वस्तूपरोगोमृगस्तेप्प्राजापत्त्याः कृष्णग्ग्रीवऽआग्ग्नेयोरराटेपुरस्तात्त्सारस्वतीमेष्ष्यधस्ताद्धन्वोराश्विनावधोरामौबाह्वोःसौमापौष्णः श्यामोनाब्भ्याꣳसौर्य्ययामौश्वेतश्चकृष्णश्चपार्श्वयोस्त्वाष्ट्रौलोमशसक्थौसक्थ्योर्व्वायव्व्यः श्वेतः पुच्छऽइन्द्रायस्वपस्यायव्वेहद्वैष्णवोव्वामनः ॥ ५ ॥

विष्णुं तर्पयामि

ॐ व्विष्णोः क्क्रमोऽसिपत्त्क्नहागायत्त्रंछन्दऽआरोह पृथिवीमनुव्विक्क्रमस्व व्विष्णोःक्क्रमोस्यऽभिमातिहात्त्रैष्टुभञ्छन्दऽओहान्तरिक्षमनुविक्क्रमस्वव्विष्णोःक्रमोऽस्यरातीयतोहन्ताजागतञ्छन्दऽआरोहदिवमनुव्विक्क्रमस्वव्विष्णोःक्रमोऽसिशत्त्रूयतोहन्तानुष्टुभञ्छन्दऽआरोहदिशोऽनुव्विक्रमस्व ॥ ६॥

विष्णुं तर्पयामि

ॐ साव्विश्वायुः साव्विश्वकर्म्मासाव्विश्श्वधायाः ।
इन्द्रस्यत्त्वाभागꣳसोमेनातनच्म्मिव्विष्णो हव्यꣳरक्ष ॥ ७ ॥

विष्णुं तर्पयामि

ॐ अह्रुतमसिहविर्द्धानन्दृꣳहस्वमाह्वाम्मातियज्ञपतिर्ह्वार्षीत् ।
व्विष्णुस्त्वाक्क्रमतामुरुव्वातायापहतꣳरक्षोयच्छन्ताम्पञ्च ॥ ८ ॥

विष्णुं तर्पयामि

ॐमीढुष्टमशिवतमशिवोनः सुमनाभव ।
परमेव्वृक्षऽआयुधंनिधायकृत्तिंव्वसानऽआचरपिनाकम्बिब्भ्रदागहि ॥ ९ ॥

विष्णुं तर्पयामि

ॐ त्रीणिपदाव्विचक्रमेव्विष्णुर्ग्गोपाऽअदाब्भ्यः ।
अतोधर्म्माणिधारयन् ।१०।

विष्णुं तर्पयामि

ॐ तद्विप्प्रासोव्विपन्न्यवोजागृवाꣳसःसमिन्धते ।
व्विष्णोर्य्यत्परमंपदम् । ११।

विष्णुं तर्पयामि

ॐव्विश्श्वेदेवासऽआगतश्रृणुतामऽइमꣳहवम्।
एवंबर्हिर्निषीदत॥ १२॥ विष्णुं तर्पयामि
ॐ उपयामगृहीतोऽस्यादित्त्येब्भ्यस्त्वाव्विष्ण्णऽउरुगायैषतेसोमस्तꣳरक्ष-
स्वमात्त्वादभन्॥ १३॥ विष्णुं तर्पयामि
ॐउरुविष्ण्णोव्विक्क्रमस्वोरुक्षयायनस्कृधि।
घृतङ्घृतयोनेपिबप्प्रप्प्रय्यज्ञपतिन्तिरस्वाहा॥ १४॥
विष्णुं तर्पयामि

पुनः अनादिनिधनो देवेत्यादि चतुर्भिः श्लोकैस्तर्पयेत् –

अनादिनिधनो देवः शङ्खचक्रगदाधरः।
अव्ययः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव॥ १॥ विष्णुं तर्पयामि
अतसीपुष्पसङ्काशं पीतवाससमच्युतम्।
ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम्॥ २॥ विष्णुं तर्पयामि
कृष्ण ! कृष्ण ! कृपालो ! त्वमगतीनां गतिर्भव।
संसारार्णवमग्नानां प्रसीद पुरुषोत्तम !॥ ३॥ विष्णुं तर्पयामि
नारायण ! सुरश्रेष्ठ ! लक्ष्मीकान्त ! जनार्दन !।
अनेन तर्पणेनाथ प्रेतमोक्षप्रदो भव॥ ४॥ विष्णुं तर्पयामि

ततः अपसव्येन – अद्य अमुकगोत्र अमुकप्रेत (अमुकगोत्रे अमुकप्रेते) परलोके महातृषानिवृत्त्यर्थम् इदम् उदकम् उपतिष्ठतु।

ततः सव्येन भोजनसङ्कल्पः – अद्य अमुकगोत्रस्य अमुकप्रेतस्य परलोके महाक्षुधानिवारणार्थं विष्णुतर्पणकर्मणः साङ्गतासिद्ध्यर्थं महाविष्णुप्रीत्यर्थं यथासम्पन्नेन अन्नेन तृप्तितपर्यन्तेन यथासंख्याकान् ब्राह्मणान् एकं वा भोजयिष्ये। तेन श्रीविष्णुः प्रियताम्।

। इति तर्पणम्।

# नारायणबलिश्राद्धप्रयोगः

श्राद्धभूमिं विशोध्य तत्र कर्ता पूर्वाभिमुखः सन् पूर्वदिग्भागे दीपं स्थापयेत्। ततः दक्षिणे लम्बायमानाम् एकां वेदीं निर्माय तस्यां नवसु तण्डुलपुञ्जेषु विष्ण्वादीन् नवदेवान् स्थापयेत्। ततः दक्षिणे पृथक् एकां लघ्वीं वेदीं निर्माय तस्याम् एकस्मिन् तण्डुलपुञ्जे प्रेतं स्थापयेत्। ततः दक्षिणे तस्यामेव पङ्क्तौ पुनः लम्बायमानां वेदीं निर्माय तस्यां षट्सु तण्डुलपुञ्जेषु विष्ण्वादीन् षड्देवान् स्थापयेत्।

(स्थापनक्रमे संशयश्चेत् ४३२ तमे पृष्टे चित्रावलिः द्रष्टव्या)।

ततः शुद्धासने उपविश्य समन्त्रकं तिलरहितम् (यवसहितम्) एकं कर्मपात्रम्, यवरहितम् (तिलसहितम्) अपरं कर्मपात्रमिति द्वे कर्मपात्रे विधाय कर्मपात्रजलेन श्राद्धस्थानं श्राद्धवस्तूनि स्वात्मानञ्च अभिषिञ्चेत्।

ततः पीतसर्षपैः दिग्रक्षणं कुर्यात् –
वामहस्ते पीतसर्षपान् गृहीत्वा दक्षिणहस्तेन आच्छाद्य

**नमो नमस्ते गोविन्द पुराणपुरुषोत्तम।**
**इदं श्राद्धं हृषीकेश रक्ष त्वं सर्वतो दिशः॥**

इति पठित्वा दक्षिणहस्तेन सर्वासु दिक्षु प्रक्षिपेत् –
**प्राच्यै नमः** इति पूर्वे। **अवाच्यै नमः** इति दक्षिणे। **प्रतीच्यै नमः** इति पश्चिमे। **उदीच्यै नमः** इति उत्तरे। **अन्तरिक्षाय नमः** इति ऊर्ध्वे। **भूम्यै नमः** इति भूमौ।

**नीवीबन्धनम् – अपसव्येन** पुष्पं कुशञ्च गृहीत्वा निम्नमन्त्रं पठन् दक्षिणकट्यां धारयेत् –

**ॐ निहन्मि सर्वं यदमेध्यकृद्भवेत्, हताश्च सर्वेऽसुरदानवा मया। यक्षाश्च रक्षांसि पिशाचगुह्यका हता मया यातुधानाश्च सर्वे॥**

**ॐ सोमस्य नीविरसि विष्णोः शर्मासि शर्मयजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि।**

इति नीवीबन्धनं कृत्वा **सव्येन** पवित्रधारणं कृत्वा प्रतिज्ञासङ्कल्पं कुर्यात् -

(यवरहितं कर्मपात्रं केवलं दिवङ्गतस्य कृते एव प्रयोक्तव्यम्, अन्यत्र तिलरहितं कर्मपात्रं प्रयोक्तव्यम्।)

ततः तिलरहितकर्मपात्रस्थजलकुशादिकमादाय -

**ॐ तत्सदित्यादिदेशकालौ संकीर्त्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) प्रेतत्वनिवृत्त्यर्थं शास्त्रोक्तदुर्मरणदोषाणां मध्ये अमुकदोषनिवृत्तिपूर्वक-सद्गत्यक्षयविष्णुलोकप्राप्त्यर्थं नारायणबलिकर्माङ्गभूतं विष्ण्वादितत्पुरुषान्तदेवानां प्रेतस्य (प्रेतायाश्च) एकोद्दिष्टविधिना षोडशश्राद्धानि करिष्ये।**

ततः पूर्वस्यां दिशि दीपं प्रज्वाल्य गन्धादिभिः सम्पूज्य

तत्र स्थितेषु नवसु तण्डुलपुञ्जेषु कुशकुर्चेषु क्रमशः **सव्येनैव** विष्ण्वादीन् देवान् आवाह्य तेभ्यः आसनानि दद्यात्।

ततः हस्ते जल-कुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गतविष्ण्वादिपुरुषान्तदेवानाम् इमानि नवासनानि विभज्य वो नमः**। इति नवभ्यः देवतीर्थेन कुशासनानि दद्यात्।

इति आसनानि दत्वा नवासनेषु **यवोसि...**इति मन्त्रेण यवान् विकिरेत्।

ततः **अपसव्येन** यवरहितकर्मपात्रस्थजलकुशादिकमादाय –
दशमतण्डुलपुञ्जे –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गतदशमप्रेतश्राद्धे प्रेतस्य इदमासनं ते मया दीयते तवोपतिष्ठताम्।** इति कुशासनं दद्यात्। ततः

**ॐ अपहता असुरा रक्षाँसि वेदिषदः** इति मन्त्रेण तिलान् विकिरेत्।

पुनः **सव्येन** आचम्य एकादशादारभ्य षोडशपर्यन्तेषु षट्सु तण्डुलपुञ्जेषु कुशकुर्चेषु क्रमशः **सव्येनैव** विष्ण्वादीन् देवान् आवाह्य तेभ्यः आसनानि दद्यात्।

ततः हस्ते जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गतविष्ण्वादितत्पुरुषन्तदेवानाम् इमानि षडासनानि विभज्य वो नमः।**

इति षड्भ्यः देवतीर्थेन कुशासनानि दद्यात्।

इति आसनानि दत्वा षडासनेषु **यवोसि...**इति मन्त्रेण यवान् विकिरेत्।

इति सर्वेभ्यः आसनानि दत्वा हस्तार्घं दद्यात्।

## हस्तार्घविधिः

ततो हस्तार्घार्थं वेद्यां विष्ण्वादिपुरुषान्तानां नवदेवानाम् अग्रे क्रमेण नव पुटकानि संस्थाप्य तेषु कुशपवित्रं निक्षिपेत् –

**ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।**
**तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥**

जलं निक्षिपेत् -

**श ॐ न्नो देवीरभीष्टयऽआपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥**

यवान् निक्षिपेत् -

**ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्द्दिवेत्वान्तरिक्षायत्वा पृथिव्यै त्वा । शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥**

गन्धं पुष्पाणि च तूष्णीं निक्षिपेत् ।

ततः प्रथमं हस्तार्घपात्रं वामहस्ते स्थापयित्वा दक्षिणहस्तेन हस्तार्घपात्रस्थपवित्रमादाय **ॐ नमो नारायणाय** इति मन्त्रेण सजलपवित्रं विष्णोः अग्रे निदध्यात् । ततः दक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य अभिमन्त्रयेत् -

**ॐ या दिव्या आपः पयसासम्बभूवुर्या अन्तरिक्षा उत पार्थवीर्याः । हिरण्यवर्णा यज्ञियास्ता न आपः शिवाःशँस्योनाः सुहवा भवन्तु ।**

इति अभिमन्त्र्य हस्ते जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गतविष्णुश्राद्धे विष्णो एषः अर्घस्ते नमः ।** इति विष्णवे अर्घं दत्वा अर्घपात्रं विष्णोः दक्षिणभागे उत्तानमेव स्थापयेत् ।

पुनः क्रमशः द्वितीयाद्यर्घपात्रं वामहस्ते स्थापयित्वा दक्षिणहस्तेन हस्तार्घपात्रस्थकुशमादाय **ॐ नमो नारायणाय** इति मन्त्रेण सजलकुशं तत्तद्देवानाम् अग्रे निदध्यात् । ततः दक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य **या दिव्या**...इति मन्त्रेण अभिमन्त्र्य हस्ते जलकुशादिकमादाय पूर्ववत् सङ्कल्पं कृत्वा अर्घं दत्वा अर्घपात्रं तत्तद्देवानां वामभागे उत्तानमेव स्थापयेत् । सङ्कल्पवाक्ये विशेषः –

| | | | |
|---|---|---|---|
| २. ....... | **शिवश्राद्धे** | **शिव** | **एषः अर्घस्ते नमः ।** |
| ३. ....... | **यमश्राद्धे** | **यम** | **एषः अर्घस्ते नमः।** |
| ४. ....... | **सोमश्राद्धे** | **सोम** | **एषः अर्घस्ते नमः ।** |
| ५. ....... | **हव्यवाहश्राद्धे** | **हव्यवाह** | **एषः अर्घस्ते नमः ।** |
| ६. ....... | **कव्यवाहश्राद्धे** | **कव्यवाह** | **एषः अर्घस्ते नमः ।** |
| ७. ....... | **कालश्राद्धे** | **काल** | **एषः अर्घस्ते नमः ।** |
| ८. ....... | **रुद्रश्राद्धे** | **रुद्र** | **एषः अर्घस्ते नमः ।** |
| ९. ....... | **पुरुषश्राद्धे** | **पुरुष** | **एषः अर्घस्ते नमः ।** |

इति नवभ्यो देवेभ्यः क्रमेण अर्घं दत्वा **अपसव्यं** कृत्वा दक्षिणाभिमुखो भूत्वा पूर्ववत् प्रेतस्य अग्रे एकं पुटकं स्थापयित्वा तस्मिन् कुशपवित्रं निक्षिपेत् –

**ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥**

जलं निक्षिपेत् –

**ॐ शन्नो देवीरभीष्टयऽआपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥**

तिलान् निक्षिपेत् –

**ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः । प्रत्नमद्भिः पृक्तः स्वधया पितृँल्लोकान् प्रीणाहि नः स्वाहा ॥**

ततः तूष्णीं पुष्पाणि गन्धञ्च निक्षिपेत् ।

ततः हस्तार्घपात्रं वामहस्ते स्थापयित्वा दक्षिणहस्तेन हस्तार्घपात्रस्थपवित्रमादाय **ॐ नमो नारायणाय** इति मन्त्रेण सजलपवित्रं प्रेतस्य अग्रे निदध्यात्। ततः दक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य अभिमन्त्रयेत् -

**ॐ या दिव्या आपः पयसासम्बभूवुर्या अन्तरिक्षा उत पार्थवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शिवाःशᳪस्योनाः सुहवा भवन्तु।**

इति अभिमन्त्र्य हस्ते जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-प्रेतश्राद्धे प्रेत एषः अर्घस्ते मया दीयते तवोपतिष्ठताम्।**

इति प्रेताय अर्घं दद्यात्। ततः प्रेतस्य अग्रे पूर्वं स्थापितपवित्रं प्रेतार्घपात्रे स्थापयित्वा तदर्घपात्रं प्रेतस्य वामभागे उत्तानमेव स्थापयेत्।

ततः **सव्यं** भूत्वा आचम्य एकादशादारभ्य षोडशपर्यन्तानां विष्ण्वादि-तत्पुरुषान्तानां देवानामग्रे षट्पुटकानि स्थापयित्वा तेषु पूर्ववत् पवित्रम्, जलम्, यवान्, पुष्पाणि, गन्धञ्च निक्षिप्य क्रमशः एकैकम् अर्घपात्रं वामहस्ते स्थापयित्वा दक्षिणहस्तेन हस्तार्घपात्रस्थकुशमादाय **ॐ नमो नारायणाय** इति मन्त्रेण सजलपवित्रं तत्तद्देवानाम् अग्रे निदध्यात्। ततः दक्षिणहस्तेन हस्तार्घपात्रम् आच्छाद्य **या दिव्या...**इति मन्त्रेण अभिमन्त्र्य हस्ते जलकुशादिकमादाय पूर्ववत् सङ्कल्पं कृत्वा तत्तद्देवेभ्यः अर्घं दत्वा अर्घपात्रं तत्तद्देवानां वामभागे उत्तानमेव स्थापयेत्।

सङ्कल्पवाक्ये विशेषः –

| | | | |
|---|---|---|---|
| ११. ……. | विष्णुश्राद्धे | विष्णो | एषः अर्घस्ते नमः। |
| १२. ……. | ब्रह्मश्राद्धे | ब्रह्मन् | एषः अर्घस्ते नमः। |
| १३. ……. | विष्णुश्राद्धे | विष्णो | एषः अर्घस्ते नमः। |
| १४. ……. | शिवश्राद्धे | शिव | एषः अर्घस्ते नमः। |
| १५. ……. | यमश्राद्धे | यम | एषः अर्घस्ते नमः। |
| १६. ……. | तत्पुरुषश्राद्धे | तत्पुरुष | एषः अर्घस्ते नमः। |

इति सर्वेभ्यः षड्भ्यो देवेभ्यः अर्घं दद्यात्

**॥ इति हस्तार्घविधिः ॥**

एवं हस्तार्घं दत्वा विष्ण्वादिपुरुषान्तान् नवदेवान् अर्घ्यपाद्य-आचमनस्नानवस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्काारधूप-दीपनैवेद्य-ताम्बूलनीराजनदक्षिणा-प्रदक्षिणादीन् समर्प्य पूजयेत्।

ततः कुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गतविष्ण्वादिपुरुषान्तश्राद्धे विष्ण्वादिपुरुषान्तदेवाः इमानि पाद्य-आचमनस्नानवस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कार-धूप-दीपनैवेद्यताम्बूलनीराजनदक्षिणाप्रदक्षिणादीनि युष्मभ्यं नमः।**

इति विष्ण्वादीनाम् अग्रे उत्सृजेत्।

ततः **अपसव्येन** दशमतण्डुलपुञ्जे प्रेतं गन्धादिभिः सम्पूज्य यवरहितकर्मपात्रस्थजलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः)दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गतप्रेतश्राद्धे प्रेत इमानि पाद्य-आचमनस्नान-वस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीप-नैवेद्य-ताम्बूल-नीराजन-दक्षिणाप्रदक्षिणादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**
इति प्रेतस्य अग्रे उत्सृजेत्।

पुनः **सव्येन** आचम्य एकादशादारभ्य षोडशपर्यन्तान् विष्ण्वादि-तत्पुरुषान्तदेवान् पाद्य-आचमनस्नानवस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कार-धूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणा-प्रदक्षिणादीन् समर्प्य पूजयेत्। ततः हस्ते कुशजलादिकमादाय -
**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गतविष्ण्वादितत्पुरुषान्तश्राद्धे विष्ण्वादितत्पुरुषा-न्तदेवाः इमानि पाद्य-आचमनस्नानवस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणाप्रदक्षिणादीनि युष्मभ्यं नमः।** इति तेषामग्रे उत्सृजेत्॥

## अन्नदानम्

ततः **अपसव्येन** दधि-घृत-शर्करा-कदलीफलादिसहितं पक्वान्नं निधाय कुश-जलादिकमादाय -
**ॐ इदमन्नम् एतद्भूस्वामिपितृभ्यो नमः।** इति उत्सृजेत्।

ततः **सव्येन** विष्ण्वादिपुरुषान्तानां देवानां कृते सजलम् अन्नानि सज्जीकृत्य तेषामग्रे वेद्याः पुरतः चतुरस्रं मण्डलं विधाय, तस्मिन् मण्डले सजलमन्नादिकं निधाय देवान्नपात्रेषु **मधुव्वातेति** पठन् मधु क्षिपेत्, **अपसव्येन** प्रेतान्नपात्रे **मधुव्वातेति** पठन् मधु क्षिपेत्। ततः **सव्येन** देवान्नपात्रेषु

**ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा।** इत्यालभ्य –

**ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधे पदं समूढमस्यपा ꣸ सुरे।**

**ॐ कृष्ण हव्यमिदं रक्ष मदीयम्।**

ततः वामहस्तेन अन्नं स्पृशन् अनुत्तानेन दक्षिणाङ्गुष्ठेन **इदमन्नम्** इति अन्ने, **इमा आपः** इति जले, **इदमाज्यम्** इति घृते, **इदं हव्यम्** इति पुनरन्ने स्पृष्ट्वा

**ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्दिवेत्वान्तरिक्षायत्वा पृथिव्यै त्वा। शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि॥**

इति अन्नं परितः यवान् विकीर्य कुशादिकमादाय सङ्कल्प्य प्रथमं विष्णवे दद्यात्–

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-विष्णुश्राद्धे एतदन्नं सजलं सोपस्करं हव्यं विष्णवे स्वाहा सम्पद्यताम्।**

पुनः क्रमशः कुशादिकमादाय पुरुषान्तदेवेभ्यः पृथक् पृथक् सङ्कल्प्य दद्यात्। सङ्कल्पवाक्ये विशेषः –

| | | | |
|---|---|---|---|
| २... | शिवश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | शिवाय स्वाहा सम्पद्यताम्। |
| ३... | यमश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | यमाय स्वाहा सम्पद्यताम्। |
| ४... | सोमश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | सोमाय स्वाहा सम्पद्यताम्। |
| ५... | हव्यवाहश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | हव्यवाहाय स्वाहा सम्पद्यताम्। |
| ६... | कव्यवाहश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | कव्यवाहाय स्वाहा सम्पद्यताम्। |
| ७... | कालश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | कालाय स्वाहा सम्पद्यताम्। |
| ८... | रुद्रश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | रुद्राय स्वाहा सम्पद्यताम्। |
| ९... | पुरुषश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | पुरुषाय स्वाहा सम्पद्यताम्। |

ततः **अपसव्येन** एकभागमन्नं दशमस्य (प्रेतस्य) अग्रे स्थापयित्वा तत्परितः **ॐ अपहता असुरा रक्षाꣳसि वेदिषदः** इति मन्त्रेण तिलान् विकीर्य हस्ते यवरहितकर्मपात्रस्थजलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-प्रेतश्राद्धे एतदन्नं सजलं सोपस्करं कव्यं प्रेताय मया दीयते तवोपतिष्ठताम्।**

ततः पुनः **सव्येन** आचम्य एकादशादारभ्य षोडशपर्यन्तानां देवानामग्रे चतुरस्रं मण्डलं विधाय षड्भागानि अन्नानि स्थापयित्वा

**ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा।** इत्यालभ्य –

**ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधे पदं समूढमस्यपाꣳ सुरे।**

**ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्द्दिवेत्वान्तरिक्षायत्वा पृथिव्यै त्वा। शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि॥**

इति अन्नं परितः यवान् विकीर्य सजलं कुशादिकमादाय पूर्ववत् एकादशादारभ्य षोडशपर्यन्तेभ्यः विष्ण्वादितत्पुरुषान्तेभ्यः देवेभ्यः पृथक् पृथक् सङ्कल्प्य दद्यात्। सङ्कल्पवाक्ये विशेषः –

| | | |
|---|---|---|
| ११... विष्णुश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | विष्णवे स्वाहा सम्पद्यताम्। |
| १२... ब्रह्मश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | ब्रह्मणे स्वाहा सम्पद्यताम्। |
| १३... विष्णुश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | विष्णवे स्वाहा सम्पद्यताम्। |
| १४... शिवश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | शिवाय स्वाहा सम्पद्यताम्। |
| १५... यमश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | यमाय स्वाहा सम्पद्यताम्। |
| १६... तत्पुरुषश्राद्धे | एतदन्नं सजलं सोपस्करं हव्यं | तत्पुरुषाय स्वाहा सम्पद्यताम्। |

इति सर्वेभ्यो दत्वा आचम्य **सव्येन** विष्ण्वादिनवदेवेभ्यः, **अपसव्येन** प्रेताय पुनः **सव्येन** विष्ण्वादिषड्देवेभ्यः जलं दत्वा प्रणमेत्।

## विकिरदानम्

**अपसव्येन** दक्षिणाभिमुखो भूत्वा दक्षिणपार्श्वे भूमौ जलेन सम्प्रोक्ष्य विकिरदानाय कुशत्रयस्यासनं दद्यात्। हस्ते जलकुशादिकमादाय –

**असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्।**
**उच्छिष्टभागधेयानां दर्भेषु विकिरासनम्॥**

इति आसनं दत्वा सतिलघृतमन्नमादाय जलेनाप्लाव्य

**अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम।**
**भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥**

इति आस्तृतकुशोपरि पितृतीर्थेन तदन्नं विकिरेत्। ततः तत्रैव पवित्रादिकं विसर्जयित्वा **सव्येन** हस्तौ पादौ च प्रक्षाल्य आचम्य हरिं स्मरेत्।

## पिण्डदानम्

ततः षोडशपायसपिण्डान् निर्माय तेषु एकं पिण्डं पृथक् स्थापयेत्। पिण्डदानार्थं **सव्येन** प्रथमादारभ्य नवमपर्यन्तानां विष्ण्वादिपुरुषान्तानाम् अग्रे एकां लम्बायमानां वेदीम्, **अपसव्येन** प्रेतस्याग्रे एकां लघ्वीं वेदीम्, पुनः **सव्येन** एकादशादारभ्य षोडशपर्यन्तानां विष्ण्वादितत्पुरुषान्तानाम् अग्रे एकां लम्बायमानां वेदीं निर्माय कुशान् आस्तीर्य द्वयोः देववेद्योः **सव्येन**, प्रेतवेद्याम् **अपसव्येन** जलेन सम्प्रोक्षयेत्।

**प्रेतपिण्डवेदिकायां रेखोल्लेखनम् अङ्गारभ्रामणादिकं च न कर्तव्यम्। देववेद्यान्तु रेखोल्लेखनम् अङ्गारभ्रामणादिकं च कर्तव्यम्।**

ततः **सव्येन** कुशत्रयस्य मूलभागं दक्षिणहस्तेन गृहीत्वा अग्रभागं वामहस्तस्य अङ्गुष्ठतर्जनीभ्यां गृहीत्वा विष्ण्वादिदेवपिण्डवेद्याम् उत्तरतः दक्षिणक्रमेण रेखात्रयम् -

**ॐ अपहता असुरा रक्षाᳬसि वेदिषदः ।**

इति मन्त्रेण कृत्वा तत्कुशम् ईशानकोणे क्षिपेत् । ततः

**ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति ।**
**परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥**

इति मन्त्रेण वेद्याम् अङ्गारं वामावर्तेन भ्रामयित्वा वेद्याः दक्षिणतः क्षिपेत् ।

ततः प्रथमादारभ्य नवमपर्यन्तानां विष्ण्वादिपुरुषान्तानाम् अग्रे अवनेजनार्थम् नवपुटकानि, **अपसव्येन** दशमस्य (प्रेतस्य) अग्रे एकं पुटकम्, पुनः **सव्येन** एकादशादारभ्य षोडशपर्यन्तानां विष्ण्वादितत्पुरुषान्तानाम् अग्रे षट्पुटकानि स्थापयित्वा प्रथमं नवपुटकेषु **सव्येन** जलयवगन्धपुष्पाणि निक्षिप्य, **अपसव्येन** दशमे पुटके जलतिलगन्धपुष्पाणि निक्षिप्य, पुनः **सव्येन** षट्सु पुटकेषु जलयवगन्धपुष्पाणि निक्षिप्य

१. प्रथमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय विष्णवे अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-विष्णुश्राद्धे पिण्डस्थाने विष्णो अत्रावनेनिक्ष्व ते नमः ।**

इत्युच्चार्य देवतीर्थेन विष्णोः अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात् ।

ततः हस्ते सजल-कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-विष्णुश्राद्धे विष्णो एष पिण्डस्ते नमः ।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य(अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतविष्णुश्राद्धे विष्णुपिण्डे विष्णो अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

२. ततो द्वितीयपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय शिवाय अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-शिवश्राद्धे पिण्डस्थाने शिव अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य देवतीर्थेन शिवस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजल-कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-शिवश्राद्धे शिव एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-शिवश्राद्धे शिवपिण्डे शिव अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

३. ततः तृतीयपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय यमाय अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-यमश्राद्धे पिण्डस्थाने यम अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य यमस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजल-कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-यमश्राद्धे यम एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-यमश्राद्धे यमपिण्डे यम अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

४. ततः चतुर्थपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय सोमाय अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-सोमराजश्राद्धे पिण्डस्थाने सोमराज अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य सोमस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजल-कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-सोमराजश्राद्धे सोमराज एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-सोमराजश्राद्धे सोमराजपिण्डे सोमराज अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

५. ततः पञ्चमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय हव्यवाहाय अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-हव्यवाहनश्राद्धे पिण्डस्थाने हव्यवाहन अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य हव्यवाहस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजल-कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-हव्यवाहश्राद्धे हव्यवाह एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-हव्यवाहश्राद्धे हव्यवाहपिण्डे हव्यवाह अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

६. ततः षष्ठपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय कव्यवाहाय अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-कव्यवाहश्राद्धे पिण्डस्थाने कव्यवाह अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य कव्यवाहस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजल-कुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-कव्यवाहश्राद्धे कव्यवाह एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-कव्यवाहश्राद्धे कव्यवाहपिण्डे कव्यवाह अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

७. ततः सप्तमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय कालाय अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-कालश्राद्धे पिण्डस्थाने काल अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य कालस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजल-कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-कालश्राद्धे काल एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-कालश्राद्धे कालपिण्डे काल अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

८. ततः अष्टमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय रुद्राय अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गतरुद्रश्राद्धे पिण्डस्थाने रुद्रअत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य रुद्रस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलं कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-रुद्रश्राद्धे रुद्र एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-रुद्रश्राद्धे रुद्रपिण्डे रुद्र अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

९. ततः नवमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय पुरुषाय अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-पुरुषश्राद्धे पिण्डस्थाने पुरुष अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य पुरुषस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलं कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-पुरुषश्राद्धे पुरुष एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-पुरुषश्राद्धे पुरुषपिण्डे पुरुष अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

१०. ततः **अपसव्येन** दक्षिणाभिमुखो भूत्वा दशमस्य (प्रेतस्य) अग्रे वेद्याम् अवनेजनं दद्यात् । अवनेजनपुटकं हस्ते गृहीत्वा जल-कुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-प्रेतश्राद्धे पिण्डस्थाने प्रेत अत्रावनेनिक्ष्व ते मया दीयते तवोपतिष्ठताम्।**

इत्युच्चार्य प्रेतस्य अग्रे वेद्यां पिण्डस्थाने पितृतीर्थेन अवनेजनं दद्यात्।

ततः हस्ते सजलं कुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-प्रेतश्राद्धे प्रेत एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्।**

इति कुशोपरि पितृतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-प्रेतश्राद्धे प्रेतपिण्डे प्रेत अत्र प्रत्यवनेनिक्ष्व ते मया दीयते तवोपतिष्ठताम्।**

इति पिण्डोपरि पितृतीर्थेन प्रत्यवनेजनं दद्यात्।

ततः **सव्येन** आचम्य एकादशादारभ्य षोडशपर्यन्तानां देवानां वेद्याः अग्रे स्थित्वा क्रमशः षड्भ्यः अवनेजन-पिण्ड-प्रत्यवनेजनानि दद्यात्।

११. ततः एकादशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय विष्णवे अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडश-श्राद्धान्तर्गत-विष्णुश्राद्धे पिण्डस्थाने विष्णो अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य विष्णोः अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलं कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-विष्णुश्राद्धे विष्णो एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-विष्णुश्राद्धे विष्णुपिण्डे विष्णो अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

१२. ततः द्वादशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय ब्रह्मणे अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-ब्रह्मश्राद्धे पिण्डस्थाने ब्रह्मन् अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य ब्रह्मणः अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलं कुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-ब्रह्मश्राद्धे ब्रह्मन् एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-ब्रह्मश्राद्धे ब्रह्मपिण्डे ब्रह्मन् अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

१३. ततः त्रयोदशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय विष्णवे अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-विष्णुश्राद्धे पिण्डस्थाने विष्णो अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य विष्णोः अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलं कुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-विष्णुश्राद्धे विष्णो एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतविष्णुश्राद्धे विष्णुपिण्डे विष्णो अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

१४. ततः चतुर्दशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय शिवाय अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-शिवश्राद्धे पिण्डस्थाने शिव अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य शिवस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलं कुशपिण्डमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-शिवश्राद्धे शिव एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-शिवश्राद्धे शिवपिण्डे शिव अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

१५. ततः पञ्चदशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय यमाय अवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-यमश्राद्धे पिण्डस्थाने यम अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य यमस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलं कुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-यमश्राद्धे यम एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-यमश्राद्धे यमपिण्डे यम अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

१६. ततः षोडशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय तत्पुरुषाय अवनेजनं दद्यात् –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गत-तत्पुरुषश्राद्धे पिण्डस्थाने तत्पुरुष अत्रावनेनिक्ष्व ते नमः।**

इत्युच्चार्य तत्पुरुषस्य अग्रे वेद्यां पिण्डस्थाने अवनेजनं दद्यात्।

ततः हस्ते सजलं कुशपिण्डमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-तत्पुरुषश्राद्धे तत्पुरुष एष पिण्डस्ते नमः।**

इति कुशोपरि देवतीर्थेन पिण्डं दत्वा पुनः पुटके जलमादाय कुशादिकं गृहीत्वा प्रत्यवनेजनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धान्तर्गत-तत्पुरुषश्राद्धे तत्पुरुषपिण्डे तत्पुरुष अत्र प्रत्यवनेनिक्ष्व ते नमः।**

इति पिण्डोपरि देवतीर्थेन प्रत्यवनेजनं दद्यात्।

**॥ इति पिण्डदानम् ॥**

ततः **अपसव्येन** नीवीं विस्रस्य **सव्येन** आचम्य प्रथमादारभ्य नवपर्यन्तान् पिण्डान् अर्घ्यपाद्य-आचमनस्नानवस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कार-धूप-दीपनैवेद्य-ताम्बूल-नीराजनदक्षिणा-प्रदक्षिणादिभिः पूजयित्वा हस्ते जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धे विष्ण्वादिपुरुषान्तदेवाः पिण्डेषु एतानि अर्घ्यपाद्य-आचमन-स्नान-वस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीप-नैवेद्य-ताम्बूल-नीराजनदक्षिणा-प्रदक्षिणादीनि अर्चनानि युष्मभ्यं नमः।**

ततः **अपसव्येन** दशमपिण्डं तेनैव विधिना पूजयित्वा हस्ते जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतप्रेतश्राद्धपिण्डे प्रेत एतानि अर्घ्यपाद्य-आचमनस्नान-वस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूपदीपनैवेद्य-ताम्बूल-नीराजन-दक्षिणाप्रदक्षिणादीनि अर्चनानि ते मया दीयन्ते तवोपतिष्ठन्ताम्।**

पुनः **सव्येन** एकादशादारभ्य षोडशपर्यन्तान् पिण्डान् तेनैव विधिना पूजयित्वा हस्ते जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धे विष्ण्वादितत्पुरुषान्तदेवाः पिण्डेषु एतानि अर्घ्यपाद्य-आचमन-स्नान-वस्त्रोपवीत-गन्धाक्षत-पुष्पालङ्कारधूप-दीप-नैवेद्य-ताम्बूल-नीराजनदक्षिणा-प्रदक्षिणादीनि अर्चनानि युष्मभ्यं नमः।**

इति सम्पूज्य प्रार्थयेत् –

**ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च।**
**नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥**

इति प्रार्थयित्वा अक्षय्योदकं दद्यात्।

## अक्षय्योदकदानम्

सव्येन प्रथमादारभ्य नवमपर्यन्तानां विष्ण्वादिपुरुषान्तदेवानामग्रे नवपुटकानि स्थापयित्वा तेषु जलं यवञ्च निक्षिप्य

१. प्रथमं पुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे विष्णोर्दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति विष्णवे अक्षय्योदकं दद्यात्।

२. द्वितीयपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे शिवस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति शिवाय अक्षय्योदकं दद्यात्।

३. तृतीयपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे यमस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति यमाय अक्षय्योदकं दद्यात्।

४. चतुर्थपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे सोमराजस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति सोमराजाय अक्षय्योदकं दद्यात्।

५. पञ्चमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे हव्यवाहस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति हव्यवाहाय अक्षय्योदकं दद्यात्।

६. षष्ठपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे कव्यवाहस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति कव्यवाहाय अक्षय्योदकं दद्यात्।

७. सप्तमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे कालस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति कालाय अक्षय्योदकं दद्यात्।

८. अष्टमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे रुद्रस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति रुद्राय अक्षय्योदकं दद्यात्।

९. नवमपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे पुरुषस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति पुरुषाय अक्षय्योदकं दद्यात्।

१०. ततः **अपसव्येन** दशमस्य प्रेतस्य अग्रे एकं पुटकं संस्थाप्य तस्मिन् तिलान् जलञ्च निक्षिप्य तत्पुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे प्रेतस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

पुनः **सव्येन** एकादशादारभ्य षोडशपर्यन्तानाम् विष्ण्वादितत्पुरुषान्तानामग्रे षट्पुटकानि संस्थाप्य तेषु जलं यवञ्च निक्षिप्य

११. एकादशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे विष्णोर्दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति विष्णवे अक्षय्योदकं दद्यात्।

१२. द्वादशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे ब्रह्मणो दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति ब्रह्मणे अक्षय्योदकं दद्यात्।

१३. त्रयोदशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे विष्णोर्दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति विष्णवे अक्षय्योदकं दद्यात्।

१४. चतुर्दशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे शिवस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति शिवाय अक्षय्योदकं दद्यात्।

१५. पञ्चदशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे यमस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति यमाय अक्षय्योदकं दद्यात्।

१६. षोडशपुटकं हस्ते गृहीत्वा जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-षोडशश्राद्धे तत्पुरुषस्य दत्तैतदन्नपानादिकम् अक्षय्यमस्तु।**

इति तत्पुरुषाय अक्षय्योदकं दद्यात्।

**॥ इति अक्षय्योदकदानम् ॥**

## जलधारा

हस्ते जलकुशादिकमादाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) परलोके महातृषा-निवारणार्थं दुर्मरणनिमित्तकनारायणबलिविहितषोडशपिण्डेषु एकैकमन्त्रेण द्विर्द्विरञ्जलिदानं करिष्ये।**

इति सङ्कल्प्य देवपिण्डेषु **सव्येन** देवतीर्थेन, प्रेतपिण्डे अपसव्येन पितृतीर्थेन पृथक् पृथक् द्विर्द्विरञ्जलिजलधारां दद्यात्।

**१. ॐ अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः।**
**याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः॥**

ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतविष्णुपिण्डे विष्णो एषा जलधारा ते नमः।

इति प्रथमपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

२. ॐ उपयामगृहीतोऽस्यन्तर्यच्छ मघवन् पाहि सोमम्।
उरुष्य राय एषो यजस्व॥

ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतशिवपिण्डे शिव एषा जलधारा ते नमः।

इति द्वितीयपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

३. ॐ येनापावक चक्षसा भुरण्यन्तं जनाँ२ अनु। त्वं वरुण पश्यसि॥
ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतयमपिण्डे यम एषा जलधारा ते नमः।

इति तृतीयपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

४. ॐ ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम्॥
ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतसोमराजपिण्डे सोमराज एषा जलधारा ते नमः।

इति चतुर्थपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

५. ॐ समुद्रं गच्छ स्वाहाऽन्तरिक्षं गच्छ स्वाहा देवꣳसवितारं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमं गच्छ स्वाहा दिव्यं नभो गच्छ स्वाहाऽग्निं वैश्वानरं गच्छ स्वाहा मनो मे हार्दि यच्छ दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनाऽऽपृण स्वाहा ॥

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतहव्यवाहपिण्डे हव्यवाह एषा जलधारा ते नमः।**

इति पञ्चमपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

**६. ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा। अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो ज्योतिर्वर्चः स्वाहा। ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥**

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतकव्यवाहपिण्डे कव्यवाह एषा जलधारा ते नमः।**

इति षष्ठपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

**७. ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥**

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतकालपिण्डे काल एषा जलधारा ते नमः।**

इति सप्तमपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

८. ॐ इषे त्वोर्जे त्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्व मघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघशꣳसो ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि॥

ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतरुद्रपिण्डे रुद्र एषा जलधारा ते नमः।

इति अष्टमपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

९. ॐ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति। दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥

ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतपुरुषपिण्डे पुरुष एषा जलधारा ते नमः।

इति नवमपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

ततः **अपसव्येन** दक्षिणाभिमुखो भूत्वा

१०. ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चत्वꣳहसः॥

ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतप्रेतपिण्डे प्रेत एषा जलधारा ते मया दीयते तवोपतिष्ठताम्।

इति पितृतीर्थेन दशमपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

ततः **सव्येन** पूर्वाभिमुखो भूत्वा

११. ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सम्बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः॥
ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतविष्णुपिण्डे विष्णो एषा जलधारा ते नमः।

इति एकादशपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

१२. ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥
ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णूरथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥
ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतब्रह्मपिण्डे ब्रह्मन् एषा जलधारा ते नमः।

इति द्वादशपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

१३. ॐ इषे त्वोर्जे त्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्व मघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघशꣳसो ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि॥
ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाꣳसूरे स्वहा॥
ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतविष्णुपिण्डे विष्णो एषा जलधारा ते नमः।

इति द्वादशपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

१४. ॐ अग्न आ याहि वीतये गृणानो हव्यदातये। निहोतासत्सि बर्हिषि ॥

ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च। नमः शिवाय च शिवतराय च ॥

ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतशिवपिण्डे शिव एषा जलधारा ते नमः।

इति चतुर्दशपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

१५. ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये। शंयोरभि स्रवन्तुनः।
ॐ यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहा। स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥

ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गतयमपिण्डे यम एषा जलधारा ते नमः।

इति पञ्चदशपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

१६. ॐ अक्रन् कर्मकृतः सह वाचा मयोभुवा। देवेभ्यः कर्म कृत्वास्तं प्रेत सचाभुवः ॥

ॐ प्रेताजयता नर इन्द्रो वः शर्म यच्छतु। उग्रा वः सन्तु बाहवोऽनाधृष्या यथाऽसथ ॥

ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहितषोडश-श्राद्धान्तर्गततत्पुरुषपिण्डे तत्पुरुष एषा जलधारा ते नमः।

इति षोडशपिण्डोपरि अञ्जलिद्वयजलधारां दद्यात्।

## अन्नदानम्

यथासम्भवमामान्नं सदक्षिणम् अग्रे कृत्वा हस्ते जलकुशादिकमादाय –
**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) प्रेतत्वविमुक्त्यर्थं परलोके महाक्षुधानिवृत्यर्थं दुर्मरणनिमित्तकनारायणबलिविहितषोडशश्राद्धकर्मणां समृद्ध्यर्थं सोपस्करम् आमान्नं गन्धाद्यर्चितं सदक्षिणं विष्ण्वादितत्पुरुषान्तानाम् तृप्त्यर्थं अमुकनामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमुत्सृजे।**

ततः दक्षिणाभिमुखो भूत्वा पूर्वाग्रां जलधारां दद्यात् –
ॐ अघोराः पितरः सन्तु।

## आशीषप्रार्थना

यजमानः – **ॐ गोत्रं नो वर्द्धताम्, दातारो नोऽभिवर्द्धन्ताम्। वेदाः सन्ततिरेव च। श्रद्धा च नो मा व्यगमद्, बहुदेयं च नोऽस्तु। अन्नं च नो बहु भवेत्, अतिथीँश्च लभेमहि। याचितारश्च नः सन्तु, मा च याचिष्म कञ्चन। एताः सत्या आशिषः सन्तु॥**

ब्राह्मणाः – **सन्तु एताः सत्याः आशीषः॥**

ततः **अपसव्येन** कुशादिकमादाय पिण्डोपरि दक्षिणाग्रां जलधारां दद्यात् –
**ॐ ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्।
स्वधास्थ तर्पयत मे पितॄन्।**

ततः **सव्येन** पञ्चदशपिण्डान्, **अपसव्येन** दशमस्थानीयम् एकपिण्डम् आघ्राय उत्थाप्य वेद्यां स्थापयित्वा, पिण्डाधारकुशान् वह्नौ क्षिपेत्। ततः **सव्येन** पञ्चदशदेवार्घपात्राणि, **अपसव्येन** प्रेतार्घपात्रं सञ्चाल्य **सव्येन** दक्षिणां दद्यात्।

## दक्षिणादानम्

हिरण्यादिदक्षिणाद्रव्यं हस्ते गृहीत्वा जलकुशादिकमादाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नः प्रेतस्य (अमुकगोत्रायाः अमुकनाम्न्याः प्रेतायाः) दुर्मरणनिमित्तकनारायणबलिविहित-विष्ण्वादितत्पुरुषान्तषोडशश्राद्धसाङ्गतासिद्ध्यर्थम् इमानि हिरण्यादि-द्रव्याणि तत्तद्देवताप्रीतये अमुकनामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमुत्सृजे।**

इति दक्षिणां दत्वा पीताक्षतैः विष्ण्वादिदेवाँश्च सर्वान् विसर्जयेत्।

ततः क्षमाप्रार्थनां कुर्यात् –

**प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु च।**
**स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥**
**यस्य स्मृत्या च नामोक्त्या तपश्राद्धक्रियादिषु।**
**न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥**
**अतसीपुष्पसंकाशं पीतवाससमच्युतम्।**
**ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥**
**ॐ अच्युताय नमः , ॐ अच्युताय नमः, ॐ अच्युताय नमः ॥**

**॥ इति नारायणबलिकर्माङ्गभूतषोडशश्राद्धविधिः ॥**

卐卐卐卐

# ❀ सूक्तपञ्चकजपः ❀

## १. ब्रह्मसूक्तम्–

ॐ तेजोऽसिशुक्रममृतमायुष्प्याऽआयुर्म्मेपाहि।
देवस्यत्वा सवितुः प्प्रसवेऽश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्यामाददे ॥ १ ॥
इमामगृब्भ्णन्नशनामृतस्य पूर्व्वऽआयुषिविदथेषुकव्व्या।
सानोऽअस्मिन्त्सुतऽआबभूवऽऋतस्यसामन्त्सरमाऽऽरपन्ती ॥२॥
अभिधाऽअसिभुवनमसियन्तासिधर्ता।
सत्वमग्निंर्व्वैश्वानरꣳसप्प्रथसङ्गच्छस्वाहाकृतः ॥ ३ ॥
स्वगात्वादेवेब्भ्यःप्प्रजापतयेब्रह्मन्नश्श्वम्भन्स्यामिदेवेब्भ्यःप्रजापतयेतेनराद्ध्या
सम्। तम्बधानदेवेब्भ्यःप्प्रजापतयेतेनराध्ध्नुहि ॥ ४ ॥
प्रजापतयेत्वाजुष्ठंप्रोक्षमीन्द्राग्निब्भ्यांत्वाजुष्टंप्रोक्षामिव्वायवेत्वाजुष्टम्प्रोक्षामि
व्विश्वेब्भ्यस्त्वादेवेब्भ्योजुष्टम्प्रोक्षामिसर्वेब्भ्यस्त्वादेवेब्भ्योजुष्टम्प्रोक्षमि ॥
योऽयर्व्वन्तञ्जिघाꣳसतितमब्भ्यमीतिव्वरुणःपरोमर्त्तःपरःश्श्वा ॥ ५ ॥
अग्नये स्वाहा सोमाय स्वाहापांमोदायस्वाहासवित्त्रेस्वाहाव्वायवे
स्वाहाव्विष्णवेस्वाहेन्द्रायस्वाहाबृहस्प्पतयेस्वाहामित्त्रायस्वाहाव्वरुणाय
स्वाहा ॥ ६ ॥
ॐहिङ्कारायस्वाहाहिङ्कृतायस्वाहावक्रन्दतेस्वाहाऽवक्रन्दायस्वा
हाप्प्रोथतेस्वाहाप्प्रोथायस्वाहागन्धायस्वाहाग्घ्रातायस्वाहानिविष्टाय
स्वाहोपविष्टायस्वाहासन्दितायस्वाहाव्वल्गतेस्वाहासीनाय स्वाहा
शयनायस्वाहास्वपतेस्वाहाजाग्ग्रतेस्वाहाकूजतेस्वाहाप्प्रबुद्धायस्वाहाव्वि
जृम्भमाणायस्वाहा व्विचृताय स्वाहाꣳहानायस्वाहोपस्त्थितायस्वाहायनाय
स्वाहाप्प्रायणायस्वाहा ॥ ७ ॥
ॐयतेस्वाहाधावतेस्वाहोद्द्रावायस्वाहोद्द्रुतायस्वाहाशूकरायस्वाहा
शूकृतायस्वाहानिषण्णायस्वाहोत्थितायस्वाहाजवायस्वाहाबलायस्वाहाव्विव
र्त्तमानायस्वाहाव्विवृत्तायस्वाहाव्विधून्वानायस्वाहाव्विधूतायस्वाहाशुश्श्रूष
माणायस्वाहाश्शृण्वतेस्वाहेक्षमाणायस्वाहेक्षितायस्वाहाव्विधूतायस्वाहाशुश्श्रुष

माणायस्वाहाश्रृण्वतेस्वाहेक्षमाणायस्वाहेक्षितायस्वाहाव्वीक्षितायस्वाहा
निमेषायस्वाहायदत्तितस्मैस्वाहायत्पिबतितस्म्मैस्वाहायन्मूत्रंकरोतितस्म्मै
स्वाहाकुर्व्वतेस्वाहाकृतायस्वाहा ॥ ८ ॥

ॐ तत्सवितुर्व्वरेण्यंभर्गोदेवस्य धीमहि। धियोयोनः प्प्रचोदयात् ॥ ९ ॥

ॐ हिरण्यपाणिमूतयेसवितारमुपह्वये। सचेत्तादेवतापदम् ॥ १० ॥

ॐ देवस्यचेततोमहीं प्रसवितुर्हवामहे। सुमतिꣳसत्त्यराधसम् ॥ ११ ॥

ॐ सुष्टुतिꣳसुमतीवृधोरातिꣳसवितुरीमहे। प्रदेवायमतीविदे ॥ १२ ॥

ॐ रातिꣳसत्पतिंमहेसवितारमुपह्वये। आसनंदेववीतये ॥ १३ ॥

ॐ देवस्यसवितर्म्मतिमासवंव्विश्वदेव्व्यम्। धियाभगंमनामहे ॥ १४ ॥

ॐ अग्निꣳस्तोमेबोधयसमिधानाऽअमर्त्त्यम्। हव्व्यादेवेषुनोदधत् ॥ १५ ॥

ॐसहव्व्यवाडमर्त्त्यऽउशिग्दूतश्चनोहितः। अग्निर्द्धियासमृण्वति ॥ १६ ॥

ॐ अग्निन्दूतम्पुरोदधेहव्व्यवाहमुपब्ब्रुवे। देवाँ२ऽआसादयादिह ॥ १७॥

ॐ अजीजनोहिपवमानसूर्य्यंव्विधारेशक्क्मनापयः।
गोजीरयारꣳहमाणः पुरन्ध्या ॥ १८ ॥

ॐ व्विभूर्म्मात्राप्प्रभूः पित्राश्श्वोऽसिहयोऽस्यत्योऽसिमयोऽस्यर्व्वासिसाप्तिर
सिब्बाज्ज्यसिवृषासिनृमणाऽअसि। ययुर्न्नामासिशिशुर्न्नामास्या-
दित्त्यानांपत्वान्निहिदेवाऽआशापालाऽएतंदेवेब्भ्योश्श्वंमेधाय प्प्रोक्षितꣳ
रक्षत ॥ १९ ॥

ॐइहरतिरिहरमतामिहधृतिरिहस्वधृतिः स्वाहाकायस्वाहा कस्मैस्वाहा
कतमस्मै स्वाहा स्वाहाऽऽधियाधीतायस्वाहामनः
प्प्रजापतयेस्वाहाचित्तंव्विज्ञातायदित्यैस्वाहादित्यैमह्यैस्वाहादित्यैमुमृडीकायै
स्वाहासरस्वत्यैस्वाहासरस्वत्यैपावकायस्वाहासरस्वत्यैबृहत्यैस्वाहा
पूष्णेस्वाहापुष्णेप्प्रपथ्यायस्वाहापूष्णेस्वाहापूष्णेप्प्रपथ्यायस्वाहापूष्णेन
रन्धिषायस्वाहात्वष्ट्रेस्वाहात्वष्ट्रेतुरीयायस्वाहात्वष्ट्रेपुरुरूपायस्वाहाव्विष्ण
वेस्वाहाविष्णवेनिभूयपाय स्वाहाव्विष्ण-वेशिपिविष्टायस्वाहा ॥ २० ॥

ॐ व्विश्श्वोदेवस्यनेतुम्मर्त्तो-व्वुरीतसक्ख्यम्।

व्विश्श्वोरायऽइषुद्ध्यतिद्द्युम्नंव्वृणीतपुष्यसेस्वाहा ॥ २१ ॥

ॐ आब्ब्रह्मन्ब्राह्मणोब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्यःशूरऽइषव्योतिव्याधी महारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्वानाशुःसप्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यव्वीरोजायतान्निकामेनिकामेनः पर्ज्जन्न्योव्वर्षतुफल वत्त्योनऽओषधयः पच्च्यन्तांय्योगक्षेमोनः कल्प्पताम् ॥ २२ ॥

ॐ प्राणायस्वाहापानायस्वाहाव्यानायस्वाहाचक्षुषेस्वाहाश्श्रोत्राय स्वाहाव्वाचेस्वाहामनसेस्वाहा ॥ २३ ॥

ॐ प्राच्यैदिशेस्वाहार्व्वाच्च्यैदिशेस्वाहादक्षिणायै दिशे स्वाहार्व्वाच्यै दिशे स्वाहाप्रतीच्यैदिशेस्वाहार्व्वाच्यैदिशेस्वाहोदीच्यै दिशे स्वाहार्व्वाच्च्यैदिशेस्वाहोद्ध्र्वायै दिशे स्वाहार्व्वाच्यैदिशेस्वाहार्व्वाच्च्यै दिशेस्वाहार्व्वाच्च्यैदिशेस्वाहा ॥ २४ ॥

ॐ अद्भ्यः स्वाहाव्वार्ब्भ्यः स्वाहोदकायस्वाहातिष्ठन्तीब्भ्यः स्वाहास्रवन्तीब्भ्यःस्वाहास्पन्दमानाब्भ्यःस्वाहा कूप्याब्भ्यः स्वाहासूद्याब्भ्यः स्वाहा। धार्य्याब्भ्यःस्वाहार्ण्णवायस्वाहासमुद्रायस्वाहासरिराय स्वाहा। २५।

ॐव्वातायस्वाहाधूमायस्वाहाब्भ्रायस्वाहामेघायस्वाहावि द्योतमानायस्वाहास्तनयतेस्वाहावस्फूर्ज्जतेस्वाहाव्वर्षतेस्वाहाववर्षतेस्वा होग्ग्रंव्वर्षतेस्वाहाशीग्घ्रंव्वर्षतेस्वाहोद्गृहीतायस्वाहाप्पृष्णतेस्वाहा शीकायते स्वाहाप्प्रुष्वाब्भ्यः स्वाहाह्लादिनीब्भ्यःस्वाहानीहारायस्वाहा।२६।

ॐ अग्नयेस्वाहासोमायस्वाहेन्द्रायस्वाहापृथिव्यैस्वाहान्तरिक्षायस्वाहा दिवे–स्वाहादिग्ग्भ्यःस्वाहाशाब्भ्यः स्वाहोर्ध्वायैदिशेस्वाहार्व्वाच्च्यै दिशे स्वाहा ॥ २७ ॥

ॐनक्षत्त्रेब्भ्यः स्वाहा नक्षत्रियेब्भ्यः स्वाहाहोरात्रेब्भ्यः स्वाहार्द्धमासेब्भ्यः स्वाहामासेब्भ्यः स्वाहाऽऋतुब्भ्यः स्वाहार्त्तवेब्भ्यस्वाहा संव्वत्सरायस्वाहाद्यावापृथिवीब्भ्याँ स्वाहाचन्द्रायस्वाहासूर्य्यायस्वाहारश्मिब्भ्यः स्वाहाव्वसुब्भ्यः स्वाहारुद्द्रेब्भ्यः स्वाहादित्येब्भ्यः स्वहामरुद्भ्यः स्वाहाव्विश्श्वेब्भ्योदेवेब्भ्यः स्वाहामूलेब्भ्यः स्वाहौषधीब्भ्यः स्वाहा ॥ २८ ॥

ॐ पृथिव्यैस्वाहान्तरिक्षायस्वाहादिवेस्वाहासूर्य्याय स्वाहाचन्द्रायस्वाहानक्षत्त्रेब्भ्यः स्वाहाद्भ्यः स्वाहौषधीब्भ्यः स्वाहाव्वनस्प्पतिब्भ्यः स्वाहा परिप्लवेब्भ्यः स्वाहाचराचरेब्भ्यः स्वाहा सरीसृपेब्भ्यःस्वाहा ॥ २९ ॥

ॐ असवेस्वाहाव्वसवेस्वाहाविभुवेस्वाहाविवस्वतेस्वाहागणश्रिये स्वाहा गणपतयेस्वाहाभिभुवे स्वाहाधिपतयेस्वाहा शूषायस्वाहा सꣳसर्जायस्वाहा चन्द्रायस्वाहा ज्ज्योतिषेस्वाहामलिम्म्लुचायस्वाहादिवापतयेस्वाहा ॥ ३० ॥

ॐ मधवेस्वाहामाधवायस्वाहाशुक्रायस्वाहाशुचयेस्वाहानभसेस्वाहान भस्यायस्वाहास्वाहेषायस्वाहोर्ज्जायस्वाहासहसेस्वाहासहस्यायस्वाहातप सेस्वाहातपस्यायस्वाहाꣳहसस्पतयेस्वाहा ॥ ३१ ॥

ॐ व्वाजायस्वाहाप्रसवायस्वाहाऽपिजायस्वाहाक्रतवेस्वाहास्वःस्वाहा मूर्ध्नेस्वाहाव्यश्नुविनेस्वाहान्तयायस्वाहान्त्यायभौवनायस्वाहा भुवनस्यपतयेस्वाहाधिपतयेस्वाहाप्प्रापयतेस्वाहा ॥ ३२ ॥

ॐ आयुर्य्यज्ञेनकल्प्पताꣳस्वाहाप्प्राणोयज्ञेनकल्प्पताꣳस्वाहापानोयज्ञेन कल्पताꣳस्वाहा । व्यानोयज्ञेन कल्प्पताꣳस्वाहोदानोयज्ञेनकल्पताꣳ स्वाहाश्रोत्त्रंय्यज्ञेनकल्पताꣳस्वाहाव्वाग्यज्ञेनकल्प्पताꣳस्वाहामनोयज्ञेन कल्प्पताꣳस्वाहात्त्मायज्ञेनकल्पताꣳस्वाहाज्योतिर्य्यज्ञेनकल्प्पताꣳस्वाहा स्वर्य्यज्ञेनकल्प्पताꣳस्वाहापृष्ठंय्यज्ञेनकल्पताꣳस्वाहायज्ञोयज्ञेन कल्प्पताꣳस्वाहा ॥ ३३ ॥

ॐ एकस्मैस्वाहाद्वाब्भ्याꣳस्वाहाशतायस्वाहैकशतायस्वाहाव्युष्ट्यै स्वाहास्वर्ग्गायस्वाहा ॥ ३४ ॥

॥ इति ब्रह्मसूक्तम् ॥

## २. विष्णुसूक्तम्

ॐ सहस्रशीर्षापुरुषः सहस्राक्षःसहस्रपात् ।
सभूमिꣳसर्वतस्पृत्त्वात्त्यतिष्ठद्दशाङ्गुलम् ॥१॥
ॐ पुरुषएवेदꣳसर्वय्यद्भूतंय्यच्चभाव्व्यम् ।

उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥२॥

ॐ एतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः ।

पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥३॥

ॐ त्रिपादूर्द्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।

ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥४॥

ततोविराडजायतविराजोऽअधिपूरुषः ।

सजातोऽअत्त्यरिच्च्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥

ॐ तस्माद्यज्ञात्सर्वहुतःसम्भृतम्पृषदाज्ज्यम् ।

पशूँस्ताँश्चक्क्रेवायव्यानारण्याग्ग्राम्म्याश्चये ॥ ६ ॥

ॐ तस्म्माद्यज्ञात्सर्वहुतऋचः सामानिजज्ञिरे ।

छन्दाᳪसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥ ७ ॥

ॐ तस्म्मादश्वाऽअजायन्तयेकेचोभयादतः ।

गावोहजज्ञिरेतस्म्मात्तस्माज्जाताऽअजावयः ॥ ८ ॥

ॐ तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः ।

तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ॥ ९ ॥

ॐ यत्पुरुषंव्यदधुःकतिधाव्यकल्प्पयन् ।

मुखङ्किमस्यासित्किम्बाहूकिमूरूपादावुच्च्येते ॥१० ॥

ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्न्यः कृतः ।

ऊरूतदस्ययद्वैश्श्यः पद्भ्याᳪशूद्द्रोऽअजायत ॥ ११ ॥

ॐ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत ।

श्रोत्राद्वायुश्चप्राणश्चमुखादग्ग्रिरजायत ॥ १२ ॥

ॐ नाभ्याऽआसीदन्तरिक्षᳪशीर्ष्णोद्यौः समवर्त्तत ।

पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथालोकाँ२ऽअकल्पयन् ॥ १३ ॥

ॐयत्पुरुषेणहविषादेवायज्ञमतन्वत ।

व्वसन्तोऽस्यासीदाज्ज्यङ्ग्रीष्मऽइध्मः शरद्धविः ॥ १४ ॥

सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ।

देवायद्यज्ञन्तन्वानाऽअवध्नन्पुरुषम्पशुम् ॥ १५ ॥

ॐ यज्ञेन यज्ञमयजन्तदेवास्तानिधर्म्माणिप्प्रथममान्न्यासन्।
तेहनाकम्महिमानः सचन्तयत्रपूर्व्वेसाद्ध्याः सन्तिदेवाः ॥ १६ ॥

॥ इति विष्णुसूक्तम् ॥

### ३. रुद्रसूक्तम्

ॐ नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनमः। बाहुब्भ्यामुततेनमः ॥ १ ॥
ॐयातेरुद्रशिवातनूरघोरापापकाशिनी।
तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ २ ॥
ॐ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्ष्यस्तवे।
शिवां गिरित्रतांकुरुमाहिꣳसीःपुरुषंजगत् ॥ ३ ॥
ॐ शिवेनव्वचसात्त्वागिरिशाऽच्छाव्वदामसि।
यथानः सर्व्वमिज्जगदयक्ष्मꣳसुमनाऽअसत् ॥ ४ ॥
ॐअद्ध्यवोचदधिवक्ताप्प्रथमोदैव्व्योभिषक्।
अहीँश्चसर्व्वाञ्जम्भयन्त्सर्वाश्चयातुधान्न्योऽधराचीःपरासुव ॥ ५ ॥
ॐअसौयस्ताम्म्रोऽअरुणऽउतबब्भ्रुःसुमङ्गलः।
येचैनꣳरुद्राऽअभितोदिक्षुश्रिताः सहस्रशोऽवैषाꣳहेडऽईमहे ॥ ६ ॥
ॐ असौयोऽवसर्प्पतिनीलग्ग्रीवोव्विलोहितः।
उतैनङ्गोपाऽअदृशन्नदृशन्नुदहार्य्यःसदृष्टोमृडयातिनः ॥ ७ ॥
ॐ नमोऽस्तुनीलग्ग्रीवायसहस्राक्षायमीढुषे।
अथोयेऽअस्यसत्त्वानोऽहंतेब्भ्योकरन्नमः ॥ ८ ॥
ॐप्रमुञ्चधन्न्वनस्त्वमुभयोरार्त्न्योर्ज्ज्याम्।
याश्चतेहस्तऽइषवःपराताभगवोव्वप ॥ ९ ॥
ॐ विज्ज्यंधनुःकपर्द्दिनोविशल्ल्योबाणवाँ२ उत।
अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥
ॐ यातेहेतिर्म्मीढुष्टमहस्तेबभूवतेधनुः।
तयाऽस्म्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ॥ ११ ॥

ॐ परिधन्वनोहेतिस्मान्वनोहेतिरसन्वृणक्तुविश्वतः ।
अथोयऽइषुधिस्तवारेऽअस्म्मन्निधेहितम् ॥ १२ ॥
ॐ अवतत्यधनुष्ट्वꣳसहस्राक्षशतेषुधे ।
निशीर्य्यशल्यानांमुखाशिवोनः सुमनाभव ॥ १३ ॥
ॐ नमस्तऽआयुधायाततायधृष्णवे ।
उभाब्भ्यमुततेननमोबाहुब्भ्यांतवधन्वने ॥ १४ ॥
ॐ मानोमहान्तमुतमानोऽअर्ब्भकम्मानऽउक्षन्तमुतमानऽउक्षितम् ।
मानोव्वधीः पितरंमोतमातरंमानः प्प्रियास्तन्वोरुद्द्ररीरिषः ॥१५॥
ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥
मानोवीरान्नुद्रभामिनोव्वधीर्हव्विष्मन्तः सदमित्त्वाहवामहे ॥१६॥

॥ इति रुद्रसूक्तम् ॥

## ४. यमसूक्तम्

ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः ।
तदेवशुक्क्रंतद्ब्रह्मताऽआपःसप्प्रजापतिः ॥ १ ॥
ॐ सर्वेनिमेषाजज्ञिरेव्विद्युतः पुरुषादधि ।
नैनमूद्र्ध्वन्नतिर्य्यञ्चंनमद्ध्येपरिजग्रभत् ॥ २ ॥
ॐ नतस्स्यप्रतिमाऽअस्तियस्यनाममहद्यशः ।
हिरण्यगर्ब्भऽइत्येषमामाहिꣳसीदित्येषायस्म्मान्नजातऽइत्येषः ॥ ३ ॥
ॐ एषोहदेवःप्रदिशोऽनुसर्व्वाःपूर्वोहजातःसऽउगर्ब्भेऽअन्तः ।
सऽएवजातःसजनिष्यमाणःप्प्रत्यङ्जनास्तिष्ठतिसर्व्वतोमुखः ॥ ४ ॥
ॐ यस्म्माज्जातंनपुराकिञ्चिनैवयऽआबभूवभुवनानिव्विश्श्वा ।
प्रजापतिःप्प्रजयासꣳरराणस्त्रीणिज्योतीꣳषिसचतेसषोडशी ॥ ५ ॥
ॐ येनद्यौरुग्ग्रापृथिवीचदृढायेनस्स्वः स्तभितंय्येननाकः ।
योऽअन्तरिक्षेरजसोव्विमानःकस्म्मैदेवायहविषाव्विधेम ॥ ६ ॥
ॐ यंक्रन्दसीऽअवसातस्तभानेऽअब्भ्यैक्षेतांमनसारेजमाने।
यत्राधिसूरऽउदितोव्विभातिकस्मैदेवायहविषव्विधेम ।

आपोहयद्बृहतीर्य्यश्चिदापः ॥ ७ ॥

ॐ व्वेनस्तत्पश्यन्निहितंगुहासद्यत्रव्विश्श्वंभवत्येकनीडम् ।

तस्मिन्निदॅंसंचव्विचैतिसर्व्वॅंसऽओतःप्प्रोतश्श्चव्विभूःप्प्रजासु ॥ ८ ॥

ॐ प्रतद्व्वोचेदमृतंनुव्विद्द्वान्गन्धर्व्वोधामव्विभृतंगुहासत् ।

त्रीणिपदानिनिहितागुहास्स्ययस्तानिव्वेदसपितुःपितासत् ॥ ९ ॥

ॐ सनोबन्धुर्ज्जनितासव्विधाताधामानिव्वेदभुवनानिव्विश्श्वा ॥

यत्रदेवाऽअमृतमानशानास्तृतीयेधामन्नद्ध्यैरयन्त ॥ १० ॥

ॐ परीत्यभूतानिपरीत्यलोकान्परीत्यसर्व्वाः प्प्रादिशोदिशश्श्च ।

उपस्त्याथप्प्रथमजामृतस्यात्मनाऽऽत्मानमभिसंव्विवेश ॥११॥

ॐ परिद्यावापृथिवीसद्यऽइत्वापरिलोकान्परिदिशःपरिस्स्वः ।

ऋतस्यतन्तुंव्विततंव्विचृत्यतदपश्यत्तदभवत्तदासीत् ॥१२ ॥

ॐसदसस्प्पति मद्भुतंप्रियमिन्द्रस्यकाम्यम् ।

सनिंमेधामयासिषॅंस्वाहा ॥ १३ ॥

ॐ यांमेधांदेवगणाः पितरश्श्चोपासते ।

तयामामद्यमेधयाग्नेमेधाविनंकुरुस्वाहा ॥ १४ ॥

ॐ मेधाम्मेव्वरुणोददातुमेधामग्निःप्प्रजापतिः ।

मेधामिन्द्रश्श्चव्वायुश्श्चमेधांधाताददातुमेस्वाहा ॥ १५ ॥

ॐ इदंमेब्ब्रह्मचक्षत्रंचोभेश्श्रियमश्श्नुताम् ।

मयिदेवादधतुश्श्रियमुत्तमांत्तस्यैतेस्स्वाहा ॥ १६ ॥

॥ इति यमसूक्तम् ॥

## ५. प्रेतसूक्तम्

ॐ अपेतोयन्तुपणयोऽसुम्म्नादेवपीयवः । अस्यलोकः सुतावतः ।

द्युभिरहोभिरक्तुभिर्व्यक्तंय्यमोददात्ववसानमस्मै ॥ १ ॥

सवितातेशरीरेब्भ्यःपृथिव्यॉंल्लोकमिच्छतु । तस्मैयुज्ज्यन्तामुस्रियाः ॥ २ ॥

व्वायुःपुनातुसवितापुनात्त्वग्नेर्ब्भ्राजसासूर्य्यस्यव्वर्च्चसा ।

व्विमुच्च्यन्तामुस्रियाः ॥ ३ ॥

अश्श्वेत्त्थेवोनिषदनंपर्ण्णेवोव्वसतिष्कृता ।
गोभाज–इत्किलासथयत्सनवथपूरुषम् ॥ ४ ॥
सवितातेशरीराणिमातुरूपस्त्थऽआवपतु । तस्म्मैपृथिविशम्भव ॥ ५ ॥
प्रजापतौत्वादेवतायामुपोदकेलोकेनिदधाम्यसौ ॥ अपनःशोशुचदघम् ॥ ६ ॥
परंमृत्योऽअनुपरेहिपन्थाँय्यस्तेऽइतरोदेवयानात् ।
चक्षुष्म्मतेश्रृण्वतेतेब्ब्रवीमिमानःप्प्रजाँरीरिषेमोतव्वीरान् ॥ ७ ॥
शंव्वातःशꣳहितेघृणिःशंतेभवन्त्विष्ष्टकाः ।
शंतेभवन्त्वग्नयःपार्थिवासोमात्त्वाभिशूशुचन् ॥ ८ ॥
कल्प्पन्तांतेदिशस्तुब्भ्यमापःशिवतमास्तुब्भ्यंभवन्तुसिन्धवः ।
अन्तरिक्षꣳशिवंतुब्भ्यंकल्प्पन्तांतेदिशःसर्व्वाः ॥ ९ ॥
अश्म्मन्वतीरीयतेसँरभद्ध्वमुत्तिष्ठतप्प्रतरतासखायः ।
अत्राजहीमोऽशिवायेऽअसञ्छिवान्वयमुत्तरेमाभिवाजानर ॥ १० ॥
अपाघमपकिल्विषमपकृत्यामपोरपः ।
अपामार्गत्वमस्म्मदपदुःष्वप्न्यँसुव ॥ ११ ॥
सुमित्त्रियानऽआपऽओषधयःसन्तु ।
दुर्म्मित्त्रियास्तस्मैसन्तुयोऽस्म्मान्द्वेष्ष्टियंचव्वयंद्विष्म्मः ॥ १२ ॥
अनड्वाहमन्वारभामहेसौरभेयँस्वस्तये ।
सनइन्द्रऽइवदेवेब्भ्योवह्निः सन्तारणोभव ॥ १३ ॥
उद्वयन्तमसस्परिस्स्वःपश्यन्तऽउत्तरम् ।
देवंदेवत्त्रासूर्य्यमगन्मज्ज्योतिरुत्तमम् ॥ १४ ॥
इदंजीवेब्भ्यःपरिधिंदधामिमैषांनुगादपरोऽअर्त्थमेतम् ।
शतंजीवन्तुशरदःपुरूचीरन्तर्म्मृत्युंदधतांपर्व्वतेन ॥ १५ ॥
अग्ग्नऽआयूँषिपवसऽआसुवोर्ज्जमिषञ्चनः । आरेबाधस्वदुच्छुनाम् ।१६।
आयुष्म्मानग्नेहविषावृधानोघृतप्रतीकोघृतयोनिरेधि ॥
घृतंपीत्वामधुचारुगव्व्यंपितेवपुत्त्रमभिरक्षतादिमान्त्स्वाहा ॥ १७ ॥
परीमेगामनेषतपर्य्यग्निमहृषत । देवेष्ष्वक्रतश्श्रवःकऽइमाँ२ऽआदधर्षति ।१८।
क्रव्व्यादमग्निम्प्रहिणोमिदूरंय्यमराज्ज्यङ्गच्छतुरिप्प्रवाहः ।

इहैवायमितरोजातवेदादेवेभ्यो हव्यंवहतुप्रजानन् ॥ १९ ॥
वहवपांजातवेदप्पितृभ्योयत्रैनान्वेत्थनिहितान्पराके ।
मेदसः कुल्ल्याऽउपतान्त्स्रवन्तुसत्याऽएषामाशिषः सन्नमन्ताꣳस्वाहा ॥ २० ॥
स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानःशर्मसप्रथाः ।
अपनः शोशुचदघम् ॥ २१ ॥
अस्मात्त्वमधिजातोऽसित्वदयञ्जायतांपुनः ।
असौस्वर्गायलोकायस्वाहा ॥ २२ ॥

॥ इति प्रेतसूक्तम् ॥

॥ इति पञ्चसूक्तजपः ॥

॥ इति दुर्मरणमृतानां नारायणबलिविधिः ॥

卐卐卐卐

# पञ्चकदाहविधिः

देहोत्सर्जनसमये यदि पञ्चकस्तदा विशेषविधिं कृत्वैव दाहः कर्तव्यः। ब्रह्ममेधविधिं समाप्य, श्मसानभूमिं प्राप्य, शवं चितायां स्थापयेत्।

ततः कुशगर्भयवपिष्टेन पञ्चपुत्तलकान् निर्माय ताँश्च ऊर्णासूत्रेण वेष्टयित्वा प्रेतवाह-प्रेतसख-प्रेतप-प्रेतभूमिप-प्रेतहर्ता इति नामभिः गन्धपुष्पादिभिः पूजयित्वा शवशरीरे न्यसेत् ।

पुत्तलकान् गन्धादिभिः पूजयेत् -

| | |
|---|---|
| **प्रथमम्** | **ॐ प्रेतवाहाय नमः** |
| **द्वितीयम्** | **ॐ प्रेतसखाय नमः** |
| **तृतीयम्** | **ॐ प्रेतपाय नमः** |
| **चतुर्थम्** | **ॐ प्रेतभूमिपाय नमः** |
| **पञ्चमम्** | **ॐ प्रेतहर्त्रे नमः** |

इति पञ्चपुत्तलकान् पूजयित्वा

प्रथमं पुत्तलकं प्रेतवाहं चितायां शवस्य शिरसि स्थापयेत्

**ॐ त्रायन्तामिह देवा त्रायन्तां मरुतां गणाः।**
**त्रायन्तां विश्वा भूतानि यथायमरपाऽअसत् ॥**

द्वितीयं पुत्तलकं प्रेतसखं चितायां शवस्य नेत्रयोः स्थापयेत्

**ॐ इमं मे वरुण श्रुधीहव मद्या च मृडय। त्वामवस्युराचके॥**

तृतीयं पुत्तलकं प्रेतपं चितायां शवस्य वामकुक्षौ स्थापयेत् -

**ॐ शन्नऽअजऽएकपाद्देवोऽअस्तु शन्नोहिर्बुध्न्यः शंसमुद्रः।**
**शन्नऽअपां नपात्येरुरस्तु शन्नः पृश्निर्भवतु देव गोपाः॥**

चतुर्थं पुत्तलकं प्रेतभूमिपं चितायां शवस्य नाभौ स्थापयेत् -

**ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु।**
**आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते॥**

पञ्चमं पुत्तलकं प्रेतहर्तारं चितायां शवस्य पादयोः स्थापयेत् -

**ॐ ह गूँ सःशुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्।**
**नृषद्वरसदृतसद् व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतं बृहत्॥**

इति स्थापयित्वा

**ॐ यमाय सोमं सुनृत यमाय जुहुता हविः।**
**यमं ह यज्ञो गच्छत्यग्निदूतोऽअरं कृतः॥**
**ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।**
**उर्वारुकमिव बन्धनात् मृत्योर्मुक्षीयमामृतात्॥**

इति मन्त्रद्वयं पठित्वा पुत्तलकेषु घृतधारां दद्यात्

**ॐ प्रेतवाहाय स्वाहा**
**ॐ प्रेतसखाय स्वाहा**
**ॐ प्रेतपाय स्वाहा**
**ॐ प्रेतभूमिपाय स्वाहा**
**ॐ प्रेतहर्त्रे स्वाहा**

इति सर्वेषु पुत्तलकेषु घृतधारां दत्वा शवेन सह दहेत्।

॥ इति पञ्चकदाहविधिः॥

卐卐卐卐

# ❀ अथ पञ्चकशान्तिविधिः ❀

यस्मिन् नक्षत्रे मरणं तन्नक्षत्रकलशं मध्ये स्थापयित्वा अन्यनक्षत्रकलशाः चतसृषु दिक्षु परितः स्थापनीयाः ।
(स्थापनाप्रकारः ४३१ तमे पृष्टे चित्रावल्यां द्रष्टव्यः)

द्वादशाहे सपिण्डनकर्मानन्तरं कर्ता पूर्वाभिमुखो भूत्वा शुद्धासने उपविश्य आचम्य प्राणानायम्य कर्मपात्रं विधाय प्रतिज्ञासङ्कल्पं कुर्यात् -

**हरिः ॐतत्सत् तत्सत् तत्सत्, विष्णुर्विष्णुर्विष्णुः अद्य एतस्य अचिन्त्यशक्तेर्महाविष्णोराज्ञया जगत्सृष्टिकर्मणि प्रवर्तमानस्य परार्द्धद्वय-जीविनो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैकदेशान्तर्गते नेपालदेशे अमुकजनपदे, अमुकनगरे/ग्रामे अमुकस्थाने अद्येह अमुकसंवत्सरे अमुकायने अमुक-ऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे एवं ग्रहगणगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकनामशर्माऽहं/वर्माऽहं/गुप्तोऽहम् अमुकगोत्रस्य (अमुकगोत्रायाः) अमुकशर्मणः/वर्मणः/गुप्तस्य (अमुकदेव्याः) धनिष्ठादिपञ्चनक्षत्रान्तर्गत-अमुकनक्षत्राधिकरणक-दुर्मरणजनितदोषोपशान्त्यर्थं मम गृहे सर्वेषां जनानां दीर्घायुरारोग्य-सुखप्राप्त्यर्थं ब्रह्माण्डपुराणोक्तां पञ्चकनिधनशान्तिं यथाविधि करिष्ये ।**

**ततः विष्वक्सेनपूजनं विधाय हवनवेदीं निर्माय दारुणनामाग्निं संस्कृत्य धान्योपरि पञ्च कलशान् संस्थाप्य सम्पूज्य तदुपरि पञ्च प्रतिमाः स्थापयेत् । तासु प्रतिमासु धनिष्ठा-शतभिषा-पूर्वभाद्रपदा-उत्तरभाद्रपदा-रेवतीनक्षत्राणामधीशान् तत्तन्मन्त्रेण आवाह्य पाद्यार्घाचमन-स्नानवस्त्रोपवीतगन्धाक्षतपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाप्रदक्षिणादिभिः पूजयेत् । नक्षत्रकलशानां समीपे देयवस्तूनि स्थापनीयानि ।**

## पूजनम् –

धनिष्ठेशपूजनम् –

**ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्। देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥**

**ॐ धनिष्ठेशान् वसून् आवाहयामि, स्थापयामि, पूजयामि**

**ॐ धनिष्ठेशाय नमः** इति गन्धाक्षतपुष्पादिभिः यथासम्भवोपचारैः सम्पूज्य प्रार्थयेत् –

**ॐ अधिष्ठातः धनिष्ठाया वसो तुभ्यं नमो नमः।**
**मृतस्याऽस्य प्रसादात्ते सद्गतिः स्याच्छुभं च मे॥**

शतभिषेशपूजनम् –

**ॐ वरुणस्योत्तम्भनमसि वरुणस्यस्कम्भसर्जनीस्थोवरुणस्य ऋतसन्यसि। वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमा सीद॥**

**ॐ शतभिषेशं वरुणम् आवाहयामि स्थापयामि पूजयामि**

**ॐ शतभिषेशाय नमः** इति गन्धाक्षतपुष्पादिभिः यथासम्भवोपचारैः सम्पूज्य प्रार्थयेत् –

**ॐ अधिष्ठातः शतर्क्षस्य नमो वरुण चाऽस्तु ते।**
**पूजां मया कृतां भक्त्या गृहीत्वा सफलं कुरु॥**

पूर्वभाद्रपदेशपूजनम् –

**ॐ उत नोऽहिर्बुध्न्यःशृणोत्वजऽएकपात्पृथिवी समुद्रः। विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु॥**

**ॐ पूर्वाभाद्रपदेशम् अजैकपदम् आवाहयामि स्थापयामि पूजयामि**

**ॐ पूर्वभाद्रपदेशाय नमः** इति गन्धाक्षतपुष्पादिभिः यथासम्भवोपचारैः सम्पूज्य प्रार्थयेत् –

**ॐ पूर्वाभाद्रपदाधीश नमस्तेऽजैकपात् प्रभो।**
**मृतस्य सद्गतिं कृत्वा मह्यं देहि शुभं फलम्॥**

उत्तरभाद्रपदेशपूजनम् -

**ॐ नमस्ते रुद्र मन्यवऽउतो तऽइषवे नमः। बाहुभ्यामुतते नमः॥**

**ॐ उत्तरभाद्रपदेशम् अहिर्बुध्न्यम् आवाहयामि स्थापयामि पूजयामि**

**ॐ उत्तरभाद्रपदेशाय नमः** इति गन्धाक्षतपुष्पादिभिः यथासम्भवोपचारैः सम्पूज्य प्रार्थयेत् -

**ॐ उत्तराभाद्रपदाधीश अहिर्बुध्न्य नमोऽस्तु ते।**
**पूजया वरदो भूत्वा मृतस्य कुरु सद्गतिम्॥**

रेवतीशपूजनम् -

**ॐ पूषन् तव व्रते वयं न रिष्येम कदाचन। स्तोतारस्त इह स्मसि॥**

**ॐ रेवतीशं पूषाणम् आवाहयामि स्थापयामि पूजयामि**

**ॐ रेवतीशाय नमः** इति गन्धाक्षतपुष्पादिभिः यथासम्भवोपचारैः सम्पूज्य प्रार्थयेत् -

**नमस्ते रेवतीशान पूषन् तव मया कृताम्।**
**पूजां गृहीत्वा वरदो भव कुर्याच्च सद्गतिम्॥**

ततः हस्ते जलमादाय अनया पूजया धनिष्ठादिपञ्चकनक्षत्रदेवताः प्रीयन्ताम्, न मम। इत्युत्सृजेत्।

## अथ होमविधिः

अथ हवनवेद्यां पूर्वसंस्कृताग्नौ

**ॐ प्रेताजयतानरऽइन्द्रोवः शर्म्मयच्छतु।**
**उग्रावः सन्तुबाहवोनाधृष्ष्यायथासथ॥**

इति मन्त्रेण पञ्चनक्षत्रमन्त्रान् सम्पुटीकृत्य नक्षत्रनामभिः अष्टोत्तर-शताहुतीर्जुहुयात्। तद्यथा -

ॐ धनिष्ठायै स्वाहा

ॐ शतभिषायै स्वाहा

ॐ पूर्वाभाद्रपदायै स्वाहा

ॐ उत्तराभाद्रपदायै स्वाहा

ॐ रेवत्यै स्वाहा

ततः पूर्णाहुतिम् कृत्वा देयवस्तूनाम् दानम् कुर्यात् –

**ॐ अद्य पूर्वोच्चारितग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अद्येह अमुकगोत्रः अमुकप्रवरान्वितः अमुकशर्माहं (वर्माऽहं/गुप्तोऽहं) कृतस्य पञ्चकनिधनशान्तिकर्मणः साङ्गतासिद्ध्यर्थं सदक्षिणम् एतत् तिलपात्रम् सोमदैवत्यं, हिरण्यं वह्निदैवत्यम्, रौप्यं चन्द्रदैवत्यं, रत्नं विष्णुदैवत्यं, घृतपात्रम् मृत्युञ्जयदैवत्यम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।**

**॥ इति पञ्चकशान्तिविधिः ॥**

# ❀ रजस्वलास्त्रीमरणे दाहविधिः ❀

रजस्वलास्त्रीमरणे यथासम्भवं रात्रित्रयं यापयित्वा स्नानं कारयित्वा दाहसंस्कारः कर्तव्यः । रात्रित्रयात्पूर्वं दाहकरणस्थितौ आगतायां विशेषविधिना शवं स्नापयित्वा ब्रह्ममेधविधिना दाहः कर्तव्यः । शवं दाहस्थलं प्रापय्य जलाशयात् नद्या वा भाण्डे निष्कासितेन जलेन स्नानं कारयितव्यम् । कर्ता स्नात्वा, शुद्धभूमौ उपविश्य, पञ्चगव्यं स्वीकृत्य आचम्य कर्पपात्रं विधाय सङ्कल्पं कुर्यात् –

**ॐ अद्येह अमुकगोत्रायाः अमुकदेव्याः रजस्वलामरणनिमित्तकप्रत्यवाय-परिहाराय और्ध्वदैहिककर्मयोग्यतासिद्ध्यर्थं चान्द्रायणत्रयप्रायश्चित्तपूर्वं शूर्पेणाष्टोत्तरशतस्नानानि कारयिष्ये।**

ततः शुद्धपात्रे आनीते जले पञ्चगव्यं मिश्रीकृत्य शुक्लयजुर्वेद-संहितायाः निम्नमन्त्रैः जलमभिमन्त्रयेत् –

आपोऽअस्मान्मातरःशुन्धयन्तुघृतेननोघृतप्प्वः पुनन्तु।
विश्वꣳहिरिप्प्रम्प्रवहन्तिदेवीरुदिदाब्भ्यः शुचिरापूतऽएमि॥
दीक्षातपसोस्तनूरसितान्त्वाशिवाꣳशग्ग्माम्परिदधेभद्द्रंवर्णम्पुष्यन्॥
आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन। महेरणायचक्षसे।
योवः शिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः॥
तस्म्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः॥
पुनन्तुमापितरः सोम्म्यासःपुनन्तुमापितामहाःपुनन्तुप्प्रपितामहाः पवित्रेणशतायुषा॥पुनन्तुमापितामहाः पुनन्तुप्प्रपितामहाः-पवित्रेणशतायुषाव्विश्श्वमायुर्व्यश्श्नवै॥
अग्नऽआयूꣳषि पवसऽआसुवोर्ज्जमिषञ्चनः। आरेबाधस्वदुच्छुनाम्॥
पुनन्तुमा देवजनाः पुनन्तु मनसाधियः पुनन्तुविश्वाभूतानिजातवेदः पुनीहिमा॥
पवित्रेणपुनीहि माशुक्रेणदेवदीद्यत्। अग्नेक्रत्वाक्रतूँ१ऽरनु॥
यत्तेपवित्रमर्चिष्ष्यग्ग्नेविततमन्तरा। ब्रह्मतेनपुनातुमा॥
पवमानःसोऽअद्यनःपवित्रेणविचर्षणिः। यःपोता सपुनातुमा॥
उभाब्भ्यान्देव सवितः पवित्रेणसवेनच। माम्पुनीहिविश्वतः॥
वैश्वदेवीपुनती देव्यागाद्यस्यामिमाबव्ह्यस्तन्वोव्वीतपृष्ठाः तया मदन्तःसधमादेषुवयꣳस्यामपतयोरयीणाम्॥
ये समानाः समनसः पितरोयमराज्ज्ये।
तेषाँल्लोकः स्वधानमोयज्ञोदेवषुकल्पताम्॥

इत्यादिभिर्मन्त्रैः जलम् अभिमन्त्र्य तेनैव मन्त्रितजलसहितेन शूर्पोदकेन च अष्टोत्तरशतवारं शवं संस्नाप्य (ब्रह्ममेधविधिं कृत्वा ) ततः शुद्धवस्त्रेण शवम् आच्छाद्य पिण्डान् दत्वा दाहयेत्॥

॥ इति रजस्वलास्त्रीमरणे विशेषविधिः॥

# ❀ गर्भिणीमरणे दाहविधिः ❀

गर्भिणीमरणे सजलगोमूत्रेण –

**ॐ आपोहिष्ठा मयोभुवस्तानऽऊर्जेदधातन। महेरणायचक्षसे॥**
**योवः शिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः॥**
**तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः॥**

इति मन्त्रैः प्रोक्ष्य श्मशाने नीत्वा सव्योदरं छित्वा जीवन् बालकश्चेद्धात्रीस्तनं दत्वा –

**यस्तेस्नतः शशयोयोमयोभूर्यौरत्नधावसुविद्यः सुदत्रः॥**
**येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे कः॥**

इति मन्त्रेण बालकं गृहं प्रेषयेत्, मृतश्चेद् भूमौ निखनेत्।

गर्भिण्युदरं दधिघृतेन प्रपूर्य्य –

**ॐ आपोहिष्ठा मयोभुवस्तानऽऊर्जेदधातन। महेरणायचक्षसे॥**
**योवः शिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः॥**
**तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः॥**

इति मन्त्रैः मृत्-कुशगोमूत्रैः संस्नाप्य (ब्रह्ममेधविधिं च कृत्वा) नूतनवस्त्रैराच्छाद्य पिण्डान् दत्वा दाहयेत्॥

॥ इति गर्भिणीमरणे विशेषविधिः॥

# ❀ सूतिकामरणे दाहविधिः ❀

सूतिकामरणे तु पूर्वं शुद्धजलेन तां संस्नाप्य, तदनन्तरं महत्पात्रं शुद्धजलेन पूरयित्वा तत्र पञ्चगव्यं निक्षिपेत्।

ततः कर्ता स्नात्वा, शुद्धवस्त्रं परिधाय, पञ्चगव्यं स्वीकृत्य कर्मपात्रं विधाय कुशादिकमादाय सङ्कल्पं कुर्यात् –

**ॐ अद्येह अमुकगोत्रायाः अमुकदेव्याः सूतिकामरणनिमित्त-दोषपरिहारार्थम् और्ध्वदेहिकयोग्यतासिद्ध्यर्थं शतवारं शूर्पेण स्नानं कारयिष्ये।**

इति सङ्कल्प्य प्रायश्चित्तरूपं पञ्चगव्यैः पृथक् पृथक् स्नापयेत्।

शूर्पेण स्नानादिकं विधाय (ब्रह्ममेधविधिं कृत्वा) सर्वौषधिलेपनं कृत्वा नववस्त्रेण वेष्टयित्वा पूर्ववत् पिण्डान् दत्वा दाहयेत्।

**॥ इति सूतिकामरणे विशेषविधिः ॥**

# ❀ पुत्तलकदाहविधिः ❀

प्रवासमरण-नदीप्रवाह-भूस्खलनादिभिः विविधहेतुभिः मृतस्य शवस्य अनुपलब्धौ पर्णशरदाहः (पुत्तलकं निर्माय दाहः) कर्तव्यः। सति सम्भवे मुहूर्तं द्रष्टव्यम् - यथा उत्तरायणमासानां कृष्णपक्षस्य १।६।११।१३।१४ तिथीः, क्षयतिथिम्, शुक्र-शनि-मङ्गल-वासरान्, गुरुशुक्रयोरस्तकालम्, मलमासम्, वैधृति-व्यतिपात-परिधयोग-विष्टिकरणादीन् संत्यज्य पर्णशरदाहः कर्तव्यः। तथैव कर्तुः जन्मराशेः ४,८,१२ स्थानेषु चन्द्रमसि अप्राप्ते सति एव दाहः कार्यः॥

अथ कर्ता नद्यादिपवित्रस्थलं गत्वा क्षौरपूर्वकं स्नानं विधाय पर्णशरदाहाधिकारसिद्ध्ये मृतकस्य सद्गतिप्राप्त्यर्थं प्रायश्चित्तगोदानादिकं कुर्यात्। ततः शुद्धासने उपविश्य कर्मपात्रं निर्माय प्रतिज्ञासङ्कल्पपूर्वकं यथाविधि पुत्तलां निर्मीयात्।

प्रतिज्ञासङ्कल्पः -

**हरिः ॐ तत्सदित्यादिदेशकालादीन् सङ्कीर्त्य अद्य अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकनामाहं (मम) अमुकगोत्रस्य अमुकप्रवरान्वितस्य मत्पितुः अमुकनाम्नः (माता चेत् - अमुकगोत्रायाः मन्मातुः अमुकदेव्याः) दुर्मरणशवाप्राप्तिजनितसकलदोषनिवृत्तिपूर्वकसद्गतिप्राप्त्यर्थं पुत्तलकनिर्माणपूर्वकं दाहं करिष्ये।**

# पुत्तलकनिर्माणप्रकारः

भूमौ कृष्णाजिनं पर्णं कुशं वा आस्तीर्य तत्र कुशैः पुरुषाकृतिं निर्माय तस्मिन् ३६० पलाशवृन्तान् (पलाशका पातको भेट्ना) अस्थिरूपेण संस्थाप्य (शिरोभागे – ४०, ग्रीवायाम् – १०, उरस्थले (छाती) – २०, जठरे – २०, बाहुद्वये – ५०+५०=१००, कटिदेशे – १०+१०=२०, ऊरुद्वये (तिघ्रा) – ५०+५०=१००, जङ्घाद्वये – १५+१५=३०,शिश्ने – ०४, वृषणद्वये – ०३+०३=६, पादाङ्गुलीभागे (गोडाका औंला) – ०५+०५=१०) संस्थाप्य ऊर्णासूत्रेण वेष्टयित्वा जलार्द्रेण यवपिष्टेन सर्वौषधीभिश्च लेपनं कृत्वा शिरस्थाने – नारिकेलम्, तालुके – तुम्बम्(लौका), मुखे – पञ्चरत्नम्, जिह्वायाम् – कदलीफलम्, नेत्रयोः – कपर्दिका(कौडा) अन्त्रेषु – नालिकम् (कमलको नाल), घ्राणे – बालुकाम् (मुसावर नामक सुगन्धित द्रव्य), वसायाम् – मृत्तिकाम्, हरितालम् (हलेदो), मनःशिला (शिला विशेषको नाम), रेतसःस्थाने – पारदम्(पारो), पुरीषे – पित्तलम्, सन्धिषु – तिलकल्कम् (तिलको पीना), मांसे – यवपिष्टम्, शोणिते – मधुः, केशेषु – जटाजूटम् (जटामसी), त्वचायाम् – मृगचर्म, कर्णयोः – तालपत्रम्, स्तनयोः – गुञ्जिका (लाल गेडी), नासिकायाम् – शतपत्रम् (तिलको फूल), नाभिमण्डले – कमलम्, वृषणद्वन्द्वे – वृन्ताकम्(भण्टा), लिङ्गे – गृञ्जनम् (गाँजर), नाभ्याम् – घृतम्, कौपिने – त्रपु (लाहा), स्तनयोर्मूर्ध्नि(स्तनको टुप्पो) – मौक्तिकम् (मोति) इत्यादीनि विन्यस्य कुङ्कुमकर्पूरागरुमाल्यैश्च सज्जीकृत्य शुभ्रवस्त्रेण परिवेष्ट्य तत्र मृतस्य देहं भावयित्वा सम्पूज्य

ॐ शन्नो देवीरभिष्टयऽआपोभवन्तुपीतये। शंय्योरभिस्रवन्तुनः॥
ॐ इमम्मे वरुणश्श्रुधिहवमद्याचमृडय । त्वामवस्युराचके ॥

इति द्वाभ्यां मन्त्राभ्यां शालग्रामशिलोदकैरभिषिच्य ब्रह्ममेधं कृत्वा यथाविधि पिण्डदानादिकं विधाय श्मशानं नीत्वा दाहादिकं कुर्यात्॥

॥ इति पुत्तलकदाहविधिः ॥

卐 卐 卐 卐

## ❀ अथ जितन्तेस्तोत्रे प्रथमोऽध्यायः ❀

ॐ जितन्ते पुण्डरीकाक्ष पूर्णषाड्गुण्यविग्रह।
परानन्द परब्रह्मन्नमस्ते चतुरात्मने ॥१॥
नमस्ते पीतवसने नमः कटकधारिणे।
नमो नीलालकाबद्धवेणीसुन्दर पुङ्गव ॥२॥
स्फुरद्वलयकेयूरनूपुराङ्गदभूषणैः।
शोभनैर्भूषिताकारकल्याणगुणराशये ॥३॥
करुणापूर्णहृदय शङ्खचक्रगदाधर।
अमृतानन्दपूर्णाभ्यां लोचनाभ्यां विलोकय ॥४॥
कृशं कृतघ्नं दुष्कर्मकारिणं पापभाजनम्।
अपराधसहस्राणामाकरं करुणाकर ॥५॥
कृपया मां केवलया गृहाण मथुराधिप।
विषयार्णवमग्नं मामुद्धर्तुं त्वमिहार्हसि ॥६॥
पिता माता सुहृद्बन्धुः भ्राता पुत्रस्त्वमेव मे।
विद्या धनञ्चकामश्च नान्यं किञ्चित्त्वया विना ॥७॥
यत्र कुत्र कुले वासो येषु केषु भवोऽस्तु मे।
तव दास्यैकभावे स्यात् सदा सर्वत्र मे रतिः ॥८॥
मनसा कर्मणा वाचा शिरसा वा कथञ्चन।
त्वां विना नान्यमुद्दिश्य करिष्ये किञ्चिदप्यहम् ॥९॥
पाहि पाहि जगन्नाथ कृपया भक्तवत्सल।
अनाथोहमधन्योहमकृतार्थो ह्यकिञ्चनः ॥१०॥
नृशंसः पापकृत् क्रूरो वञ्चको निष्ठुरः सदा।
भवार्णवनिमग्नं मामनन्यकरुणानिधे ॥११॥
करुणापूर्णदृष्टिभ्यां दीनं मामवलोकय।
त्वदग्रे पतितं त्यक्तुं तावकं नार्हसि प्रभो ॥१२॥
मया कृतानि पापानि त्रिविधानि पुनः पुनः।

त्वत्पादपङ्कजं प्राप्तुं नान्यत् त्वत्करुणां विना ॥१३॥
साधनानि प्रसिद्धानि यागादीन्यब्जलोचन।
त्वदाज्ञया प्रयुक्तानि त्वामुद्दिश्य कृतानि वै ॥१४॥
भक्त्यैकलभ्यः पुरुषोत्तमो हि जगत्प्रसूतिस्थितिनाशहेतुः।
अकिञ्चनं नान्यगतिं शरण्यं गृहाण मां क्लेशिनमम्बुजाक्ष ॥१५॥
धर्मार्थकाममोक्षेषु नेच्छा मम कदाचन।
त्वत्पादपङ्कजं साधो जीवितं दीयतां मम ॥१६॥
कामये तावकत्वेन परिचर्यासु वर्तनम्।
नित्यं किङ्करभावेन परिगृह्णीष्व मां विभो ॥१७॥
लोकं वैकुण्ठनामानं दिव्यं षाड्गुण्यसंयुतम्।
अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥१८॥
नित्यसिद्धैः समाकीर्णं त्वन्मयैः पाञ्चकालिकैः।
सभा प्रासाद संयुक्तं वनैश्चोपवनैः शुभैः ॥१९॥
वापीकूपतडागैश्च वृक्षखण्डैः सुमण्डितम्।
अप्राकृतसुरैर्वन्द्यमयुतार्कसमप्रभम् ॥२०॥
प्रकृष्टसत्वराशिं त्वां कदा द्रक्ष्यामि चक्षुषा।
क्रीडन्तं रमयासार्द्धं लीलाभूमिषु केशवम् ॥२१॥
मेघश्यामं विशालाक्ष्यं कदा द्रक्ष्यामि चक्षुषा।
उन्नसं चारुदशनं विम्बोष्ठञ्च शुभाननम् ॥२२॥
विशालवक्षसं श्रीशं कम्बुग्रीवं जगद्गुरुम्।
आजानुबाहुपरिघमुन्नतांशं मधुद्विषम् ॥२३॥
तनूदरं निम्ननाभिमापीनजघनं हरिम्।
करभोरुश्रियः कान्तं कदा द्रक्ष्यामि चक्षुषा ॥२४॥
शंखचक्रगदापद्मैरङ्कितं पादपङ्कजम्।
शरच्चन्द्रशताक्रान्तं नखराजिविराजितम् ॥२५॥
सुरासुरैर्वन्द्यमानमृषिभिर्विदितं सदा।
मूर्द्धानं मामकं देव तावकं मण्डयिष्यति ॥२६॥

कदा गम्भीरया वाचा श्रिया युक्तो जगत्पते।
चामरव्यग्रहस्तं मामेवंकुर्विति वक्ष्यसि ॥२७॥
कदाहं राजराजेन गणनाथेन नोदितः।
चरेयं भगवत्पादपरिचर्यानुवृत्तिषु ॥२८॥
शान्ताय सुविशुद्धाय तेजसे परमात्मने।
नमः सर्वगुणातीत षाड्गुण्यायातिवेधसे ॥२९॥
सत्यज्ञानानन्तगुणब्रह्मणे चतुरात्मने।
चतुः पञ्चनवव्यूह दशद्वादश मूर्तये ॥३०॥
नमोनन्ताय विश्वाय विश्वातीताय चक्रिणे।
नमस्ते पञ्चकालज्ञ पञ्चकालपरायण ॥३१॥
पञ्चकालैकमनसां त्वमेव गतिरव्यय।
स्वमहिम्नि स्थितं देवं निर्विकारं निरञ्जनम् ॥३२॥
अप्रमेयमजं विष्णुं शरणं त्वां गतोऽस्म्यहम्।
गुणातीतं परं शान्तमब्जनाभं सुरेश्वरम् ॥३३॥
तुरीयाद्यतिरिक्तं त्वां कौस्तुभोद्भासिवक्षसम्।
विश्वरूपं विशालाक्षं कदा द्रक्ष्यामि चक्षुषा ॥३४॥
मोक्षं सालोक्यसारूप्यं प्रार्थये न धराधर।
इच्छामि हि महाभाग कारुण्यं तव सुव्रत ॥३५॥
सकलावरणातीत किंकरोस्मि तवानघ।
पुनः पुनः किंकरोस्मि तवाहं पुरुषोत्तम ॥३६॥
आसनाद्यनुयागान्तमर्चनं यन्मयाकृतम्।
भोगहीनं क्रियाहीनं मन्त्रहीनमभक्तिकम् ॥३७॥
तत्सर्वं क्षम्यतां देव दीनं मामात्मसात्कुरु।
इति स्तोत्रेण देवेशं स्तुत्वा मधुविघातिनम् ॥३८॥
यागावसानसमये देवदेवस्य चक्रिणः।
नित्यं किंकर भावेन स्वात्मानं विनिवेदयेत् ॥३९॥

॥ इति श्रीपाञ्चरात्रागमे जितन्तेस्तोत्रे प्रथमोऽध्यायः ॥

# अथ द्वितीयोऽध्यायः

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥१॥
विज्ञापनमिदं देव श्रृणुष्व पुरुषोत्तम।
नरनारायणाभ्यां च श्वेतद्वीपनिवासिभिः ॥२॥
नारदाद्यैर्मुनिगणैः सनकाद्यैश्च योगिभिः।
ब्रह्मेशाद्यैः सुरगणैः पञ्चकालपरायणैः ॥३॥
पूज्यसे पुण्डरीकाक्ष दिव्यैर्मन्त्रैर्महात्मभिः।
पाषण्डधर्मसङ्कीर्णे भगवद्भक्तिवर्जिते ॥४॥
कलौ जातोस्मि देवेश सर्वधर्मबहिष्कृते।
कथं त्वामसमाचारः पापप्रसवभूरहम् ॥५॥
अर्चयामि दयासिन्धो पाहि मां शरणागतम्।
तापत्रयदवाग्नौ च दह्यमानं सदा विभो ॥६॥
पाहि मां पुण्डरीकाक्ष केवलं कृपया तव।
जन्ममृत्युजराव्याधिदुःखसन्तप्तदेहिनम् ॥७॥
पालयाशु दृशा देव तव कारुण्यगर्भया।
इन्द्रियाणि मया जेतुमशक्यं पुरुषोत्तम।
शरीरं मम देवेश व्यादिभिः परिपीडितम् ॥८॥
मनो मे पुण्डरीकाक्ष विषयानेव धावति।
वाणी मम हृषीकेश मिथ्या पारुष्यदूषिता ॥९॥
एवं साधनहीनोऽहं किं करिष्यामि केशव।
रक्ष मां कृपया कृष्ण भवाब्धौ पतितं सदा ॥१०॥
अपराधसहस्राणां सहस्रमयुतं तथा।
अर्बुदं चाप्यसंख्येयं करुणाब्धे क्षमस्व मे ॥११॥
यच्चापराधं कृतवानज्ञानात् पुरुषोत्तम।
अज्ञस्य मम देवेश तत्सर्वं क्षन्तुमर्हसि ॥१२॥

अज्ञत्वादल्पशक्तित्वादालस्याद्दुष्टभावनात्।
कृतापराधकृपणं क्षन्तुमर्हसि मां विभो ॥१३॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया।
तानि सर्वाणि मे देव क्षमस्व मधुसूदन ॥१४॥
यज्जन्मनः प्रभृति मोहवशं गतेन
नानापराधशतमाचरितं मया ते।
अन्तर्बहिश्च सकलं तव पश्यतोऽपि
क्षन्तुं त्वमर्हसि हरे करुणावशेन ॥१५॥
कर्मणा मनसा वाचा या चेष्टा मम नित्यशः।
केशवाराधने सा स्याज्जन्मजन्मान्तरेष्वपि ॥१६॥

॥ इति श्रीपाञ्चरात्रे जितन्तेस्तोत्रे द्वितीयोध्यायः ॥

## अथ तृतीयोऽध्यायः

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन।
नमस्तेस्तु हृषीकेश महापुरुषपूर्वज ॥१॥
नमस्ते वासुदेवाय शान्तानन्दचिदात्मने।
अध्यक्षाय स्वतन्त्राय निरपेक्षाय शाश्वते ॥२॥
अच्युतायाविकाराय तेजसां निधये नमः।
चतुः पञ्च नवव्यूह द्वादशाक्षरमूर्तये ॥३॥
अनेक मूर्तये तुभ्यममूर्त्तायैकमूर्त्तये।
नारायण नमस्तेऽस्तु पुण्डरीकायतेक्षण ॥४॥
सुभ्रूललाट सुनस सुस्मिताधर विद्रुम।
पीनवृत्तायतभुज श्रीवत्सकृतभूषण ॥५॥
तनुमध्य महावक्ष पद्मनाभ नमोऽस्तुते।
विलासविक्रमाक्रान्तत्रैलोक्यचरणाम्बुज ॥६॥

नमस्ते पीतवसन स्फुरन्मकरकुण्डल।
स्फुरत्किरीटकेयूरहारकौस्तुभभूषण ॥७॥
पञ्चायुध नमस्तेऽस्तु नमस्ते पञ्चकालिक।
पञ्चकालायतेक्रान्त योगक्षेमावह प्रभो ॥८॥
नित्यज्ञानबलैश्वर्य भोगोपकरणाच्युत।
नमस्ते ब्रह्मरुद्रादिलोकयात्राप्रवर्तक ॥९॥
जन्मप्रभृति दासोऽस्मि शिष्योऽस्मि तव सुव्रत।
त्वञ्च स्वामी गुरुर्माता पिता च मम माधव ॥१०॥
अपि त्वां भगवन् ब्रह्मशिवशक्रमहर्षयः।
द्रष्टुं यष्टुमभिष्टोतुमद्यापीश नहीशिरे ॥११॥
तापत्रयमहाग्राहभीषणे भवसागरे।
मज्जतां नाथ नौरेषा प्रणतिस्तु त्वदर्पिता ॥१२॥
अनाथाय जगन्नाथ शरण्याशरणार्थिने।
प्रसीद सीदते मह्यं मुह्यते भक्तवत्सल ॥१३॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्चितम्।
तत् क्षन्तव्यं प्रपन्नानामपराधसहो ह्यसि ॥१४॥
चतुःपञ्चनवव्यूहद्वादशाक्षरमूर्तये।
अनेकमूर्तये तुभ्यममूर्त्तायैकमूर्त्तये ॥१५॥
त्रिभिर्ज्ञानबलैश्वर्यवीर्यशक्त्योजसां युगैः।
त्रियुगाय नमस्तेऽस्तु नमस्ते चतुरात्मने ॥१६॥
प्रधानपुरुषेशाय नमस्ते पुरुषोत्तम।
सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत।
किङ्करोऽस्मि हृषीकेश भूयो भूयोस्मिकिङ्करः ॥१७॥
एकत्रिचतुरत्यन्त चेष्टज्येष्ठाकृतिस्थिते।
व्यक्तषाड्गुण्यचेष्टाय चतुरात्मात्मने नमः ॥१८॥

॥ इति श्रीपाञ्चरात्रे जितन्तेस्तोत्रे तृतीयोध्यायः॥

## अथ चतुर्थोऽध्यायः

जितन्ते पुण्डरीकाक्ष पूर्णषाड्गुण्यविग्रह।
नमस्तेऽस्तु हृषीकेश महापूरुषपूर्वज ॥१॥
देवानां दानवानां च सामान्यमधिदैवतम्।
सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ॥२॥
एकस्त्वमस्य लोकस्य स्रष्टा संहारकारक।
अध्यक्षश्चानुमन्ताच गुणमायासमावृतः ॥३॥
संसारसागरं घोरमनन्तक्लेशभाजनम्।
त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः ॥४॥
न ते रूपन्न चाकारो नायुधानि न चास्पदम्।
तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे ॥५॥
नैव किञ्चित् परोक्षन्ते प्रत्यक्षोऽसि न कस्यचित्।
नैव किञ्चिदसाध्यं ते न चासिद्धोऽसि कर्हिचित् ॥६॥
कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम्।
योगिनां परमां सिद्धिं परमं ते पदं विदुः ॥७॥
अहं भीतोऽस्मि देवेश संसारेऽस्मिन्भयावहे।
पाहि मां पुण्डरीकाक्ष न जाने शरणं परम् ॥८॥
कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत।
शरीरे च गतौ चापि वर्तते मे महद्भयम् ॥९॥
त्वत्पादकमलादन्यन्न मे जन्मान्तरेष्वपि।
निमित्तकुशलस्यास्ति येन गच्छामि सद्गतिम् ॥१०॥
विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमूर्जितम्।
जन्मान्तरेऽपि देवेश मा भूदस्य परिक्षयः ॥११॥
दुर्गतावपि जातायां त्वद्गतो मे मनोरथः।
यदि नाशं न विन्देत तावतास्मि कृती सदा ॥१२॥

न काम कलुषं चित्तं मम ते पादयोः स्थितम् ।
कामये वैष्णवत्वञ्च सर्वजन्मसु केवलम् ॥१३॥
अज्ञानाद्यदि वा ज्ञानादशुभं यत्कृतं मया ।
क्षन्तुमर्हसि देवेश दास्येन च गृहाण माम् ॥१४॥
सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत ।
किङ्करोऽस्मि हृषीकेश भूयो भूयोऽस्मि किङ्करः ॥१५॥
इत्येवमनयास्तुत्या स्तुत्वा देवं विनोदये ।
किङ्करोऽस्मीति चात्मानं देवाय विनिवेदयेत् ॥१६॥
यच्चापराधं कृतवानज्ञानात्पुरुषोत्तम ।
अज्ञस्य मम देवेश तत्सर्वं क्षन्तुमर्हसि ॥१७॥
अहंकारार्थकामेषु प्रीतिरद्यैव नश्यतु ।
त्वां प्रपन्नस्य मे सैव वर्द्धतां श्रीमति त्वयि ॥१८॥
क्वाहमत्यन्तदुर्बुद्धिः क्व नु चात्महितेक्षणम् ।
यद्धितं मम देवेश तदाज्ञापय माधव ॥१९॥
सोऽहं ते देवदेवेश नार्चनादौ स्तुतौ न च ।
सामर्थ्यवान् कृपामात्रमनोवृत्तिः प्रसीद मे ॥२०॥
उपचारापदेशेन क्रियतेऽहर्निशं मया ।
अपचारान्निमान्सर्वान्क्षमस्व पुरुषोत्तम ॥२१॥
न जाने कर्म यत् किञ्चिन्नापि लौकिकवैदिकौ ।
न निषेधविधीविष्णो तदा दासोऽस्मि केवलम् ॥२२॥
स त्वं प्रसीद भगवन् कुरु मय्यनाथे
विष्णो कृपां परमकारुणिकः किल त्वम् ।
संसारसागरनिमग्नमनन्तदीन-
मुद्धर्तुमर्हसि हरे करुणावशेन ॥२३॥

॥ इति श्रीपाञ्चरात्रे जितन्ते स्तोत्रे चतुर्थोध्यायः ।



Upayogibooks.com

# अथ पञ्चमोऽध्यायः

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥१॥
नमस्ते वासुदेवाय शान्तानन्तचिदात्मने।
अजिताय नमस्तुभ्यं षाड्गुण्यनिधये नमः ॥२॥
महाविभूतिसंस्थाय नमस्ते पुरुषोत्तम।
सहस्रशिरसे तुभ्यं सहस्रचरणाय ते ॥३॥
सहस्रबाहवे तुभ्यं सहस्रनयनाय ते।
अमूर्तये नमस्तुभ्यमेकमूर्ताय ते नमः ॥४॥
अनेकमूर्तये तुभ्यमक्षराय च ते नमः।
व्यापिने वेदवेद्याय नमस्ते परमात्मने ॥५॥
कलौ जातोऽस्मि देवेश सर्वधर्मबहिष्कृते।
कथं त्वामसमाचारः पापप्रसवभूरहम् ॥६॥
अर्चयामि दयासिन्धो पाहि मां शरणागतम्।
तापत्रयदवाग्नौ च दह्यमानं सदा विभो ॥७॥
पाहि मां पुण्डरीकाक्ष केवलं कृपया तव।
जन्ममृत्युजराव्याधिदुःखसन्तप्तदेहिनम् ॥८॥
पालयासु दृशा देव तव कारुण्यगर्भया।
इन्द्रियाणि मया जेतुमशक्यं पुरुषोत्तम।
शरीरं मम देवेश व्याधिभिः परिपीडितम् ॥९॥
मनो मे पुण्डरीकाक्ष विषयानेव धावति।
वाणी मम हृषीकेश मिथ्यापारुष्यदूषिता ॥१०॥
एवं साधनहीनोऽहं किं करिष्यामि केशव।
रक्ष मां कृपया कृष्ण भवाब्धौ पतितं सदा ॥११॥
अपराधसहस्राणां सहस्रमयुतं तथा।
सहस्रशिरसे तुभ्यं सहस्रचरणाय ते ॥१२॥

सहस्रबाहवे तुभ्यं सहस्रनयनाय ते ।
अमूर्तये नमस्तुभ्यमेकमूर्ताय ते नमः ॥१३॥
अनेकमूर्तये तुभ्यमक्षराय च ते नमः ।
व्यापिने वेदवेद्याय नमस्ते परमात्मने ॥१४॥
चिन्मात्ररूपिणे तुभ्यं नमस्तुर्यादिमूर्तये ।
अणिष्ठाय स्थविष्ठाय महिष्ठाय च ते नमः ॥१५॥
वरिष्ठाय वसिष्ठाय कनिष्ठाय नमो नमः ।
नेदिष्ठाय दविष्ठाय क्षेपिष्ठाय च ते नमः ॥१६॥
पञ्चात्मने नमस्तुभ्यं सर्वान्तर्यामिणे नमः ।
कलाषोडशरूपाय सृष्टिस्थित्यन्तहेतवे ॥१७॥
नमस्ते गुणरूपाय गुणरूपानुवर्तिने ।
व्यस्ताय च समस्ताय समस्तव्यस्तरूपिणे ॥१८॥
लोकयात्राप्रसिद्ध्यर्थं सृष्टब्रह्मादिरूपिणे ।
नमस्तुभ्यं नृसिंहादिमूर्तिभेदाय विष्णवे ॥१९॥
नाहं हित्वा प्रजानामि त्वां भजाम्येव केवलम् ।
आदिमध्यान्तशून्याय तद्वते च नमो नमः ।
प्रणवप्रतिपाद्याय नमः प्रणवरूपिणे ॥२०॥
विपाकैः कर्मभिः क्लेशैरस्पृष्टवपुषे नमः ।
नमो ब्रह्मण्यदेवाय तेजसां निधये नमः ॥२१॥
नित्यसाधारणानेकलोकरक्षपरिक्षदे ।
सच्चिदानन्दरूपाय वरेण्याय नमो नमः ॥२२॥
यजमानाय यज्ञाय यष्टव्याय नमो नमः ।
नित्यकालात्मने तुभ्यं नमः स्वाध्यायशालिने ॥२३॥
नमः परमहंसाय नमः सत्त्वगुणाय ते ।
स्थिताय परमे व्योम्नि भूयो भूयो नमो नमः ॥२४॥

हरिर्देहभृतामात्मा परमप्रकृतीश्वरः ।
त्वत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥२५॥
संसारसागरे घोरे विषयावर्त्तसंकुले ।
अपारे दुस्तरेगाधे वर्तेऽहं कर्मभिः स्वकैः ॥२६॥
अनाथमगतिं भीरु दयया परया हरे ।
मामुद्धर दयासिन्धो संसाराब्धेः सुदुस्तरात् ॥२७॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्चितम् ।
तत् क्षन्तव्यं प्रपन्नानामपराधसहो ह्यसि ॥२८॥
अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥२९॥
जन्मप्रभृतिदासोऽस्मि शिष्योऽस्मि तनयोऽस्मिते ।
त्वं च स्वामी गुरुर्माता पिता च मम माधव ॥३०॥
नाहं हित्वा प्रजानामि त्वां भजाम्येव केवलम् ।
बुद्ध्वैवं मम गोविन्द भक्त्युपायेन मां हरे ॥३१॥
त्वां विना मे प्रियो नान्यो नेदं नेदमितीति च ।
बुद्धिं नीतिं च मे देहि येन त्वामुपयाम्यहम् ॥३२॥
इति विज्ञाप्य देवेशं वैश्वदेवेस्वधामनि ।
कुर्यात्पञ्चमहायज्ञानपि गृह्योक्तकर्मणा ॥३३॥
इत्यादि समये तस्य कथितः कमलासन ।
देवानां सारमुद्धृत्य सर्वागमसमृद्धये ।
व्यापिने वेदवेद्याय नमस्ते परमात्मने ॥३४॥

॥ इति श्रीपाञ्चरात्रे महोपनिषदि ब्रह्मतन्त्रे श्रीमदष्टाक्षरकल्पे जितन्तेस्तोत्रे पञ्चमोऽध्यायः समाप्तः ॥

卐 卐 卐 卐

# ❀ अथ वैकुण्ठोत्सवविधिः ❀

## तीर्थस्नानम्

**अस्नात्वा नाचरेत्कर्म जपहोमादिकं तथा।**
**अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः॥**
**स्रवत्येव दिवारात्रं तस्य स्नानं विशोधनम्।**
**विधिना ह्याचरेत् स्नानं स्नात्वा कार्यं समाचरेत्॥**

कर्त्ता वैकुण्ठोत्सवकर्मकारकेभ्यः परमभागवतेभ्यः श्रीवैष्णवाचार्येभ्यः पूर्वदिवसे ताम्बूल-पूगीफलतुलसीपत्राणि दत्वा तान् निमन्त्रयेत्।

कुशतिलाक्षतदूर्वापुष्पपञ्चगव्यापमार्गादीनि तीर्थस्नानोपयोगिवस्तूनि संपाद्य निमन्त्रितश्रीवैष्णवैः सह यथासंभवजलाशयं गत्वा मुण्डनं कुर्यात्।

**आत्मनः शुद्धिकामो वा पितॄणां मुक्तिहेतवे।**
**वपनं वै करिष्यामि तीरेऽहं तव जाह्नवि॥**
**यानि कानि च पापानि ब्रह्महत्यासमानि च।**
**केशानाश्रित्य तिष्ठन्ति तस्मात् केशान् वपाम्यहम्॥**

इत्युक्तप्रकारेण वपनं कृत्वा स्नायात्।

## तीर्थप्रार्थना

**ॐ तीर्थराजाय नमः।**

इति तीर्थं प्रणम्य अञ्जलिं बद्ध्वा प्रार्थयेत् -

**सागरस्य तु निःश्वासो दण्डहस्तोऽसुरान्तकः।**
**जगत्स्रष्टर्जगन्नाथ नमामि त्वां सुरेश्वर॥**
**अधिष्ठात्र्यश्च तीर्थानां तीर्थेषु निवसन्ति याः।**
**देवतास्ताः प्रयच्छन्तु स्नानाज्ञां मम सर्वथा॥**

इति सम्प्रार्थ्य हस्ते जलाक्षतताम्बूलहिरण्यादिकमादाय सङ्कल्पं कुर्यात् -

हरिः ॐ तत्सत् ३, ॐ विष्णुः विष्णुः विष्णुः अद्य अस्य श्रीशेषशेषाशनविष्वक्सेनादिनित्यसूरिनिर्विशेषैः अशेषसज्जनजन-सम्भावनीयैः सम्भवदवद्यगन्धैः अनादिमायामहावर्तवम्भ्रम्यमाण-बाह्यकथकरभावनगन्धसिन्धुरैः अधिजिगमिषितमुक्तिघण्टापथैः अखण्डदिङ्मण्डलव्यापियशोवितानधवलितजगत्त्रितयैः औपनिषद्-रहस्योपदेशदेशिकैः श्रीपराङ्कुशपरकालनाथयामुन-यतिवरादिदिव्यदेशिकैः परमव्योम-श्वेतद्वीप-क्षीरसागर-श्रीरङ्ग-वृषगिरि-सत्यव्रत-यदुगिरि-पुरुषोत्तमसाकेत-मथुरादिदिव्याभि-व्यक्तिप्रदेशेषु समनुष्ठितमङ्गलाशासनस्य निखिलसुरासुरमुकुट-मणिमञ्जरीनिकरनीराजितपादपीठस्य शरणागतपरित्राणसप्ततन्तु-दीक्षादीक्षितस्य सरसीरुहवासिनीसहचरितधर्मणः संसरणदवदहन-तापनिर्वापणवलाहकस्य जगद्रक्षणशिक्षाविचक्षणस्य अच्युतानन्त-वीर्यस्य महाजालकमध्यपरिभ्राम्यमाणानेककोटिसूर्यप्रभासमेतस्य श्रीभूमिनीलाकुचकलशविन्यस्तकुङ्कुमाङ्कितवक्षस्थलस्य शेष-पर्यङ्कशायिनः शंखचक्रगदाखड्गशार्ङ्गपद्महस्तविराजितस्य सौशील्यवात्सल्यादिगुणगणौघमहार्णवस्य श्रीमन्नारायणस्येक्षया-नाभिकमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतः तदुद्धरणाय प्रार्थितस्य महापुरुषस्य अचिन्त्यापरिमितशक्त्या महाजलौघमध्ये परिभ्राम्यमाणानाम् एकतमे व्यक्तमहदहङ्कार-पृथिव्यप्तेजोवाय्वाकाशाद्यावरणैः आवृते ह्यस्मिन् महति ब्रह्माण्ड- खण्डे श्रीमदादिवराहद्रंष्टाग्रविराजिते अस्मिन् भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्त्तैकदेशे नेपालदेशे अमुकदेवक्षेत्रे अमुकजनपदे मुकनगरे/ग्रामे वा परार्धद्वयजीविनो

ब्रह्मणो द्वितीयपरार्धे एकपञ्चाशत्तमे वर्षे प्रमथमासे प्रथमपक्षे प्रथमदिवसे दिनस्य द्वितीये यामे तृतीये मुहूर्ते अष्टमे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे श्रीमन्नृपतिविक्रमार्कराज्याद् अमुकवर्षे श्रीमद्रामानुजमुनिप्रादुर्भावात् अमुकवर्षे वर्तमाने अमुकसंवत्सरे अमुकायने अमुक-ऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते देवगुरौ शेषेषुग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगुणगणविशेषेणविशिष्टायां शुभपुण्यतिथौ अद्येह अमुकगोत्रस्य अमुकनाम्नः मम अमुकगोत्रस्य अमुकनाम्नः अस्मत्पितुः (अमुकगोत्रायाः अस्मन्मातुः अमुकदेव्याः, अमुक-गोत्रस्य अमुकसबन्धिनो वा) जन्मप्रभृति ज्ञाताज्ञात-कामाकाम-सकृदसकृत्-कायिकवाचिक-मानसिक-सांसर्गिक-स्पृष्टास्पृष्ट-भुक्ताभुक्त-पीतापीत-संकरीकरण-मलिनीकरण-अपात्रीकरण-जातिभ्रंशकरण-प्रकीर्णपातकानां मध्ये सम्भावितपापनिरासार्थं शरीर-शुद्ध्यर्थं कृच्छ्रचान्द्रायणादि-प्रायश्चित्तप्रत्याम्नायरूपं तथा भगवदपचार-भागवतापचार-असह्यापचार-नानाविधानन्तापचार-निवृत्तिपूर्वकम् अमुकस्य दिवङ्गतस्य श्रीवैकुण्ठोत्सवपूर्वक-नारायणबलिकर्मणो योग्यताप्राप्तये अमुकतीर्थे नानानामगोत्रैः श्रीवैष्णवैः सह तीर्थस्नानमहं करिष्ये।

इति सङ्कल्पं कृत्वा प्रार्थयेत् -

## प्रार्थना

**हिरण्यश्रृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः।**
**त्वं राजा सर्वतीर्थानां तीर्थेषु वसतिस्तव ॥**
**वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे।**
**याचितं देहि मे तीर्थं सर्वपापापनुत्तये ॥**
**आपो नारायणोद्भूताः तस्य ता अयनं पुनः।**
**तस्मान्नारायणं देवं स्नानकाले स्मराम्यहम् ॥**

इति सम्प्रार्थ्य तीर्थजले एकहस्तपरिमितं दीर्घमायतं च चतुरस्रं तीर्थपीठं तर्जन्या कृत्वा तत्र गङ्गामावाहयेत् -

**आवाहयामि त्वां देवि स्नानार्थमिह सुन्दरि।**
**एहि गङ्गे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥**
**विष्णुवामपदांगुष्ठनखस्रोतो विनिःसृते।**
**त्वद्भक्तिविघ्नरूपात्त्वं गङ्गे मां मोचयैनसः ॥**

ततः हस्तयोर्न्युब्जाञ्जलिना जलमभिमन्त्रयेत् -

**ॐ उरुꣳहि राजा वरुणश्चकार सूर्याय पन्थामन्वे तवाऽउ।**
**अपदे पादा प्रतिधातवे करूतापवक्ता हृदयाविधिश्चित् ॥**
**नमो वरुणायाभिष्ट्वुतो वरुणस्य पाशः।**

ततो जलं दक्षिणहस्तांगुलिभिः दक्षिणम् आवर्तयन् पठेत् -

**ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पासा विततामहान्तः।**
**तेभिर्नोऽअद्य सवितोतविष्णुर्विश्वे मुञ्चन्तुमरुतःस्वर्काःस्वाहा ॥**

ततः चन्दनाक्षतपुष्पैः तीर्थं पूजयेत्।

**ॐ अमुकतीर्थाय नमः।**

इति पूजयित्वा श्रीमन्नारायणं ध्यायन् वारत्रयं निमज्जेत्। ततः उन्मज्य पञ्चगव्यस्नानं कुर्यात्।

## पञ्चगव्यस्नानम्

हस्ते जलकुशादिकमादाय सङ्कल्पयेत् –

**ॐ शरीरशुद्ध्यर्थं पञ्चगव्यस्नानम् अहं करिष्ये।**

इति सङ्कल्प्य गायत्र्या गोमूत्रेण स्नायात् –

**ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि।**
**धियो योनः प्रचोदयात्॥**

ततो गोमयोदकेन स्नायात् –

**ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।**
**ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥**

गोघृतेन स्नायात् –

**ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि।**
**प्रियन्देवानामनाधृष्टन्देवयजनमसि॥**

गोदध्ना स्नायात् –

**ॐ दधिक्राब्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः।**
**सुरभिनो मुखाकरत्प्रणऽआयूꣳषि तारिषत्॥**

गोदुग्धेन स्नायात् –

**ॐ आप्यायस्व समेतुते विश्वतः सोमवृष्ण्यम्।**
**भवावाजस्य सङ्गथे॥**

## मृत्तिकास्नानविधिः

**ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।**
**समूढमस्य पाꣳसुरे स्वाहा॥**

इति शुद्धमृदं गृहीत्वा भागचतुष्टयं कृत्वा प्रथमभागमादाय जलेनार्पयित्वा शिरसि संलिप्य स्नायात् –

**ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे।**
**शिरसा धारयिष्यामि रक्षस्व मां पदे पदे॥**

द्वितीयभागमादाय बाहौ संलिप्य स्नायात् -

**ॐ उद्धृतासि वराहेण कृष्णेन शतबाहुना।**
**मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम्॥**

तृतीयभागमादाय वक्षस्थले विलिप्य स्नायात् -

**ॐ मृत्तिके ब्रह्मदत्तासि कश्यपेनाभिमन्त्रिता।**
**मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम्॥**

चतुर्थभागमादाय पादयोर्विलिप्य स्नायात् -

**ॐ मृत्तिके प्रतिष्ठितं सर्वं तन्मे निर्णुद मृत्तिके।**
**त्वया हतेन पापेन गच्छामि परमां गतिम्॥**

## प्रायश्चित्तस्नानम्

प्रथमं हस्ते जलकुशादिकमादाय सङ्कल्पं कुर्यात् -

**ॐ सर्वपापनिवृत्तिपूर्वकशरीरशुद्ध्यर्थं प्रायश्चित्तस्नानमहं करिष्ये।**

इति सङ्कल्प्य प्रायश्चित्तस्नानं कुर्यात् -

**ॐ यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः।**
**यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्।**
**तन्नऽइन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः॥**
**ॐ अत्याशनादतिपानाद् यच्चऽउग्रात्प्रतिग्रहात्।**
**तन्नो वरुणो राजा पाणिना ह्यवमर्षतु।**
**सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्विषः।**
**नाकस्य पृष्ठमारुह्य गच्छेत् ब्रह्म सलोकताम्॥**

कुशैः सर्वाङ्गसम्मार्जनं कुर्यात्। ततः अधोलिखितसूक्तैः स्नानं कुर्यात् -

## वरुणसूक्तम्

ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जे दधातन। महेरणाय चक्षसे।
ॐ यो वः शिवतमो रसस्तस्य भाजयतेहनः। उशतीरिव मातरः॥
ॐ तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ।आपो जनयथाचनः।

## समुद्रज्येष्ठासूक्तम्

ॐ समुद्रज्येष्ठा सलिलस्य मध्यात्पुनानायान्त्यनिविशमानाः।
इन्द्रोऽयावज्री वृषभोरराद ताऽआपो देवीरिह मामवन्तु॥
ॐ यासां राजा वरुणो याति मध्ये सत्यानृतेऽअवपश्यञ्जनानाम्।
मधुश्च्युतः शुचयो याः पाावका ताऽआपो देवीरिहमामवन्तु॥
ॐ याऽआपोदिव्याऽउतवा स्रवन्ति खनित्रियाऽउत वा यास्वयञ्जाः।
समुद्रार्थायाः शुचयः पावकास्ताऽआपो देवीरिह मामवन्तु॥
ॐ यासु राजा वरुणो यासु सोमो विश्वेदेवा यासूर्यंमदन्ति।
वैश्वाऽनरो यास्वग्निः प्रविष्टस्ताऽआपो देवीरिहमामवन्तु॥

## शुद्धिसूक्तम्

ॐ एतोन्विन्द्रꣳस्तवाम शुद्धꣳशुद्धेन साम्ना।
शुद्धैरुक्थैर्वावृध्वासꣳशुद्धऽआशीर्वान्ममत्तु॥
ॐ इन्द्रः शुद्धोनऽआगहि शुद्धः शुद्धाभिरूतिभिः।
शुद्धोरयिन्निधारय शुद्धो ममद्धिसोम्य॥
ॐ इन्द्रः शुद्धो हिनोरयिꣳशुद्धो रत्नानि दाशुषे।
शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजꣳसि शाससि॥

## पवमानसूक्तम्

ॐ पवमानःसुवर्चनः पवित्रेण विचर्षिणः। यः पोतास पुनातु माम्।
ॐ पुनन्तु मां देवजनाः पुनन्तु वसवो धिया।
विश्वेदेवाः पुनीत मा जातवेदः पुनीहि माम्॥
ॐ पावमानीः स्वस्त्ययनीः सुदुघाहि घृतश्च्युतः।
ऋषिभिः सम्भृतो रसो ब्राह्मणेष्वमृतं हितम्॥
ॐ पावमानिर्दिशन्तुनऽइमं लोकऽअथोऽअमुम्।
कामान्समर्धयन्तु नो देवीर्देवं समाहिता॥
ॐ येन देवाः पवित्रेण आत्मानं पुनते सदा।
तेन सहस्रधारेण पावमान्यः पुनन्तु माम्॥
ॐ प्राजापत्यं पवित्रं शतोद्याम ६ हिरण्मयम्।
तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे॥
ॐ इन्द्रः पुनीतिः सहमा पुनातु सोमः स्वस्त्या वरुणः समीच्या।
यमो राजा प्रमृणाभिः पुनातु मा जातवेदामोर्जयन्त्या पुनातु॥
ॐ यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किञ्चिदन्यत्।
जातस्य यच्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि॥
ॐ ब्रह्म वधात् सुरापानात् स्वर्णस्तेयाद् वृषलीमैथुनसङ्गमात्।
गुरोर्दाराधिगमाच्च तत्पावमानीभिरहं पुनामि॥
ॐ दुर्यष्टं दुरधीतं पापं यच्चाज्ञानकृताकृतम्।
अयाजिताश्चासंयाज्यास्तत्पावमानीभिरहं पुनामि॥
ॐ पावमानीः स्वस्त्ययनीर्याभिर्गच्छन्ति नान्दनम्।
पुण्याँश्च भक्ष्याभक्षयत्यमृतत्वञ्च गच्छति॥
ॐ पावमानीः पितृन्देवान्ध्यायेद्यश्च सरस्वतीम्।
पितृंस्तस्योपवर्तेत क्षीरं सर्पिर्मधूदकम्॥
ॐ पावमानं परं ब्रह्म शुक्रञ्ज्योतिः सनातनम्।
ऋषींस्तस्योपतिष्ठेत क्षीरं सर्पिर्मधूदकम्॥

**ॐ पावमानं परं ब्रह्म ये पठन्ति मनीषिणः ।**
**सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥**

अपामार्गमादाय मार्जयेत् –

**ॐ अपाघमपकिल्विषमपकृत्यामपोरपः ।**
**अपामार्गत्वमस्मदपदुष्वन्यꣳसुवः ॥**

दूर्वामादाय मार्जयेत् –

**ॐ काण्डात्काण्डात्प्ररोहन्ति परुषः परुषस्परि ।**
**एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥**
**सहस्रपरमा देवी शतमूला शताङ्कुरा ।**
**सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी ॥**
**ॐ तच्छं योरा वृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये ।**
**दैवी स्वस्तिरस्तुनः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् ।**
**शन्नो अस्तु द्विपदे । शं चतुष्पदे । ॐ शान्तिः ३ ॥**

ततः निमज्य उन्मज्य अघमर्षणं कुर्यात् । विनियोगः –

**ॐ अघमर्षणसूक्तस्य अघमर्षण ऋषिः, अनुष्टुप्छन्दो भाववृत्तो देवता अघमर्षणे विनियोगः ।**

**ॐ ऋतञ्च सत्यञ्चाभीद्धा त्तपसोध्यजायत ततो रात्र्यजायत ततः समुद्रोऽअर्णवः समुद्रादर्णवादधिसंवत्सरोऽअजायत । अहो रात्राणि विदधद्विश्वस्य मिषतो वशी सूर्याश्चन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो सुवः ।**

इत्यघमर्षणं कृत्वा प्राणानायम्य सङ्कल्पं कुर्यात् –

**ॐ अद्य समस्तपितृणाम् अमुकामुकनाम्नां श्रीवैकुण्ठधाम-प्राप्त्यर्थम् अमुकतीर्थे पुरुषसूक्तेन स्नानमहं करिष्ये ॥**

**इति सङ्कल्प्य पुरुषसूक्तमुच्चरन् स्नात्वा आर्द्रवाससा जले तिष्ठन् स्नानाङ्गतर्पणं कुर्यात् –**

# स्नानाङ्गतर्पणविधिः

पूर्वाभिमुखः कुशादिकम् आदाय जलाञ्जलिं दद्यात् –

| | | |
|---|---|---|
| ॐ सश्रीकं | केशवं | तर्पयामि |
| ॐ सश्रीकं | नारायणं | तर्पयामि |
| ॐ सश्रीकं | माधवं | तर्पयामि |
| ॐ सश्रीकं | गोविन्दं | तर्पयामि |
| ॐ सश्रीकं | विष्णुं | तर्पयामि |
| ॐ सश्रीकं | मधुसूदनं | तर्पयामि |
| ॐ सश्रीकं | त्रिविक्रमं | तर्पयामि |
| ॐ सश्रीकं | वामनं | तर्पयामि |
| ॐ सश्रीकं | श्रीधरं | तर्पयामि |
| ॐ सश्रीकं | हृषीकेशं | तर्पयामि |
| ॐ सश्रीकं | पद्मनाभं | तर्पयामि |
| ॐ सश्रीकं | दामोदरं | तर्पयामि |
| ॐ सश्रीकं | वासुदेवं | तर्पयामि |
| ॐ सश्रीकं | सङ्कर्षणं | तर्पयामि |
| ॐ सश्रीकं | प्रद्युम्नं | तर्पयामि |
| ॐ सश्रीकम् | अनिरुद्धं | तर्पयामि |
| ॐ सश्रीकं | पुरुषोत्तमं | तर्पयामि |
| ॐ सश्रीकम् | अधोक्षजं | तर्पयामि |
| ॐ सश्रीकं | नारसिंहं | तर्पयामि |
| ॐ सश्रीकम् | अच्युतं | तर्पयामि |
| ॐ सश्रीकं | जनार्दनं | तर्पयामि |
| ॐ सश्रीकम् | उपेन्द्रं | तर्पयामि |

ॐ सश्रीकं हरिं तर्पयामि
ॐ सश्रीकं श्रीकृष्णं तर्पयामि
ॐ आधारशक्त्यादिवैकुण्ठपार्षदान् तर्पयामि
ॐ ब्रह्मादयो ये देवाः तान् तर्पयामि
ॐ भूर्देवान् तर्पयामि
ॐ भुवर्देवान् तर्पयामि
ॐ स्वर्देवान् तर्पयामि
ॐ भूर्भुवः स्वर्देवान् तर्पयामि

ततो निवीत्युत्तराभिमुखो भूत्वा ऋषितर्पणं कुर्यात् -

ॐ द्वैपायनादयो ये ऋषयः तान् तर्पयामि
ॐ भूः ऋषीन् तर्पयामि
ॐ भुवः ऋषीन् तर्पयामि
ॐ स्वः ऋषीन् तर्पयामि
ॐ भूर्भुवः स्वः ऋषीन् तर्पयामि

**अपसव्येन** दक्षिणाभिमुखः सन् पितृतीर्थेन कव्यवाडनलादिपितॄन् तर्पयेत् -

ॐ कव्यवाडनलादयो ये पितरः तान् तर्पयामि
ॐ अग्निष्वात्तादयो ये पितरः तान् तर्पयामि
ॐ सोमपादयो ये पितरः तान् तर्पयामि
ॐ बर्हिषदादयो ये पितरः तान् तर्पयामि
ॐ सोमं तर्पयामि
ॐ यमं तर्पयामि
ॐ अर्यमणं तर्पयामि
ॐ भूः पितॄन् तर्पयामि

ॐ भुवः पितृन् तर्पयामि
ॐ स्वः पितृन् तर्पयामि
ॐ भूर्भुवःस्वःपितृन् तर्पयामि
ॐ चतुर्दशयमान् तर्पयामि
ॐ स्वपितृन् तर्पयामि
ॐ पितामहान् तर्पयामि
ॐ प्रपितामहान् तर्पयामि
ॐ मातृः तर्पयामि
ॐ पितामहीः तर्पयामि
ॐ प्रपितामहीः तर्पयामि
ॐ मातामहान् तर्पयामि
ॐ प्रमातामहान् तर्पयामि
ॐ वृद्धप्रमातामहान् तर्पयामि
ॐ मातामहीः तर्पयामि
ॐ प्रमातामहीः तर्पयामि
ॐ वृद्धप्रमातामहीः तर्पयामि
ॐ आचार्यान् तर्पयामि
ॐ सर्वसम्बन्धिनः तर्पयामि

ततो वक्ष्यमाणमन्त्रान् पठन् जलाञ्जलिं प्रदद्यात् –

ॐ देवा सुरास्तथा यक्षा नागा गन्धर्वदानवाः ।
पिशाचा गुह्यकाः सिद्धाः कुष्माण्डास्तरवः खगाः ॥
जलेचरा भूनिलया वाय्वाहाराश्च जन्तवः ।
ते सर्वे तृप्तिमायान्तु मद्दत्तेनाम्बुनाखिलाः ।
अग्निदग्धाश्च ये जीवा येऽप्यदग्धा कुले मम ।
भूमौ दत्तेन तोयेन तृप्ता यान्तु परां गतिम् ॥

इति तीर्थतटे निक्षिप्य पुनर्जलाञ्जलिं गृहीत्वा –

**ॐ सुमित्रिया नऽआपऽओषधयः सन्तु ।**

इत्युच्चार्य तीर्थतटे क्षिपेत् । पुनर्जलाञ्जलिं गृहीत्वा –

**ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्च वयं द्विष्मः ।**

इत्युच्चार्य तीर्थतटे क्षिपेत् ।

ततः शिखां दक्षिणपूर्वे नामयन्निष्पीडयेत् –

**शिखोदकं भूपतितं पिबन्ति पितरोऽधमाः ।**
**तेषामाप्यायनायैव शिखां निष्पीडयाम्यहम् ॥**

पुनर्जलाञ्जलिमादाय –

**यन्मया दूषितं तोयं शारीरमलसम्भवात् ।**
**तस्य पापस्य शुद्ध्यर्थं यक्ष्मैतत्ते जलाञ्जलिः ॥**

इति यक्ष्मतर्पणाय तीर्थतटे क्षिपेत् ।

ततः धौतवस्त्रपरिधानं कृत्वा दक्षिणां दद्यात् ।

हस्ते जलाक्षतकुशहिरण्यमादाय –

**ॐ भगवदाज्ञया भगवत्कैङ्कर्यत्वेन करिष्यमाणविष्णुश्राद्धनारायण-बलिकर्मयोग्यताप्राप्तये तप्तकृच्छ्रचान्द्रायणादिप्रत्याम्नायरूपत्वेन अमुकगोत्रोत्पन्नः अमुकनामाहम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यं हिरण्यादिद्रव्यं दातुमहमुत्सृजे ।**

इति सङ्कल्प्य श्रीवैष्णवब्राह्मणाय दद्यात् । ततः आवाहिततीर्थं सम्पूज्य विसर्जयित्वा तिलकधारणं कुर्यात् ।

## तिलकधारणविधिः

**ॐ विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम्।**
**विष्णोः प्रियसखीं देवीं नमाम्यच्युतवल्लभाम्॥**

इति श्वेतमृत्तिकामादाय वामहस्ते जलं निधाय घर्षयेत् -

**ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि।**
**योऽअस्कभायदुत्तरꣳसधस्थं विचक्रमाणस्त्रेधोरुगायः॥**

तत्रानामिकया **क्ष्रौं** बीजमालिख्य ललाटे धारयेत् -

**ॐ अतो देवाऽअवन्तुनो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्त धामभिः॥**
**ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥**

क्रमेण उदरे पुण्ड्रत्रयम्, वक्षस्थले पुण्ड्रैकम्, कण्ठे पुण्ड्रत्रयम्, दक्षिणभुजे एकम्, वामभुजे एकम्, पृष्ठे मूर्धनि च एकैकमिति द्वादशोर्द्ध्वपुण्ड्रान् धृत्वा हरिद्रानिर्मितं चूर्णमादाय जलेन द्रवीकृत्य-

**ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।**
**ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥**

इति घर्षयित्वा अभिमन्त्र्य पुण्ड्रमध्ये धारयेत् । श्रीपादतीर्थं पीत्वा गुरुपरम्परायाः अनुसन्धानं कर्तव्यम् । ततः आचार्यादिसहितः यजमानः यागागारं प्रविश्य तिल-यव-पुष्प-चन्दन-पुष्प-तुलसीपत्र-मालाक्षत-कुश-दूर्वा-फल-वस्त्र-यज्ञोपवीत-धूप-दीप-पक्वान्नादि-नैवेद्य-पूगीफल-ताम्बूल-द्रव्यादीनि वैकुण्ठोत्सवकर्मणि आवश्यकानि सकलवस्तूनि सम्पाद्य कर्मपात्रं निर्माय पीतसर्षपैः दिग्रक्षणं कृत्वा दीपपूजनञ्च विधाय प्रतिज्ञासङ्कल्पं कुर्यात्।

## दिग्रक्षणम्

हस्ते पीतसर्षपान् गृहीत्वा –

**पूर्वे रक्षतु गोविन्दः आग्नेय्यां धरणीधरः ।**
**याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते ॥**
**वारुण्यां केशवो रक्षेद् वायव्यां मधुसूदनः ।**
**उत्तरे श्रीधरो रक्षेदैशान्यां तु गदाधरः ॥**
**ऊर्ध्वं गोवर्धनो रक्षेद् अधस्तास्तु त्रिविक्रमः ।**
**एवं दशदिशो रक्षेद् वासुदेवो जनार्दनः ॥**

इत्यभिमन्त्र्य सर्वासु दिक्षु प्रक्षिपेत् ।

## अथ दीपपूजनम्

पूर्वे दीपं प्रज्वाल्य पूजयेत् –

**ॐ पृष्टो दिवि पृष्टोऽअग्निः पृथव्यांपृष्टोविश्वाऽओषधीराविवेश ।**
**वैश्वानरः सहसापृष्टोऽअग्निः स नो दिवासरिषस्पातु नक्तम् ।**
**ॐ स्थिरोभव विड्वङ्गऽआशुर्भववाज्यर्वन् ।**
**पृथुर्ब्भव सुखदस्त्वमग्नेः पुरीषवाहणः ॥**
**ॐ कर्मसाक्षिणे दीपनारायणाय नमः, आवाहयामि स्थापयामि पूजयामि ।**

इति प्रतिज्ञाय अर्घ्यादिसर्वोपचारैः सम्पूज्य प्रार्थयेत् –

**नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।**
**सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥**

इति दीपं प्रपूज्य प्रतिज्ञासङ्कल्पं कुर्यात् –

## प्रतिज्ञासङ्कल्पः

**हरिः ॐ तत्सत् ३, ॐ विष्णुः३ अद्य श्रीमद्भगवतो महापुरुषस्य श्रीभूनीलानायकस्य सौशील्यादिसकलकल्याण-गुणगणसमलङ्कृतस्य श्रीमन्नारायणस्य नाभिकमलोद्भवस्य**

भगवदाज्ञया सकलजगत्सृष्टिं कुर्वतः अखिललोक-पितामहस्य परार्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे दिनस्य द्वितीययामे तृतीये मुहूर्ते, अष्टमे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे, अष्टाविंशतितमे सत्यत्रेताद्वापरान्ते कलियुगे कलिप्रथमचरणे श्रीमन्नृपतिविक्रमार्कराज्यात् वर्तमाने अमुकतमे वर्षे, श्रीमद्रामानुजमुनिप्रादुर्भावाद् वर्तमाने अमुकतमे वर्षे, अमुकसंवत्सरे, अमुक-अयने, अमुक-ऋतौ, अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकनक्षत्रे, अमुकयोगे अमुककरणे अमुकराशि-स्थिते श्रीसूर्ये, अमुकराशिस्थिते चन्द्रे, अमुकराशिस्थिते देवगुरौ, शेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्टायां शुभपुण्यतिथौ अस्मिन् भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गते नेपालदेशे अमुकक्षेत्रे अमुक-मण्डलान्तर्गते अमुकनगरे/अमुकग्रामे श्रीलक्ष्मीनारायणभगवतः सन्निधौ वर्तमानः, शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनीयशाखाध्यायी अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः, अमुकनामशर्माऽहं/वर्माऽहं/गुप्तोऽहं मम पितुः अमुकनामशर्मणः/वर्मणः/गुप्तस्य (मातुः अमुकदेव्याः वा) अकृत्यकरणकृत्याकरणभगवदपचारभागवतापचारासह्यापचार-निवृत्तिपूर्वकं भगवतः श्रीवैकुण्ठनाथस्य नित्य-सायुज्यमोक्षरूपकैङ्कर्यप्राप्तये भगवदाज्ञया भगवत्-कैङ्कर्यत्वेन भगवन्मुखोल्लासार्थं कलशविष्वक्सेनसमाराधनपुण्याहवाचन-पुरस्सरं श्रीवैकुण्ठोत्सवपूर्वकं नारायणबलिं करिष्ये।

# कुम्भार्चनविधिः

भूप्रार्थना –

**ॐ भूमिर्भूम्नाद्यौर्वरिणान्तरिक्षं महीत्वा ।**
**उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे ॥**

धान्यास्तरणम् –

**ॐ धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्वनः ॥**

कलशस्थापनम् –

**ॐ कुम्भोवनिष्टुर्जनिताशचीभिर्यस्मिन्नग्रेयोन्यां गर्भोऽअन्तः ।**
**प्लाशिर्व्यक्तशतधारऽउत्सो दुहेन कुम्भी स्वधां पितृभ्यः ॥**

कलशे जलपूरणम् –

**ॐ अपो देवीरुपह्वये यत्र गावः पिबन्ति नः । सिन्धुभ्यःकर्त्वꣳ हविः ।**

कलशदृढीकरणम् –

**ॐ स्थिरो भव वीड्वङ्गऽआशुर्भववाज्यर्वन् ।**
**पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहणः ॥**

पञ्चपल्लवनिक्षेपः –

**ॐ अश्वत्थेवो निषदनं पर्णेवो वसतिष्कृता ।**
**गोभाजऽइत्किलासथयत्सनवथ पूरुषम् ॥**

कुशकूर्चनिक्षेपः –

**ॐ पवित्रन्ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।**
**अतप्ततनुर्न तदामोऽअश्नुते श्रृतासऽइद्वहन्तस्तत्समासते ॥**

दूर्वानिक्षेपः –

**ॐ सहस्रपरमादेवी शतमूलाशताङ्कुरा ।**
**सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी ॥**

फलनिक्षेपः –

**ॐ याः फलिनीर्याऽअफलाऽअपुष्पायाश्च पुष्पिणीः।**
**बृहस्पति प्रसूतास्तानोमुञ्चत्व ꣳहसः ।**

सर्वौषधीनिक्षेपः –

**ॐ याऽओषधीः पूर्व्वा जाता देवेब्भ्यस्त्रियुगं पुरा।**
**मनैनुबब्भ्रूणामहꣳ शतं धामानि सप्त च॥**

पञ्चरत्ननिक्षेपः –

**ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे॥**

गन्धनिक्षेपः –

**ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम्।**
**ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥**

सप्तमृत्तिकानिक्षेपः –

**ॐ मृत्तिके प्रतिष्ठितं सर्वं तन्मे निर्णुद मृत्तिके।**
**त्वया हतेन पापेन गच्छामि परमां गतिम्॥**

पूर्णपात्रस्थापनम् –

**ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥**

श्रीफलस्थापनम् –

**ॐ आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोथ बिल्वः।**
**तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्याऽअलक्ष्मीः ॥**

वस्त्रवेष्टनम् -

**ॐ सुजातो ज्योतिषा सह शर्मवरूथमासदत्स्वः।**
**वासोऽअग्ने विश्वरूपꣳसंव्ययस्व विभावसो॥**

ततः ऐशान्ये स्थापितस्य प्रधानकलशस्य चतुर्दिक्षु चतुरो वेदान् आवाह्य पूजयेत् -

पूर्वे -

**ॐ ऋग्वेदाय नमः। ऋग्वेदम् आवाहयामि स्थापयामि पूजयामि।**
**ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।**

दक्षिणे -

**ॐ यजुर्वेदाय नमः। यजुर्वेदम् आवाहयामि स्थापयामि पूजयामि।**
**ॐ इषेत्वोर्जेत्वा वायवस्थ देवोवः सविता प्रार्पयतु श्श्रेष्ठतमाय कर्मणऽआप्यायद्ध्वमघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽ अयक्ष्मामा वस्तेनऽईशतमाघसꣳसोद्ध्रुवाऽअस्मिन्गोपतौ स्यात बह्वीर्य्यजमानस्य पशून्पाहि ।**

पश्चिमे -

**ॐ सामवेदाय नमः। सामवेदम् आवाहयामि स्थापयामि पूजयामि।**
**ॐ अग्नऽआयाहिवीतये गृणानोहव्यदातये। निहोता सत्सिबर्हिषि।**

उत्तरे -

**ॐ अथर्ववेदाय नमः। अथर्ववेदम् आवाहयामि स्थापयामि पूजयामि।**
**ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शंयोरभिस्रवन्तुनः।**

चतुर्भ्यो वेदेभ्यो नमः। सर्वोपचारान् समर्पयामि ॥

ततः पीताक्षतैः कलशप्रतिष्ठां कुर्यात् -

**ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु। विश्वेदेवासऽइहमादयन्तामों ३ प्रतिष्ठ।**
**एषवै प्रतिष्ठानाम यज्ञोयत्रैतेनयज्ञेनयजन्ते सर्वमेवप्रतिष्ठितं भवति।**

कलशप्रार्थना –

**देवदानवसंवादे मथ्यमाने महोदधौ।**
**उत्पन्नोऽसि तदा कुम्भो विधृतो विष्णुना स्वयम्॥**
**त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।**
**आदित्या वसवो रूद्रा विश्वेदेवाः सपैतृकाः।**
**त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।**
**त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव।**
**सान्निध्यं कुरु ( मे देव ) देवेश प्रसन्नो भव सर्वदा॥**

ईशानकलशे वरुणपूजनम् –

**ॐ इमम्मे वरुण श्रुधीहवमद्या च मृडय। त्वामवस्युराचके॥**
**ॐ तत्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहव्विर्भिः। अहेडमानोव्वरुणेहबोध्युरुशꣳसमानऽआयुः प्रमोषीः॥**
**ॐ वरुणाय नमः साङ्गं सपरिवारं सशक्तिकं वरुणम् आवाहयामि स्थापयामि पूजयामि।**

इत्यावाह्य सर्वोपचारैः सम्पूज्य प्रणम्य प्रार्थयेत् –

**त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव।**
**सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा॥**
**नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय।**
**सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते॥**

## विष्वक्सेनपूजनम्

कलशपूर्णपात्रोपरि सप्तदर्भमयं कूर्चं निक्षिप्य विष्वक्सेनं पूजयेत्।

विनियोगः –

**ॐ विश्वकर्मन्निति त्र्यृचस्य शाकऋषिः त्रिष्टुप्छन्दो विश्वकर्मा विष्वक्सेनो देवता विष्वक्सेनपूजने विनियोगः।**

पीताक्षतैरावाहयेत् -

**ॐ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुतद्याम्।**
**मुह्यन्त्वन्येऽअभितः सपत्नाऽइहास्माकं मघवा सूरिरस्तु॥**
**ॐ वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजेऽअद्याहुवेम।**
**सनो विश्वानि हवनानि जोषद्विश्वशंभूरवशे साधुकर्मा ॥**
**ॐ विश्वकर्मन्हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम्।**
**तस्मै विशः समनमन्तपूर्वीरयमुग्रो विहव्यो यथासत् ॥**
**ॐ आवाहयामि सेनेशं सर्वविघ्नविनाशकम्।**
**सूत्रवत्यासमेतञ्च ब्रह्माण्डपरिपालकम्॥**
**ॐ भूर्भुवः स्वः सूत्रवतीसहितं श्रीमन्तं विष्वक्सेनम् आवाहयामि स्थापयामि पूजयामि।**
**सूत्रवतीसहिताय श्रीमते विष्वक्सेनाय नमः।**

**हस्तयोरर्घ्यम्, पादयोः पाद्यम्, मुखे आचमनीयम्, वस्त्रम्, उपवीतम्, गन्धम्, पुष्पम्, धूपम्, दीपम्, नैवेद्यम्, सफलताम्बूलम्, दक्षिणाम्, प्रदक्षिणाम्, नमस्कारं समर्पयामि।**

ततो विष्वक्सेनस्य अष्टसु दिक्षु क्रमेण तत्पार्षदान् पूजयेत्।

ईशाने - **ॐ गं गजाननाय नमः,गजाननम् आवाहयामि स्थापयामि पूजयामि।**

आग्नये - **ॐ जं जयत्सेनाय नमः, जयत्सेनम् आवाहयामि स्थापयामि पूजयामि।**

नैऋत्ये - **ॐ हं हरिमुखाय नमः, हरिमुखम् आवाहयामि स्थापयामि पूजयामि।**

वायव्ये - **ॐ कं कालप्रकृतये नमः, कालप्रकृतिम् आवाहयामि स्थापयामि, पूजयामि।**

पूर्वे - ॐ बं बलाय नमः, बलम् आवाहयामि स्थापयामि पूजयामि ।

दक्षिणे - ॐ प्रं प्रबलाय नमः, प्रबलम् आवाहयामि स्थापयामि पूजयामि ।

पश्चिमे - ॐ विं विनायकाय नमः, विनायकम् आवाहयामि स्थापयामि पूजयामि ।

उत्तरे - ॐ विं विघ्नेशाय नमः, विघ्नेशम् आवाहयामि स्थापयामि पूजयामि ।

इत्यावाह्य अर्घ्याद्युपचारैः सम्पूज्य अञ्जलिं बध्वा प्रार्थयेत् -

**ॐ विघातं विघ्नानां विदधति गजास्य प्रभृतयः**
**सदस्या गीर्वाणप्रवरप्रणुता यस्य शततम् ।**
**रमाभर्तुः सेवा प्रणयनपरो यश्च नितरां**
**स विष्वक्सेनो मे वितरतु मनोवाञ्छितमदः ॥**
**ॐ यस्य द्विरदवक्त्राद्याः शासने स्थिरवृत्तयः ।**
**स मे वैकुण्ठसेनानीर्भूयात् सर्वत्र विघ्नहा ॥**
**विदधतु सुखं विष्वक्सेनस्य ते प्रथमे भटाः**
**गजमुखजयत्सेनौ कालाह्वसिंहमुखौ च नः ।**
**जगति भजतां तत्तत्प्रत्यूहतूलदवानलाः**
**दिशि दिशि दिवारात्रं श्रीयज्ञपालनतत्पराः ॥**

इति विष्वक्सेनं सूत्रवत्या पार्षदैश्च सहितं सम्पूज्य प्रणमेत् ।

## रक्षाकङ्कणपूजनम्

रक्षाकङ्कणं दूर्वासर्षपचन्दनादिसहितं पुटकादौ निधाय तत्पुटकं पूर्णकुम्भसमीपं निधाय पात्रं पुटकं वा स्पृशन् नारायणकवचं पठेत् -

**ॐ पूर्वे रक्षतु गोविन्द आग्नेय्यां धरणीधरः ।**
**याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते ॥**
**वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः ।**
**उत्तरे श्रीधरो रक्षेदैशान्यां तु गदाधरः ॥**
**ऊर्ध्वं गोवर्धनो रक्षेदधस्तात्तु त्रिविक्रमः ।**
**एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ॥**
**यज्ञाग्रं रक्षताच्छंखः पृष्टे वै पद्ममुत्तमम् ।**
**वामपार्श्वे गदा रक्षेद्दक्षिणे च सुदर्शनः ॥**
**उपेन्द्रः पातु ब्रह्माणमाचार्यं पातु वामनः ।**
**ऋग्वेदमच्युतो रक्षेद्यजुर्वेदमथोत्तमः ॥**
**कृष्णो रक्षतु सामानमथर्वाणञ्च माधवः ।**
**उपविष्टाँश्च यान् विप्रान् तान् हृषीकेश रक्षतु ॥**
**यजमानं सपत्नीकं पुण्डरीकाक्ष रक्षतु ।**
**रक्षाहीनं च यत्स्थानं तत्सर्वं रक्षताद्धरिः ॥**

ततो गन्धादिभिर्वक्ष्यमाणमन्त्रैः पूजयेत् -

**ॐ रक्षोहणं व्वलगहनं वैष्णवीमिदमहन्तं बलगमुत्किरामि यम्मे निष्ट्यो यममात्यो निचखानेदमहन्तं व्वलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तं व्वलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं व्वलगमुत्किरामि यम्मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥**

ॐ स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्व्वराडस्य मित्रहा ॥

ॐ रक्षोहणो वो व्वलगहनः प्प्रोक्षामि व्वैष्णवान् रक्षोहणो वो व्वलगहनो वनयामि व्वैष्णवान् रक्षोहणो व्वलगहनो व्वस्तृणामि व्वैष्णवान् रक्षोहणौ वां व्वलगहनाऽउपदधामि व्वैष्णवी रक्षोहणौ वां व्वलगहनौ पर्य्यूहामि व्वैष्णवी व्वैष्णवमसि व्वैष्णवास्त्थ ।

ॐ सप्तऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतोलोमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ ॥

इति पूजनं कृत्वा वामहस्ते रक्षाकङ्कणं निधाय दक्षिणहस्तेन पिधाय प्रतिसरसूक्तेन अभिमन्त्रयेत् –

ॐ कृणुष्वपाजः प्रसितिन्नपृथ्वीं याहि राजेवामवाँ२ऽइभेन । तृष्वीमनुप्प्रसितिन्द्रूणानोरत्तासिव्विद्ध्यरक्षसस्तपिष्ठैः ॥

तव ब्भ्रमासऽआशुयापतन्त्यनुस्पृशधृषताशोशुचानः । तपू ँष्यग्ने जुह्वा पतङ्गान सन्दितो व्विसृजविष्वगुल्काः ॥

प्रतिस्प्पशो विसृजतूर्णितमो भवापायुर्व्विशोऽअस्याऽअदब्धः । यो नोदूरेऽअघस ँ सो योऽअन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥

उदग्ने तिष्ठप्प्रत्त्यातनुष्वन्न्यमित्राँ२ऽओषतात्तिग्ग्म हेते ।

योनोऽअरातिँ समिधानचक्क्रे नीचातन्धक्ष्यतसन्नशुष्कम् ॥

ऊद्ध्र्वोभवप्प्रति विद्ध्यस्मदाविष्कृणुष्वदैव्व्यान्यग्ने । अवस्थिरा तनुहि यातुजूनाञ्जामिमजामिप्प्रमृणीहि शत्रून् । अग्ने ष्ट्वा तेजसासादयामि ॥

**ॐ अग्निमूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम्।**
**अपा ँ रेता ँ सिजिन्वति। इन्द्रस्य त्त्वौजसा सादयामि॥**

ततो पूगीफलवस्त्रद्रव्याभरणादिकमादाय सोर्ध्वपुण्ड्रः सन् पूर्वाभिमुखो भूत्वा प्रत्यङ्मुखान् सोर्ध्वपुण्ड्रान् ब्राह्मणान् आचार्यान् चोपावेश्य वरणं कुर्यात्॥

## ब्राह्मणवरणम्

वस्त्रभूषणमाल्यद्रव्यादीनि सम्पाद्य सङ्कल्पपूर्वकम् आचार्यसहितान् ब्राह्मणान् सम्पूज्य वृणुयात् –

**ॐ अद्य पूर्वोच्चारितसंकल्पसिद्धिरस्तु अमुकगोत्रोत्पन्नः अमुक–नामाहं भगवदाज्ञया भगवतो वीर्येण भगवतो बलेन भगवत्–कैङ्कर्यरूपेण श्रीमदाचार्यहस्तेन भगवन्मुखोल्लासार्थं क्रियमाणवैकुण्ठोत्सवपूर्वक–नारायणबलिकर्मणिनानानामगोत्रान् नानानामशर्मणः आचार्यान् ब्राह्मणान् च एभिर्द्रव्यैः तत्तत्कर्मकरणार्थमहं वृणे।**

**ततः वेदेतिहासपुराणदिव्यप्रबन्धरहस्यादिग्रन्थान् सम्पूज्य पारायणमारभेत। ततः आग्नेयदिशि एकं कलशं संस्थाप्य तत्र कूर्चे भगवन्तं सुदर्शनम् आवाह्य पूजयेत् –**

**ॐ नमो भगवते सुदर्शनाय सहस्रार हुँ फट्**

**इत्यावाह्य अर्घ्यपाद्याचमनगन्धादिभिः यथोपचारैः सम्पूज्य प्रणम्य पुण्याहवाचनं कुर्यात्।**

## अथ पुण्याहवाचनम्

चतुरो ब्राह्मणान् दर्भहस्तान् पुरत उपवेश्य अर्चयेत् –

यजमानः – **पुष्पाणि पान्तु,** विप्राः – **सौमनस्यम् अस्तु।**
यजमानः – **अक्षताः पान्तु,** विप्राः – **अरिष्टमक्षतं चास्तु।**

यजमानः – **गन्धाः पान्तु,** विप्राः – **सौमङ्गल्यम् अस्तु।**

यजमानः – **सफलताम्बूलं पान्तु,** विप्राः – **ऐश्वर्यम् अस्तु।**

यजमानः – **दक्षिणाः पान्तु,** विप्राः – **बहुदेयञ्चास्तु।**

**यजमान : – भवद्भिरनुज्ञातः पुण्याहं वाचयिष्ये।**

विप्राः – **वाच्यताम्।**

ततः हस्ते हिरण्याक्षतोदकमादाय पूर्वोक्तप्रकारेण –

**ॐ देशकालादीन् सङ्कीर्त्य भगवदाज्ञया भगवत्प्रीत्यर्थं यागोपकरण–गृहशरीरादिशुद्ध्यर्थं पुण्याहवाचनम् अहं करिष्ये।**

इति सङ्कल्प्य जानुनी भूमौ निपात्य अञ्जलिं बद्ध्वा प्रार्थयेत् –

यजमानः – **व्रत–जप–तपः–स्वाध्याय–क्रतु–दया–दान–दम–नियम–सम्पन्नानां तत्रभवतां ब्राह्मणानां मनः समाधीयताम्।**

विप्राः – **समाहितमनसः स्मः।**

यजमानः – **प्रसीदन्तु भवन्तः।**

विप्राः – **प्रसन्नाः स्मः।**

यजमानः – **भवद्भिरनुज्ञातः पुण्याहं वाचयिष्ये।**

विप्राः – **वाच्यताम्।**

तत उदककुम्भं दक्षिणजानून्याधाय सव्यहस्ते निधाय दक्षिणहस्तेन पिधाय प्रार्थयेत् –

यजमानः – **भो ब्राह्मणाः, अस्य श्रीवैकुण्ठोत्सवपूर्वकनारायणबलि–कर्मणः पुण्याहं भवन्तो ब्रुवन्तु।**

विप्राः – **ॐ पुण्याहम् अस्तु ३ ।**

**ॐ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणोवसुनीतयज्ञैः घृतेनत्त्वंतन्वं वर्धयस्वसत्याः सन्तु यजमानस्यकामाः॥**

यजमानः - भो ब्राह्मणाः, अस्य श्रीवैकुण्ठोत्सवपूर्वकनारायणबलि-कर्मणः स्वस्ति भवन्तो ब्रुवन्तु।

विप्राः - ॐ स्वस्त्यस्तु ३।

ॐ स्वस्तिनऽइन्द्रो वृद्धश्श्रवाः स्वस्तिनः पूषा विश्ववेदाः। स्वस्तिनस्ताक्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु।

यजमानः - भो ब्राह्मणाः, अस्य श्रीवैकुण्ठोत्सवपूर्वकनारायणबलि-कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु।

विप्राः - ॐ ऋद्धिरस्तु ३।

ॐ ऋद्ध्यामस्तोमं सनुयाम वाजमानो मन्त्रं सरथे होपयाताम् यशोनपक्वं मधुगोष्वन्तरा भूतांशोऽअश्विनो कामप्राः॥

एकस्मिन् पुटके कुशकूर्चेन पुण्याहकलशस्य जलं निषिञ्चन्तः सर्वे ब्रूयुः।

ॐ शान्तिरस्तु ३। ॐ पुष्टिरस्तु ३। ॐ तुष्टिरस्तु ३।
ॐ ऋद्धिरस्तु ३। ॐ अविघ्नमस्तु ३। ॐ आयुष्यमस्तु ३।
ॐ आरोग्यमस्तु ३। ॐ धनधान्यसमृद्धिरस्तु ३।
ॐ गोब्राह्मणेभ्यः शुभं भवतु।

ऐशान्यां बहिर्देशे - अरिष्टनिरसनमस्तु।

आग्नेय्याम् - यत्पापं तत्प्रतिहतमस्तु।

(पुनः पुटके)

सर्वाः सम्पदः सन्तु। शुभानि वर्धन्ताम्। ॐ शान्तिः शान्तिः शान्तिः॥
ॐ भूर्भुवः स्वरोम् इत्युक्त्वा पुटकजलं पुनः पुण्याहकलशे क्षिपेत्।

ततः कुशहस्तैः चतुर्भिः ब्राह्मणैः सह पुण्याहकलशम् अभिमन्त्रयेत्। प्रथमं वरुणसूक्तपवमानसूक्ताभ्याम् अभिमन्त्र्य पाञ्चरात्रागममन्त्रैरभिमन्त्रयेत्॥

## वरुणसूक्तम्

ॐ हिरण्यवर्णाःशुचयःपावकायाजातः सवितायास्वग्निः।
याऽअग्निं गर्भन्दधिरेसुवर्णास्तानऽआपः शँस्योना भवन्तु ॥
ॐ यासाँराजावरुणो यातिमध्ये सत्यानृतेऽअवपश्यञ्जनानाम्।
याऽअग्निं गर्भन्दधिरे सुवर्णास्तानऽआपःश ँस्योना भन्वन्तु ॥
ॐ यासान्देवादिवि कृण्वन्ति भक्ष्यं याऽअन्तरिक्षे बहुधा भवन्ति।
याऽअग्निं गर्भन्दधिरेसुवर्णास्तानऽआपः शँस्योना भवन्तु ॥
ॐ शिवेन माचक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचम्मे।
घृतश्च्युतः शुचयो याः पावकास्तान आपः शँस्योना भवन्तु ॥
ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जे दधातन। महेरणायचक्षसे ॥
ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः ॥
ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः ॥
ॐ चित्पतिर्मापुनातु वाक्पतिर्मा पुनातु देवो मा सवितापुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥

ततः पवमानसूक्तेन अभिमन्त्रयेत् –

## पवमानसूक्तम्

ॐ पवमानःसुवर्चनः पवित्रेण विचर्षणिः। यः पोता स पुनातु माम्।
ॐ पुनन्तु मां देवजनाः पुनन्तु वसवो धिया।
विश्वेदेवाः पुनीत मा जातवेदः पुनीहि माम् ॥
ॐ पावमानीः स्वस्त्ययनीः सुदुघाहि घृतश्च्युतः।
ऋषिभिः सम्भृतो रसो ब्राह्मणेष्वमृतँहितम् ॥

पावमानीर्दिशन्तुनऽइमं लोकमथोऽअमुम्।
कामान्समर्धयन्तु नो देवीर्देवैः समाहिता॥
येन देवाः पवित्रेण आत्मानं पुनते सदा।
तेन सहस्रधारेण पावमान्यः पुनन्तु माम्॥
प्राजापत्यं पवित्रं शतोद्यामँहिरण्मयम्।
तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे ॥
इन्द्रः पुनीतिः सहमा पुनातु सोमः स्वस्त्या वरुणः समीच्या।
यमो राजा प्रमृणाभिः पुनातु मा जातवेदामोर्जयन्त्या पुनातु॥
यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किञ्चिदन्यत्।
जातस्य यश्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि॥
ब्रह्मवधात् सुरापानात् स्वर्णस्तेयाद् वृषलीमैथुनसङ्गमात्।
गुरोर्दाराधिगमाच्च तत्पावमानीभिरहं पुनामि॥
दुर्यष्टं दुरधीतं पापं यच्चाज्ञानकृता कृतम्।
अयाजिताश्च संयाज्यास्तत्पावमानीभिरहं पुनामि॥
पावमानीः स्वस्त्ययनीर्याभिर्गच्छन्ति नान्दनम्।
पुण्याँश्च भक्ष्याभक्षयत्यमृतत्वञ्च गच्छति॥
पावमानीः पितृन्देवान्ध्यायेद्यश्च सरस्वतीम्।
पितृँस्तस्योपवर्तेत क्षीरं सर्पिर्मधूदकम्॥
पावमानं परं ब्रह्म शुक्रज्ज्योतिः सनातनम्।
ऋषीँस्तस्योपतिष्ठेत क्षीरं सर्पिर्मधूदकम्॥
पावमानं परं ब्रह्म ये पठन्ति मनीषिणः।
सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः॥

पाञ्चरात्रागममन्त्रैरभिमन्त्रयेत् -

## पाञ्चरात्रागममन्त्राः

ॐ दर्भैः स्पृशन्तु कलशं ब्राह्मणैः सह देशिकाः ।
ततश्च शुद्धिमन्त्राँस्तु पठेदेवं समाहितः ॥ १ ॥
शुद्धयेऽस्तु परो देवो वासुदेवोऽस्तु शुद्धये ।
सङ्कर्षणः शुद्धयेऽस्तु प्रद्युम्नश्चास्तु शुद्धये ॥ २ ॥
शुद्धयेऽस्त्वनिरुद्धोऽपि केशवश्चास्तु शुद्धये ।
नारायणोऽस्तु विश्वेशश्शुद्धये सर्वकर्मणाम् ॥ ३ ॥
शुद्धये माधवश्चास्तु सर्वलोकहिते रतः।
गोविन्दः शुद्धयेचास्तु परमात्मा सनातनः ॥ ४ ॥
शुद्धये विष्णुरस्त्वद्य शुद्धये मधुसूदनः ।
सर्वलोकहितो देवः शुद्धयेऽस्तु त्रिविक्रमः ॥ ५ ॥
वामनः शुद्धयेचास्तु श्रीधरोऽद्यास्तु शुद्धये ।
शुद्धयेऽस्तु हृषीकेशः पद्मनाभोऽस्तु शुद्धये ॥ ६ ॥
सदा दामोदरो देवः शुद्धयेऽस्तु जगत्पतिः ।
शुद्धये पद्मनाभोऽस्तु शुद्धयेऽस्तु सदा ध्रुवः ॥ ७ ॥
अनन्तः शुद्धये चास्तु शक्त्यात्मा चास्तु शुद्धये ।
सर्वकर्मसु चैवास्तु शुद्धये मधुसूदनः ॥ ८ ॥
सदा विद्याधिदेवोऽस्तु शुद्धये कपिलस्तथा ।
शुद्धये विश्वरूपोऽस्तु शुद्धयेऽस्तु विहङ्गमः ॥ ९ ॥
क्रोडात्मा शुद्धयेश्चास्तु शुद्धये बडवानलः ।
शुद्धयेऽस्तु सदा धर्मश्चास्तु वागीश्वरस्तथा ॥ १० ॥
देव एकार्णवशयः शुद्धयेऽस्तु निरन्तरम् ।
शुद्धयेऽस्तु सदा देवः कूर्मः पातालधारकः ॥ ११ ॥
वाराहः शुद्धयेचास्तु नारसिंहोऽस्तु शुद्धये ।
अमृताहरणश्चास्तु शुद्धये सर्वकर्मणाम् ॥ १२ ॥

श्रीपतिः शुद्धये चास्तु शान्तात्मा चास्तु शुद्धये।
शुद्धये राहुजिच्चास्तु कालनेमिघ्न एव च ॥ १३ ॥
पारिजातहरश्चास्तु वामनश्चास्तु शुद्धये।
सर्वत्र शुद्धयेचास्तु दत्तात्रेयो महाप्रभुः ॥ १४ ॥
न्यग्रोधशायी भगवान् शुद्धये चास्तु सर्वदा।
एकश्रृङ्गतनुश्चास्तु वामनश्चास्तु शुद्धये ॥ १५ ॥
त्रिविक्रमः शुद्धयेऽस्तु शुद्धयेऽस्तु नरस्सदा।
नारायणः शुद्धयेऽस्तु हरिःकृष्णश्च शुद्धये ॥ १६ ॥
ज्वलत्परशुधृग्रामः शुद्धयेऽस्तु धनुर्धरः।
रामश्च शुद्धये चास्तु वेदविद्भगवाँस्तथा ॥ १७ ॥
शुद्धयेऽस्तु सदा कल्की सर्वदोषक्षयङ्करः।
शुद्धयेऽस्तु सदा देवः पातालशयनः प्रभुः ॥ १८ ॥
शुद्धये सन्तु सर्वेषां सर्वे सर्वत्र सर्वदा।
एते सर्वे सदा देवाः शान्तये सन्तु पूजिताः ॥ १९ ॥
ऋद्धये पुष्टये सन्तु सिद्धये भक्तयेऽपि च।
शिवाय मुक्तये सन्तु वृद्धये सर्वकर्मणाम् ॥ २० ॥
मन्त्राणां देशिकानाञ्च स्थानानामपि सर्वदा।
पुत्रमित्रकलत्राणां दासीदासगवामपि ॥ २१ ॥
वेदशास्त्रागमादीनां व्रतानामिष्टसम्पदाम्।
मनोरथानां सर्वेषां हितानां सन्तु सर्वदा ॥ २२ ॥
आयुरारोग्यमेधानां धनधान्यादिसम्पदाम्।
पुण्यानामणिमादीनां गुणानां श्रेयसामपि ॥ २३ ॥
राज्ञो जनपदस्यापि यजमानस्य मन्त्रिणाम्।
वैष्णवानां विशेषेण परत्र हितमिच्छताम् ॥ २४ ॥

पञ्चकालविशुद्धानां सत्वस्थानां शुभात्मनाम्।
स्वस्त्यस्तु च शिवञ्चास्तु शुभञ्चास्तु पुनः पुनः ॥ २५ ॥
अविघ्नमनिशञ्चास्तु दीर्घमायुष्यमस्तु वै।
समाहितमनश्चास्तु सम्पदश्चोत्तरोत्तरम् ॥ २६ ॥
पुण्याहं शुद्धये चास्तु वासुदेवादिमूर्तयः।
शङ्खचक्रगदापद्मयुक्तः सर्वेश्वरेश्वरः ॥ २७ ॥
प्रीयतां भगवान्देवो लाङ्गली प्रीयतां सदा।
प्रद्युम्नः प्रीयतां नित्यमनिरुद्धः सुरेश्वरः ॥ २८ ॥
नारायणः सुरेशोऽपि कर्मणां पूरणाय च।
न्यूनाधिकानां शान्त्यर्थम् प्रीयतां प्रीयतां विभुः ॥
पुण्याहं स्वस्ति ऋद्धिञ्च संवाच्य सहितो द्विजैः।
आत्मानं प्रोक्षयेत् पश्चाद्यागोपकरणानि च ॥
येन देवा पवित्रेणेत्यादिमन्त्रान् पठन् गुरुः।
एवं सर्वेषु यागेषु कुर्यात् पुण्याहवाचनम् ॥

इति पुण्याहं वाचयित्वातज्जलेन आम्रपल्लवयुक्तेन कुशकूर्चेन आत्मानं यागोपकरणानि गृहादिकञ्च घण्टावादनपूर्वकं वक्ष्यमाणमन्त्रेण प्रोक्षयित्वा वास्तुसूक्तेन प्रोक्षयेत् –

ॐ येन देवाः पवित्रेण आत्मानं पुनते सदा।
तेन सहस्रधारेण पावमान्यः पुनन्तु माम्।

## अथ वास्तुसूक्तम्

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशोऽअनमीवो भवानः।
यत्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे ॥
ॐ वास्तोष्पते प्रतरणोनऽएधि गयस्फानो गोभिरश्वेभिरिन्दो।
अजरासस्ते सख्येस्याम पितेव पुत्रान्प्रतितन्नो जुषस्व ॥

ॐ वास्तोष्पते शग्मया संसदाते सक्षीमहिरण्मया गातुमत्या।
पाहि क्षेमऽउतयोगेवरन्नो यूयं पात स्वस्तिभिः सदानः॥
ॐ अमीवहावास्तोष्पते विश्वारूपाण्याविशन्।
सखा सुसेवऽएधिनः शन्नो भव द्विपदे शञ्चतुष्पदे।
इति मन्त्रैः सर्वतः प्रोक्षयित्वा भगवत आराधनां कुर्यात्।

## अथ आराधना

गुरुपरम्परानुसन्धानपूर्वकं सेवाप्रारम्भं कुर्यात् -
लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम्।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥
संसारसिन्धोस्तरणैकहेतून्दधे गुरून्मूर्ध्नि हरिस्वरूपान्।
रजांसि येषां पदपङ्कजानां तीर्थाभिषेकश्रियमावहन्ति॥
स्वशेषभूतेन मया स्वीयैः सर्वपरिच्छदैः।
विधातुं प्रीतमात्मानं देवः प्रक्रमते स्वयम्॥
कूर्मादीन्दिव्यलोकाँस्तदनुमणिमयं मण्डपं तत्र शेषं
तस्मिन् धर्मादिपीठं तदुपरिकमलं चामरग्राहिणीश्च।
विष्णुं देवीविभूषायुधगणमुरगं पादुके वैनतेयं
सेनेशं द्वारपालान् कुमुदमुखगणान् विष्णुभक्तान् प्रपद्ये॥

## संहारन्यासः

लाॐ ं नमः पराय सर्वात्मने नारायणाय नमः। इति पादयोर्न्यसेत्।
ॐ वां नमः पराय निवृत्यात्मने अनिरुद्धाय नमः। इति उपस्थे न्यसेत्।
र ॐ ां नमः पराय विश्वात्मने प्रद्युम्नाय नमः। इति हृदये न्यसेत्।
य ॐ ां नमः पराय पुरुषात्मने सङ्कर्षणाय नमः। इति नासाग्रे न्यसेत्।
ॐ षां नमः पराय परमेष्ठ्यात्मने वासुदेवाय नमः। इति मूर्ध्नि न्यसेत्।

## सृष्टिन्यासः

ॐ षां नमः पराय परमेष्ठ्यात्मने वासुदेवाय नमः । इति मूर्ध्नि न्यसेत् ।

ॐ यां नमः पराय पुरुषात्मने सङ्कर्षणाय नमः । इति नासाग्रे न्यसेत् ॥

ॐ रां नमः पराय विश्वात्मने प्रद्युम्नाय नमः । इति हृदये न्यसेत् ।

ॐ वां नमः पराय निवृत्यात्मने अनिरुद्धाय नमः । इति उपस्थे न्यसेत् ।

ॐ लां नमः पराय सर्वात्मने नारायणाय नमः । इति पादयोर्न्यसेत् ।

## सशक्तिकचतुर्व्यूहाराधनविधिः

१. हरिणीसहितवासुदेव-आवाहनम् -

**आवाहयाम्यहं देवं वासुदेवं जगत्पतिम् ।**
**अमृताध्मातमेघाभं विद्युत्सदृशवाससम् ॥**
**एह्येहि पुण्डरीकाक्ष शरणागतवत्सल ।**
**सर्वकामप्रदाचिन्त्य सर्वशक्तिबलान्वित ॥**

**ॐ हरिणीसहिताय वासुदेवाय नमः, हरिणीसहितं वासुदेवम् आवाहयामि स्थापयामि पूजयामि ।**

२. हिरण्यासहितसङ्कर्षण-आवाहनम् -

**आवाहयाम्यहं देवं सङ्कर्षणमनामयम् ।**
**शशाङ्कशतसङ्काशं सजलाम्बुदवाससम् ॥**
**एहि सङ्कर्षणाचिन्त्य देव भक्तजनप्रिय ।**
**वाङ्मनःकायसम्भूतमलत्रितयनाशन ॥**

**ॐ हिरण्यासहिताय सङ्कर्षणाय नमः, हिरण्यासहितं सङ्कर्षणम् आवाहयामि स्थापयामि पूजयामि ।**

३. सत्यासहितप्रद्युम्न-आवाहनम् -

**देवमावाहयाम्यद्य प्रद्युम्नमपराजितम् ।**
**दुर्वाङ्कुरदलश्यामं शशाङ्कांशुसमाम्बरम् ॥**
**काम कामप्रद शान्त कमनीयगुणालय ।**
**प्रद्युम्नाभ्येहि देवेश प्रद्योतित चराचर ॥**

**ॐ सत्यासहिताय प्रद्युम्नाय नमः, सत्यासहितं प्रद्युम्नम् आवाहयामि स्थापयामि पूजयामि ।**

४. नित्यानन्दासहित-अनिरुद्ध-आवाहनम् -

**आवाहयाम्यहं देवमनिरुद्धं जगद्गुरुम् ।**
**पद्मपत्राग्रसङ्काशं रक्ताम्बरविभूषणम् ॥**
**अनिरुद्धत्वमभ्येहि व्याप्ताशेषचराचर ।**
**सर्वेषां प्राणिनां कर्मसाक्षिभूत परात्पर ॥**

**ॐ नित्यानन्दासहितायानिरुद्धाय नमः, नित्यानन्दासहितम् अनिरुद्धम् आवाहयामि स्थापयामि पूजयामि ।**

सर्वेषां ध्यानम् -

**सर्वे चतुर्भुजा ध्येयाः शङ्खचक्रगदाधराः ।**
**किरीटकौस्तुभधरा वैनतेयासने स्थिताः ॥**
**प्रोद्यता इव चोद्धर्तुं प्राणिवृन्दं सनातनम् ॥**
**आवाहयित्वा सर्वेषां पूजां कुर्यात् विधानतः ॥**

इत्यावाह्यअर्घ्यपाद्यादिभिः सर्वोपचारैः सम्पूज्य प्रणमेत् ॥

ततः प्रथमं बलमन्त्रः अनुसन्धेयः ।

बलमन्त्रः -

**भगवतो बलेन, भगवतो वीर्येण, भगवतस्तेजसा, भगवतः कर्म करिष्यामि । भगवानेव स्वनियाम्यस्वरूपस्थिति-**

प्रवृत्तिस्वशेषतैकरसेन मया स्वकीयैश्च उपकरणैः स्वाराधनैक-प्रयोजनाय परमपुरुषः सर्वशेषी सर्वेश्वरः स्वयमेव स्वशेषभूतम् इमम् अमुकनामाख्यां स्वसमाराधनां कारयति ॥

## भगवदाराधनाविधिः

आवाहनम् -

**ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे।**
**सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥**
**ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्।**
**सभूमिꣳसर्व्वतस्पृत्वात्त्यतिष्ठद्दशाङ्गुलम् ॥**
**आवाहयाम्यमरवृन्दनताङ्घ्रियुग्मं**
**लक्ष्मीपतिं भुवनकारणमप्रमयेम्।**
**आद्यं सनातनतनुं प्रणवासनस्थं**
**पूर्णेन्दुभास्करहुताशसहस्रदीप्तिम् ॥**

श्रीमन्नारायणम् आवाहयामि।

आसनम् -

**ॐ पुरुषऽएवेद ꣳसर्वंय्यद्भूतंय्यच्च्व भाव्यम्।**
**उतामृतत्त्वस्येशानो यदन्नेनातिरोहति ॥**
**सद्रत्नजाम्बूनदनिर्मितं विभो वरासनं सर्ववरप्रदायते।**
**समर्पये सर्वजगन्निवासिने सुनिर्मलज्ञानघनप्रदायिने ॥**
**श्रीमते नारायणाय नमः आसनं समर्पयामि।**

अथ भगवतो दिव्यमङ्गलविग्रहे न्यासान् कुर्यात् -

| मन्त्रः | न्यासः |
| --- | --- |
| **सहस्रशीर्षा०** | **भगवतो वामकरे** |
| **पुरुष एवेद०** | **भगवतो दक्षिणकरे** |

| | |
|---|---|
| एतावानस्य० | भगवतो वामचरणे |
| त्रिपादूर्ध्व० | भगवतो दक्षिणचरणे |
| ततोविराट्० | भगवतो वामजानुनि |
| तस्माद्यज्ञात्० | भगवतो दक्षिणजानुनि |
| तस्माद्यज्ञात्० | भगवतो वामकट्याम् |
| तस्मादश्वा० | भगवतो दक्षिणकट्याम् |
| तं यज्ञं बर्हिषि० | भगवतो नाभौ |
| तत्पुरुषं व्यदधुः० | भगवतो हृदये |
| ब्राह्मणोऽस्य० | भगवतो वामकक्षे |
| चन्द्रमा० | भगवतो दक्षिणकक्षे |
| नाभ्याऽआसीत्० | भगवतः कण्ठे |
| यत्पुरुषेण० | भगवतो मुखारविन्दे |
| सप्तास्यासन्० | भगवतो नेत्रयोः |
| यज्ञेन यज्ञम् | भगवतो मस्तके |

अर्घ्यम् -

ॐ एतावानस्य महिमातोज्ज्यायाँश्च पूरुषः।
पादोऽस्य व्विश्वाभूतानि त्रिपादस्यामृतन्दिवि ॥
यः सर्वलोकस्यसमाश्रयश्च पूज्यश्च मान्यश्च दिवौकसामपि।
गृह्णातु सोऽर्घ्यं परिपूर्णकामःप्रसीदतां ब्रह्ममहाविभूतिः ॥
श्रीमते नारायणाय नमः अर्घ्यं समर्पयामि।

पाद्यम् -

ॐ त्रिपादूर्ध्वमुदैत्पुरुषः पादोस्येहाभवत्पुनः।
ततो व्विष्वङ्व्यक्क्रामत्साशनानशनेऽअभिः ॥

**यो राजते यज्ञपतिश्च यज्ञे सर्वस्य लोकस्य शरण्यभूतः।**
**यज्ञेश्वरो यज्ञवपुश्च विष्णुः पाद्यं प्रगृह्णातु स वासुदेवः॥**
**श्रीमते नारायणाय नमः पाद्यं समर्पयामि।**

आचमनीयम् –

**ॐ ततो विराडजायतविराजोऽअधिपूरुषः।**
**सजातोऽअत्यरिच्यतपश्चाद्भूमिमथो पुरः॥**
**योऽसौ भवान्सर्वजगत्प्रधानो यस्य प्रसादेन भवन्ति लोकाः।**
**सत्वं कुरुष्वाचमनं वरेण्य भव प्रसन्नो मयि दीननाथ॥**
**श्रीमते नारायणाय नमः आचमनीयं जलं समर्पयामि ।**

स्नानीयम् –

**ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्यम्।**
**पशूँस्ताँश्चक्रे व्वायव्यानारण्याग्राम्याश्च ये॥**
**समाहृतैः स्वर्णघटैश्च स्वच्छैः स्वर्लोकस्रोतस्विनिदिव्यतीर्थैः।**
**स्नानं कुरुष्वाच्युतदिव्यमूर्ते देवाग्रजानां निधनप्रदायिन्॥**
**श्रीमते नारायणाय नमः स्नानीयं जलं समर्पयामि।**

ततः पञ्चामृतस्नानं कुर्यात्।

दुग्धस्नानम् –

**ॐ सन्तेपयाꣳसि समुयन्तुवाजाः सम्वृष्ण्यान्यभिमातिषाहः।**
**आप्यायमानोऽअमृताय सोमदिविश्रवा ꣳस्युत्तमानिधिष्व॥**
**श्रीमते नारायणाय नमः, दुग्धस्नानं समर्पयामि।**

शुद्धोदकस्नानम् –

ॐ इतोन्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना।
शुद्धैरुक्थैवावृधासंशुध्या आशीर्वान्ममत्तु॥
श्रीमते नारायणाय नमः, शुद्धोदकस्नानं समर्पयामि॥

दधिस्नानम् –

ॐ दधिक्राब्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः।
सुरभिनो मुखाकरत्प्रणऽआयूꣳषितारिषत्॥
श्रीमते नारायणाय नमः, दधिस्नानं समर्पयामि।
दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि।

घृतस्नानम् –

ॐ तेजः पशूनां हविरिन्द्रियावत्परिश्रुता पयसा सारघं मधु।
अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुता सुताभ्याममृतसोम इन्दुः॥
श्रीमते नारायणाय नमः, घृतस्नानं समर्पयामि।
घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि।

मधुस्नानम् –

ॐ मधुव्वाताऽऋतायते मधुक्षरन्तिसिन्धवः माध्वीर्नः सन्त्वोषधीः।
ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः। मधुद्यौरस्तुनः पिता॥
ॐ मधुमान्नोवनस्पतिर्मधुमाँ२अस्तुसूर्यः। माध्वीर्गावो भवन्तु नः॥
श्रीमते नारायणाय नमः, मधुस्नानं समर्पयामि।
मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि।

शर्करास्नानम् -

ॐ ताःशर्कराऽअभवंस्तच्छर्कराणां शर्करात्वं वज्रो वै।
पशुरग्निऽर्यच्छर्कराभिरग्निम्।
परिमृणोति वज्रेणैवास्मिन्पशून्परिदधाति॥
ॐ श्रीमते नारायणाय नमः, शर्करास्नानं समर्पयामि।
शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि॥

वस्त्रम् -

ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे।
छन्दाॆसिजज्ञिरेतस्माद्यजुस्तस्मादजायत॥
शुद्धस्त्वमात्मा पुरुषः पुराणो जगत्सुतत्वं सुरलोकनाथ।
वस्त्राणि गृह्णीष्व मयार्पितानि दूकूलकौशेयसुपट्टकानि॥
ॐ श्रीमते नारायणाय नमः, वस्त्राणि समर्पयामि।

यज्ञोपवीतम् -

ॐ तस्मादश्वाऽअजायन्त ये के चोभयादतः।
गावो ह जज्ञिरेतस्मात्तस्माज्जाताऽअजावयः॥
कार्पासतन्तूद्भवब्रह्मसूत्रं सूत्रात्मनेसर्वचराचरस्य।
समर्पये सात्वतपुङ्गवाय तेजःस्वरूपायसुखप्रदाय॥
ॐ श्रीमते नारायणाय नमः, यज्ञोपवीतं समर्पयामि।

ऊर्ध्वपुण्ड्रम् -

ॐ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः।
तेन देवाऽअयजन्त साध्याऽऋषयश्चये॥
ॐ श्रीमते नारायणाय नमः, ऊर्ध्वपुण्ड्रं समर्पयामि।

श्रीचन्दनम् –

आनन्दनो यः सुमतां परात्मा तापत्रयस्योपशमश्चयस्मात्।
तस्मै प्रयच्छामि सुचन्दनं वै काश्मीरकर्पूरविभावितं च॥
ॐ श्रीमते नारायणाय नमः,श्रीचन्दनं समर्पयामि।

पुष्पमाला –

ॐ यत्पुरुषं व्यदधुः कतिधाव्यकल्पयन्।
मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते॥
यः सर्वगन्धोऽखिलविश्वरूपस्तस्मै प्रसूनानि समर्पयामि।
कदम्बजातीवकुलोद्भवानि कुशेशयश्रीतुलसीदलानि॥
ॐ श्रीमते नारायणाय नमः, पुष्पाणि समर्पयामि।

धूपः –

ॐ ब्राह्मणोस्य मुखमासीद्बाहूराजन्यः कृतः।
ऊरूतदस्य यद्वैश्यः पद्भ्याँशूद्रोऽअजायत॥
धूपं दशाङ्गं शुभगन्धकञ्च गोसर्पिषाक्तं हृदयप्रियञ्च।
समर्पये दिव्यनभास्पदाय क्षीराब्धिजासेवितसत्पदाय॥
ॐ श्रीमतेनारायणाय नमः, दशाङ्गधूपं समर्पयामि।

दीपः –

ॐ चन्द्रमा मनसोजातश्चक्षोः सूर्योऽअजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥
आदित्यचन्द्राग्निप्रकाशकाय वै सदा चिदानन्दमयाव्ययाय च।
स्वाज्येन युक्तं शुभवर्त्तिभूषितं दीपम्प्रयच्छामि तमःप्रणाशकम्॥
ॐ श्रीमते नारायणाय नमः, दीपं दर्शयामि ।

ततः घृतदधिमधुकर्पूरान्वितं मधुपर्कं भगवते निवेदयेत् -
यौऽसौभवांस्तिष्ठति सर्वदेहे नारायणः सर्वजगत्प्रधानः ।
गृहाणचैवं सुरलोकनाथ भक्तोपनीतं मधुपर्कसंज्ञम् ॥
श्रीमते नारायणाय नमः, मधुपर्कं समर्पयामि ।

नैवेद्यम्-
ॐ नाभ्याऽआसीदन्तरिक्ष ँ शीर्ष्णोद्यौः समवर्तत ।
पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथालोकाँ३ऽअकल्पयन् ॥
द्विजस्त्रीणां भक्ते मृदुनि विदुरान्ने व्रजगवां
दधिक्षीरे सख्युः स्फुटचिपिटमुष्टौ मुररिपो ।
यशोदायास्तन्ये व्रजयुवतिदत्ते मधुनि ते
यथासीदामोदस्तमयमुपहारेऽपि कुरुताम् ॥
ॐ श्रीमते नारायणाय नमः, नैवेद्यं निवेदयामि ।

ताम्बूलम् -
ॐ यत्पुरुषेण हविषा देवायज्ञमतन्वत ।
वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मः शरद्धविः ॥
एलादिपूगीफलचन्द्रसंयुतं प्रशस्तदेशोद्भवसौरभास्पदम् ।
ताम्बूलपत्रं भगवन् समर्पये भवप्रवाहोपरमाय तेऽच्युत ॥
ॐ श्रीमते नारायणाय नमः, ताम्बूलं समर्पयामि ।

नीराजनम् -
ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ।
देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषं पशुम् ॥
सुवर्तिकर्पूरविदीपितेन सुवर्णपात्रे विनियोजितेन ।
नीराजये त्वामहमप्रमेय दिव्येन दीपेन दिवप्रदेन ॥
ॐ श्रीमते नारायणाय नमः, नीराजनं समर्पयामि ।

पुष्पाञ्जलिः -

**ॐयज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्।**
**तेह नाकम्महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः॥**
**ॐ श्रीमते नारायणाय नमः, पुष्पाञ्जलिं समर्पयामि।**

ततः साष्टाङ्गं कृत्वा अर्चनादिकं कुर्यात् -

## मन्त्रपुष्पाञ्जलिः

ॐ तद्विष्णोः परमम्पदꣳसदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवा ꣳसः समिन्धते। विष्णोर्यत्परमम्पदम्। पर्याप्त्यानन्तरायाय सर्वस्तोमोऽतिरारात्रमुत्तममहर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति॥

ॐ शान्तिः, शान्तिः, शान्तिः।

ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्।
ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्।
ॐ सुदर्शनाय विद्महे महाज्वालाय धीमहि। तन्नश्चक्रः प्रचोदयात्।
ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥
ॐ इषेत्वोर्जे त्वा वायवस्थदेवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे॥
अग्नꣳ ऽआयाहि वीतये गृणानोहव्यदातये। निहोतासत्सि बर्हिषि।
ॐशन्नो देवीरभिष्टय आपो भवन्तु पीतये।शंयोरभि स्रवन्तुनः॥
ॐ इत्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणायेत्युपरिष्टात्।
ॐ इत्येकाक्षरं नम इति द्वे अक्षरे नारायणायेति पञ्चाक्षराणि।
एतद्वैनारायणस्याष्टाक्षरं पदम्। यो ह वै नारायणस्याष्टाक्षरं पदमध्येति। अनपब्रुवः सर्वमायुरेति। विन्दते प्राजापत्यं रायस्पोषं गोपत्यम् ततोऽमृतत्वमश्नुते। ततोऽमृतत्वमश्नुत इति य एवं वेद इत्युपनिषत्।

पितरं मातरं दारान् पुत्रान् बन्धून् सखीन् गुरून्।
रत्नानि धनधान्यानि क्षेत्राणि च गृहाणि च ॥
सर्वधर्मांश्च सन्त्यज्य सर्वकामाँश्च साक्षरान्।
लोकविक्रान्तचरणौ शरणं ते व्रजं विभो ॥
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च गुरुस्त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥
पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्।
नत्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभावः ॥
तस्मात्प्रणम्य प्रणिधायकायं प्रसादये त्वामहमीशमीड्यम्।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥

मनोवाक्कायैरनादिकालप्रवृत्तानन्ताकृत्यकरणकृत्याकरण-भगवदपचारभागवतापचारासह्यापचाररूपनानाविधानन्तापचारान् आरब्धकार्यान् अनारब्धकार्यान् कृतान् क्रियमाणान् करिष्यमाणाँश्च सर्वानशेषतः क्षमस्व।

अनादिकालप्रवृत्तं विपरीतज्ञानम् आत्मविषयं कृत्स्नजगद्विषयञ्च विपीरतवृत्तञ्चाशेषविषयम् अद्यापि वर्त्तमानं वर्तिष्यमाणञ्च सर्वं क्षमस्व।

मदीयानादिकर्मप्रवाहप्रवृत्तां भगवत्स्वरूपतिरोधानकरीं विपरीत-ज्ञानजननीं स्वविषयायाश्च भोग्यबुद्धेर्जननीं देहेन्द्रियत्वेन भोग्यत्वेन सूक्ष्मरूपेण चावस्थितां दैवीं गुणमयीं मायां दासभूतः शरणागतोऽस्मि तवास्मि दास इति वक्तारं मां तारय।
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥
उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्।

आस्थितः स हि युक्तात्मा मामेवानुत्तमाङ्गतिम्।
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।
वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः॥
इति श्लोकत्रयोदितज्ञानिनं मां कुरुष्व।
सुगन्धवल्लीशतपत्रजातिसुवर्णचम्पाबकुलोद्भवानि।
गृहाण देवेश मयार्पितानि प्रभो हरे श्रीतुलसीदलानि॥

## केशवादिचतुर्विंशतिनामावलिः

| | | | | | |
|---|---|---|---|---|---|
| १. | ॐ केशवाय | नमः | २. | ॐ नारायणाय | नमः |
| ३. | ॐ माधवाय | नमः | ४. | ॐ गोविन्दाय | नमः |
| ५. | ॐ विष्णवे | नमः | ६. | ॐ मधुसूदनाय | नमः |
| ७. | ॐ त्रिविक्रमाय | नमः | ८. | ॐ वामनाय | नमः |
| ९. | ॐ श्रीधराय | नमः | १०. | ॐ हृषीकेशाय | नमः |
| ११. | ॐ पद्मनाभाय | नमः | १२. | ॐ दामोदराय | नमः |
| १३. | ॐ वासुदेवाय | नमः | १४. | ॐ सङ्कर्षणाय | नमः |
| १५. | ॐ प्रद्युम्नाय | नमः | १६. | ॐ अनिरुद्धाय | नमः |
| १७. | ॐ पुरुषोत्तमाय | नमः | १८. | ॐ अधोक्षजाय | नमः |
| १९. | ॐ नारसिंहाय | नमः | २०. | ॐ अच्युताय | नमः |
| २१. | ॐ जर्नादनाय | नमः | २२. | ॐ उपेन्द्राय | नमः |
| २२. | ॐ हरये | नमः | २४. | ॐ श्रीकृष्णाय | नमः |

## श्रीकृष्णाष्टोत्तरशतनामावलिः

| | | | | | |
|---|---|---|---|---|---|
| १. | ॐ श्रीकृष्णाय | नमः | २. | ॐ कमलानाथाय | नमः |
| ३. | ॐ वासुदेवाय | नमः | ४. | ॐ सनातनाय | नमः |
| ५. | ॐ वसुदेवात्मजाय | नमः | ६. | ॐ पुण्याय | नमः |

| | | | | | |
|---|---|---|---|---|---|
| ७. | ॐ लीलामानुषविग्रहाय | नमः | ८. | ॐ श्रीवत्सकौस्तुभधराय | नमः |
| ९. | ॐ यशोदावत्सलाय | नमः | १०. | ॐ हरये | नमः |
| ११. | ॐ चतुर्भुजात्तचक्रासिगदाशंखाद्युदायुधाय | | | | नमः |
| १२. | ॐ देवकीनन्दनाय | नमः | १३. | ॐ श्रीशाय | नमः |
| १४. | ॐ नन्दगोपप्रियात्मजाय | नमः | १५. | ॐ यमुनावेगसंहारिणे | नमः |
| १६. | ॐ बलभद्रप्रियानुजाय | नमः | १७. | ॐ पूतनाजीवितहराय | नमः |
| १८. | ॐ शकटासुरभञ्जनाय | नमः | १९. | ॐ नन्दव्रजजनानन्दिने | नमः |
| २०. | ॐ सच्चिदानन्दविग्रहाय | नमः | २१. | ॐ नवनीतविलिप्ताङ्गाय | नमः |
| २२. | ॐ नवनीतनटाय | नमः | २२. | ॐ अनघाय | नमः |
| २४. | ॐ नवनीतनवाराहाय | नमः | २५. | ॐ मुचुकुन्दप्रकाशकाय | नमः |
| २६. | ॐ षोडशस्त्रीसहस्रेशाय | नमः | २७. | ॐ त्रिभङ्गीमधुराकृतये | नमः |
| २८. | ॐ शुकवागमृताब्धीन्दवे | नमः | २९. | ॐ गोविन्दाय | नमः |
| ३०. | ॐ योगिनां पतये | नमः | ३१. | ॐ वत्सवाटचराय | नमः |
| ३२. | ॐ अनन्ताय | नमः | ३३. | ॐ धेनुकासुरखण्डनाय | नमः |
| ३४. | ॐ तृणीकृततृणावर्ताय | नमः | ३५. | ॐ यमलार्जुनभञ्जनाय | नमः |
| ३६. | ॐ उत्तालतालभेत्रे | नमः | ३७. | ॐ तमालश्यामलाकृतये | नमः |
| ३८. | ॐ गोपगोपीश्वराय | नमः | ३९. | ॐ योगिने | नमः |
| ४०. | ॐ कोटीसूर्यसमप्रभाय | नमः | ४१. | ॐ इलापतये | नमः |
| ४२. | ॐ परं ज्योतिषे | नमः | ४३. | ॐ यादवेन्द्राय | नमः |
| ४४. | ॐ यदूद्वहाय | नमः | ४५. | ॐ वनमालिने | नमः |
| ४६. | ॐ पीतवाससे | नमः | ४७. | ॐ पारिजातापहारकाय | नमः |
| ४८. | ॐ गोवर्धनचलोर्द्धर्त्रे | नमः | ४९. | ॐ गोपालाय | नमः |
| ५०. | ॐ सर्वपालकाय | नमः | ५१. | ॐ अजाय | नमः |
| ५२. | ॐ निरञ्जनाय | नमः | ५३. | ॐ कामजनकाय | नमः |

५४. ॐ कज्जलोचनाय नमः ५५. ॐ मधुघ्ने नमः
५६. ॐ मथुरानाथाय नमः ५७. ॐ द्वारकानायकाय नमः
५८. ॐ बलिने नमः ५९. ॐ वृन्दावनान्तस्संचारिणे नमः
६०. ॐ तुलसीदामभूषणाय नमः ६१. ॐ स्यमन्तकमणेर्हर्त्रे नमः
६२. ॐ नरनारायणात्मकाय नमः ६३. ॐ कुब्जाकृष्टाम्बरधराय नमः
६४. ॐ मायिने नमः ६५. ॐ परमपुरुषाय नमः
६६. ॐ मुष्टिकासुरचाणूरमल्लयुद्धविशारदाय नमः
६७. ॐ संसारवैरिणे नमः ६८. ॐ कंसारये नमः
६९. ॐ मुरारये नमः ७०. ॐ नरकान्तकाय नमः
७१. ॐ अनादिब्रह्मचारिणे नमः ७२. ॐ कृष्णाव्यसनकर्षकाय नमः
७३. ॐ शिशुपालशिरश्छेत्रे नमः ७४. ॐ दुर्योधनकुलान्तकाय नमः
७५. ॐ विदुराक्रूरवरदाय नमः ७६. ॐ विश्वरूपप्रकाशकाय नमः
७७. ॐ सत्यवाचे नमः ७८. ॐ सत्यसङ्कल्पाय नमः
७९. ॐ सत्यभामारताय नमः ८०. ॐ जयिने नमः
८१. ॐ सुभद्रापूर्वजाय नमः ८२. ॐ जिष्णवे नमः
८३. ॐ भीष्ममुक्तिप्रदायकाय नमः ८४. ॐ जगद्गुरवे नमः
८५. ॐ जगन्नाथाय नमः ८६. ॐ वेणुनादविशारदाय नमः
८७. ॐ वृषभासुरविध्वंसिने नमः ८८. ॐबाणासुरकरान्तकाय नमः
८९. ॐ युधिष्ठिरप्रतिष्ठात्रे नमः ९०. ॐ बर्हिबर्हावतंसकाय नमः
९१. ॐ पार्थसारथये नमः ९२. ॐ अव्यक्ताय नमः
९३. ॐ गीतामृतमहोदधये नमः
९४. ॐ कालीयफणमाणिक्यरञ्जितश्रीपदाम्बुजाय नमः
९५. ॐ दामोदराय नमः ९६. ॐ यज्ञभोक्त्रे नमः
९७. ॐ दानवेन्द्रविनाशकाय नमः ९८. ॐ नारायणाय नमः

| | | | |
|---|---|---|---|
| ९९. ॐ परब्रह्मणे | नमः | १००.ॐ पन्नगाशनवाहनाय | नमः |
| १०१. ॐ जलक्रीडासमासक्तगोपीवस्त्रापहारकाय | | | नमः |
| १०२. ॐ पुण्यश्लोकाय | नमः | १०३.ॐ तीर्थपादाय | नमः |
| १०४. ॐ वेदवेद्याय | नमः | १०५. ॐ दयानिधये | नमः |
| १०६. ॐ सर्वभूतात्मकाय | नमः | १०७. ॐ सर्वग्रहरूपिणे | नमः |
| १०८. ॐ परात्पराय | नमः | ॐ श्रीकृष्णाय परब्रह्मणे | नमः |

ॐ श्रीरुक्मिणीसत्यभामासहितश्रीवेणीमाधवस्वामिने नमः

## श्रीलक्ष्मीद्वादशनामावलिः

| | | | | | |
|---|---|---|---|---|---|
| १. | ॐ श्रियै | नमः | २. | ॐ अमृतोद्भवायै | नमः |
| ३. | ॐ कमलायै | नमः | ४. | ॐ चन्द्रसोदर्यै | नमः |
| ५. | ॐ विष्णुपत्न्यै | नमः | ६. | ॐ वैष्णव्यै | नमः |
| ७. | ॐ वरारोहायै | नमः | ८. | ॐ हरिवल्लभायै | नमः |
| ९. | ॐ शार्ङ्गिण्यै | नमः | १०. | ॐ देवदेविकायै | नमः |
| ११. | ॐलोकसुन्दर्यै | नमः | १२. | ॐ श्रीमहालक्ष्म्यै | नमः |

## श्रीलक्ष्म्यष्टोत्तरशतनामावलिः

| | | | | | |
|---|---|---|---|---|---|
| १. | ॐ प्रकृत्यै | नमः | २. | ॐ विकृत्यै | नमः |
| ३. | ॐ विद्यायै | नमः | ४. | ॐ सर्वभूतहितप्रदायै | नमः |
| ५. | ॐ श्रद्धायै | नमः | ६. | ॐ विभूत्यै | नमः |
| ७. | ॐ सुरभ्यै | नमः | ८. | ॐ परमात्मिकायै | नमः |
| ९. | ॐ वाचे | नमः | १०. | ॐ पद्मालयायै | नमः |
| ११. | ॐ पद्मायै | नमः | १२. | ॐ शुचये | नमः |
| १३. | ॐ स्वाहायै | नमः | १४. | ॐ स्वधायै | नमः |

| | | | |
|---|---|---|---|
| १५. ॐ सुधायै | नमः | १६. ॐ धन्यायै | नमः |
| १७. ॐ हिरण्मय्यै | नमः | १८. ॐ लक्ष्म्यै | नमः |
| १९. ॐ नित्यपुष्टायै | नमः | २०. ॐ विभावर्यै | नमः |
| २१. ॐ अदित्यै | नमः | २२. ॐ दित्यै | नमः |
| २३. ॐ दीप्तायै | नमः | २४. ॐ वसुधायै | नमः |
| २५. ॐ वसुधारिण्यै | नमः | २६. ॐ कमलायै | नमः |
| २७. ॐ कान्तायै | नमः | २८. ॐ क्षमायै | नमः |
| २९. ॐ क्षीरोदसम्भवायै | नमः | ३०. ॐ अनुग्रहपरायै | नमः |
| ३१. ॐ ऋद्धये | नमः | ३२. ॐ अनघायै | नमः |
| ३३. ॐ हरिवल्लभायै | नमः | ३४. ॐ अशोकायै | नमः |
| ३५. ॐ अमृतायै | नमः | ३६. ॐ दीप्तायै | नमः |
| ३७. ॐ लोकशोकविनाशिन्यै | नमः | ३८. ॐ धर्मनिलयायै | नमः |
| ३९. ॐ करुणायै | नमः | ४०. ॐ लोकमात्रे | नमः |
| ४१. ॐ पद्मप्रियायै | नमः | ४२. ॐ पद्महस्तायै | नमः |
| ४३. ॐ पद्माक्ष्यै | नमः | ४४. ॐ पद्मसुन्दर्यै | नमः |
| ४५. ॐ पद्मोद्भवायै | नमः | ४६. ॐ पद्ममुख्यै | नमः |
| ४७. ॐ पद्मनाभप्रियायै | नमः | ४८. ॐ रमायै | नमः |
| ४९. ॐ पद्ममालाधरायै | नमः | ५०. ॐ देव्यै | नमः |
| ५१. ॐ पद्मिन्यै | नमः | ५२. ॐ पद्मगन्धिन्यै | नमः |
| ५३. ॐ पुण्यगन्धायै | नमः | ५४. ॐ सुप्रसन्नायै | नमः |
| ५५. ॐ प्रसादाभिमुख्यै | नमः | ५६. ॐ प्रभायै | नमः |
| ५७. ॐ चन्द्रवदनायै | नमः | ५८. ॐ चन्द्रायै | नमः |
| ५९. ॐ चन्द्रसहोदर्यै | नमः | ६०. ॐ चतुर्भुजायै | नमः |
| ६१. ॐ चन्द्ररूपायै | नमः | ६२. ॐ इन्दिरायै | नमः |

| | |
|---|---|
| ६३. ॐ इन्दुशीतलायै नमः | ६४. ॐ आह्लादजनन्यै नमः |
| ६५. ॐ पुष्ट्यै नमः | ६६. ॐ शिवायै नमः |
| ६७. ॐ शिवकर्य्यै नमः | ६८. ॐ सत्यै नमः |
| ६९. ॐ विमलायै नमः | ७०. ॐ विश्वजनन्यै नमः |
| ७१. ॐ तुष्टये नमः | ७२. ॐ दारिद्र्यनाशिन्यै नमः |
| ७३. ॐ प्रीतिपुष्करिण्यै नमः | ७४. ॐ शान्तायै नमः |
| ७५. ॐ शुक्लमाल्याम्बरायै नमः | ७६. ॐ श्रियै नमः |
| ७७. ॐ भास्कर्यै नमः | ७८. ॐ बिल्वनिलयायै नमः |
| ७९. ॐ वरारोहायै नमः | ८०. ॐ यशस्विन्यै नमः |
| ८१. ॐ वसुन्धरायै नमः | ८२. ॐ उदाराङ्गायै नमः |
| ८३. ॐ हरिण्यै नमः | ८४. ॐ हेममालिन्यै नमः |
| ८५. ॐ धनधान्यकर्यै नमः | ८६. ॐ सिद्धये नमः |
| ८७. ॐ स्त्रैणसौम्यायै नमः | ८८. ॐ शुभप्रदायै नमः |
| ८९. ॐ नृपवेश्मगतायै नमः | ९०. ॐ वरलक्ष्म्यै नमः |
| ९१. ॐ वसुप्रदायै नमः | ९२. ॐ शुभायै नमः |
| ९३. ॐ हिरण्यप्राकारायै नमः | ९४. ॐ समुद्रतनयायै नमः |
| ९५. ॐ जयायै नमः | ९६. ॐ मङ्गलादेव्यै नमः |
| ९७. ॐ विष्णुवक्षस्थलस्थितायै नमः | ९८. ॐ विष्णुपत्न्यै नमः |
| ९९. ॐ प्रसन्नाक्ष्यै नमः | १००. ॐ नारायणसमाश्रितायै नमः |
| १०१. ॐ दारिद्र्यध्वंसिन्यै नमः | १०२. ॐ देव्यै नमः |
| १०३. ॐ सर्वोपद्रववारिण्यै नमः | १०४. ॐ नवदुर्गायै नमः |
| १०५. ॐ महाकाल्यै नमः | १०६. ॐ ब्रह्मविष्णुशिवात्मिकायै नमः |
| १०७. ॐ त्रिकालज्ञानसम्पन्नायै नमः | १०८. ॐ भुवनेश्वर्यै नमः |

ॐश्रीरङ्गनायक्यै महालक्ष्म्यै नमः

ॐ श्रीदेव्यै नमः ॐ भूदेव्यै नमः

ॐ नीलादेव्यै नमः ॐ गोदादेव्यै नमः

ॐ आधारशक्त्यादिसमस्तवैकुण्ठपार्षदेभ्यो नमः

ॐ श्रीमते विष्वक्सेनाय नमः ॐ श्रीशेषाय नमः

ॐ गरुडाय नमः ॐ सुदर्शनाय हेतिराजाय नमः

ॐ पाञ्चजन्याय शंखाधिपतये नमः

ॐ कौमोदक्यै गदाधिपतये नमः

ॐ नन्दकाय खड्गाधिपतये नमः

ॐ शार्ङ्गाय चापाधिपतये नमः

ॐ सर्वेभ्यो दिव्यायुधेभ्यो नमः

ॐ सर्वेभ्यो भगवत्परिकरेभ्यो नमः

ॐ सर्वाभ्यो भगवत्परिचारिकाभ्यो नमः

ॐ अस्मद्गुरुभ्यो नमः ॐ अस्मत्परमगुरुभ्यो नमः

ॐ अस्मत्सर्वगुरुभ्यो नमः ॐ श्रीमते रामानुजाय नमः

ॐ श्रीपराङ्कुशदासाय नमः ॐ श्रीमद्-यामुनमुनये नमः

ॐ श्रीराममिश्राय नमः ॐ श्रीपुण्डरीकाक्षाय नमः

ॐ श्रीमन्नाथमुनये नमः ॐ श्रीमते शठकोपाय नमः

ॐ श्रीमते विष्वक्सेनाय नमः ॐ श्रियै नमः

ॐ श्रीधराय नमः

ॐ समस्तपरिवारविशिष्टाय श्रीमते नारायणाय नमः ॥

ॐ नृत्यवाद्यादिगीतादिपुराणपठनादिभिः ।
यथोपचारैः सकलैः सन्तुष्टो भव माधव ॥

इति पुष्पतुलस्यादिभिः समर्च्य कर्पूरेण नीराजयेत् –

**ॐ श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम्।**
**श्रीवैकुण्ठनिवासाय श्रीनिवासाय मङ्गलम्॥**
**जयतु जयतु देवो देवकीनन्दनोऽयं**
**जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः।**
**जयतु जयतु मेघश्यामलः कोमलाङ्गो**
**जयतु जयतु पृथ्वीभारनाशो मुकुन्दः॥**

ततः साष्टाङ्गप्रणामं कृत्वा हवनपद्धतौ उक्तप्रकारेण कर्मपात्रविधानादारभ्य पूर्वाङ्गहोमं परिसमाप्य मध्यमहोमं कुर्यात्। तद्यथा नारायणाष्टाक्षरेण सर्पिषाष्टोत्तरशताहुतीर्हुत्वा वास्तुसूक्तेन चरुणा हुत्वा पुरुषसूक्तेन घृताक्तेन पायसेन आहुतीर्जुहुयात्। एवं विष्णुसूक्तनारायणसूक्ताभ्यां घृतशर्कराक्तैः तिलयवतण्डुलैर्जुहुयात्। केवलेन आज्येनाक्तविल्वफलचूर्णैः श्रीसूक्तेन जुहुयात्। ततो नारायणाष्टाक्षर-वासुदेवद्वादशाक्षर-विष्णुषडक्षर-रामषडक्षरमन्त्रैः प्रत्येकमष्टोत्तरशताहुतीर्हुत्वा केशवादिचतुर्विंशति-नामभिर्हुत्वा वैकुण्ठपार्षदनामभिर्जुहुयात्।

ततो हवनपद्धत्युक्तप्रकारेण प्रायश्चित्तहोमान्तं हुत्वा –

**ॐ उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्।**
**नृसिंहं भीषणं भद्रं मृत्योर्मृत्युं नमाम्यहम्॥**

इत्यष्टोत्तरशतं तिलाज्याभ्यां जुहुयात्। ततः नारायणबलिं कुर्यात्॥

卐卐卐卐

# ❀ अथ नारायणबलिः ❀

अथ आचार्यो होमाग्नेरुत्तरतो दक्षिणोत्तरक्रमेण लम्बायमानां वेदीं निर्माय तत्र स्वर्णशलाकया वा कुशमूलेन प्राक्प्रतीच्यक्रमेण चतुर्विंशतिरेखाः समुल्लिख्य तत्र रेखासु द्वे द्वे कुशखण्डे पूर्वाग्रे स्थापयित्वा पिण्डवेद्यां कुशकूर्चेषु केशवादिचतुर्विंशतिव्यूहान् दक्षिणोत्तरक्रमेणावाह्य पूजयेत् । व्यूहवेदीहवनवेद्योः मध्ये दक्षिणतः उत्तरक्रमेण क्रमशः एकां वेदीं निर्माय नित्यमुक्तदिवङ्गतानां स्थापना कर्तव्या ।

(स्थापनक्रमे संशयश्चेत् ४३४ तमे पृष्टे चित्रावलिः द्रष्टव्या) ।

तत्रादौ प्रतिज्ञासङ्कल्पः –

**ॐ अद्य पूर्वोच्चारितसङ्कल्पसिद्धिरस्तु अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) वैकुण्ठोत्सवाङ्गभूतनारायणबलिकर्मणि सशक्तिकान् केशवादिचतुर्विंशतिव्यूहान् नित्यमुक्तदिवङ्गतान् च आवाह्य यथा लब्धोपचारैः पूजयिष्ये ।**

ततः पीताक्षतैः आवाह्य पूजयेत् –

केशवम् –

**ॐ अहमावाहयाम्यत्र केशवं क्लेशनाशनम् ।**
**सुवर्णाभं च सर्वेषामीप्सितार्थप्रदायकम् ॥**
**ॐ भूर्भुवः स्वः श्रीसहितं केशवम् आवाहयामि स्थापयामि पूजयामि ।**

नारायणम् –

**ॐ नारायणं घनश्यामं नरकार्णवतारकम् ।**
**आवाहयामि लक्ष्मीशं परमात्मानमव्ययम् ॥**
**ॐ भूर्भुवः स्वः लक्ष्मीसहितं नारायणम् आवाहयामि स्थापयामि पूजयामि ।**

माधवम् –

ॐ आवाहयामि देवेशं माधवं कमलापतिम् ।
उत्पलाभकायकान्तिं मनोरथसुरद्रुमम् ॥

ॐ भूर्भुवः स्वः कमलासहितं माधवम् आवाहयामि स्थापयामि पूजयामि ।

गोविन्दम् –

ॐ आवाहयामि गोविन्दं गोपिकाजनवल्लभम् ।
चन्द्रावदातं वर्णेन चराचरपतिं प्रभुम् ॥

ॐ भूर्भुवः स्वः पद्मासहितं गोविन्दम् आवाहयामि स्थापयामि पूजयामि ।

विष्णुम् –

ॐ आवाहयामि विश्वेशं विष्णुं वै वरदं विभुम् ।
गौरवर्णं गुणावासम् अगतीनां गतिप्रदम् ॥

ॐ भूर्भुवःस्वः पद्मिनीसहितं विष्णुम् आवाहयामि स्थापयामि पूजयामि ।

मधुसूदनम् –

ॐ आवाहयामि देवेशं मधुसूदनसंज्ञकम् ।
शोणवर्णं स्वभक्तानां कामनाकल्पपादपम् ॥

ॐ भूर्भुवः स्वः कमलालयासहितं मधुसूदनम् आवाहयामि स्थापयामि पूजयामि ।

त्रिविक्रमम् –

ॐ आवाहयामि देवेशं त्रिविक्रमसमाह्वयम् ।
अग्निसंकाशवर्णं वै ह्यपराजितविक्रमम् ॥

ॐ भूर्भुवः स्वः रमासहितं त्रिविक्रमम् आवाहयामि स्थापयामि पूजयामि ।

वामनम् -

ॐ आवाहयामि तं देवं वामनं बलिवैरिणम्।
स्फटिकाभं स्वभावेन सेवितं सर्वकामदम्॥

ॐ भूर्भुवः स्वः वृषाकपिसहितं वामनम् आवाहयामि स्थापयामि पूजयामि।

श्रीधरम् -

ॐ आवाहयामि लक्ष्मीशं श्रीधरं पीतवर्णकम्।
क्षीरसागरकल्लोललीलालालितविग्रहम्॥

ॐ भूर्भुवः स्वः धन्यासहितं श्रीधरम् आवाहयामि स्थापयामि पूजयामि।

हृषीकेशम् -

ॐ आवाहयाम्यहं देवं हृषीकेशं गुणालयम्।
सूर्यवर्णं सहस्राक्षं सर्वेन्द्रियपतिं प्रभुम्॥

ॐ भूर्भुवःस्वः पृथ्वीसहितं हृषीकेशम् आवाहयामि स्थापयामि पूजयामि।

पद्मनाभम् -

ॐ आवाहयामि देवेशं पद्मनाभं परं प्रभुम्।
घनाभकायकान्तिं च कमलापतिमव्ययम्॥

ॐ भूर्भुवः स्वः यज्ञासहितं पद्मनाभम् आवाहयामि स्थापयामि पूजयामि।

दामोदरम् -

ॐ अहमावाहयाम्यत्र देवं दामोदराह्वयम्।
स्वर्णकान्तशरीरेण शोभितं शोभनाकृतिम्॥

ॐ भूर्भुवः स्वः इन्दिरासहितं दामोदरम् आवाहयामि स्थापयामि पूजयामि।

वासुदेवम् –

**ॐआवाहयाम्यहं देवं वासुदेवमनामयम् ।**
**अमृताध्मातदेहाभं विद्युत्सदृशवाससम् ॥**

ॐ भूर्भुवः स्वः हरिणीसहितं वासुदेवम् आवाहयामि स्थापयामि पूजयामि ।

सङ्कर्षणम् –

**ॐ आवाहयाम्यहं देवं सङ्कर्षणसमाह्वयम् ।**
**शशाङ्कशतसंकाशं सजलाम्बुदवाससम् ॥**

ॐ भूर्भुवः स्वः हिरण्यासहितं सङ्कर्षणम् आवाहयामि स्थापयामि पूजयामि ।

प्रद्युम्नम् –

**ॐ देवमावाहयाम्यत्र प्रद्युम्नमपराजितम् ।**
**रक्तवर्णं रतीशं च शशांकसदृशाम्बरम् ॥**

ॐ भूर्भुवः स्वः सत्यासहितं प्रद्युम्नम् आवाहयामि स्थापयामि पूजयामि ।

अनिरुद्धम् –

**ॐ आवाहयाम्यहं देवमनिरुद्धं जगद्गुरुम् ।**
**उत्पलाभन्तु वर्णेन रक्ताम्बरविभूषणम् ॥**

ॐ भूर्भुवः स्वः नित्यासहितम् अनिरुद्धम् आवाहयामि स्थापयामि पूजयामि ।

पुरुषोत्तमम् –

**ॐ अहमावाहयाम्यत्र पुरुषोत्तममीश्वरम् ।**
**रक्तवर्णं स्वभक्तानां रञ्जकं रुक्मिणीपतिम् ॥**

ॐ भूर्भुवःस्वः नन्दासहितं पुरुषोत्तमम् आवाहयामि स्थापयामि पूजयामि ।

अधोक्षजम् –

ॐ आवाहयामि देवेशमधोक्षजमनामयम् ।
दूर्वादलकायकान्तिं कमनीयगुणालयम् ॥

ॐ भूर्भुवः स्वः त्रयीसहितम् अधोक्षजम् आवाहयामि स्थापयामि पूजयामि ।

नारसिंहम् –

ॐ आवाहयामि तं देवं नारसिंहं महाबलम् ।
पद्मरागरुचं भक्तवाच्छाकल्पमहीरुहम् ॥

ॐ भूर्भुवः स्वः सुखासहितं नारसिंहम् आवाहयामि स्थापयामि पूजयामि ।

अच्युतम् –

ॐ आवाहयाम्यहं देवमच्युतं च्युतिवर्जितम् ।
सर्वकालगुणातीतं गुणिनं गुणवर्जितम् ॥

ॐ भूर्भुवः स्वः सुगन्धासहितम् अच्युतम् आवाहयामि स्थापयामि पूजयामि ।

जनादर्नम् –

ॐ आवाहयाम्यहं देवं जनार्दनं महेश्वरम् ।
जनातीतं जगन्नाथं जगदाधारमव्ययम् ॥

ॐ भूर्भुवः स्वः सुन्दरीसहितं जनार्दनम् आवाहयामि स्थापयामि पूजयामि ।

उपेन्द्रम् –

ॐ आवाहयाम्युपेन्द्रं तमिन्द्रमित्रं महौजसम् ।
भक्तकामदुघं देवं देवानामिष्टपूरकम् ॥

ॐ भूर्भुवः स्वः विद्यासहितम् उपेन्द्रम् आवाहयामि स्थापयामि पूजयामि ।

हरिम् –

**ॐ आवाहयामि तं देवं हरिं हर्षविवर्द्धनम्।**
**हरन्तं सर्वपापौघान् हरसंस्तुविक्रमम् ॥**

**ॐ भूर्भुवः स्वःसुशीलासहितं हरिम् आवाहयामि स्थापयामि पूजयामि।**

श्रीकृष्णम् –

**ॐ आवाहयामि श्रीकृष्णं पीतनिर्मलवाससम्।**
**महाहवरिपुस्कन्धसृष्टचक्रं सुचक्रिणम्॥**

**ॐ भूर्भुवः स्वः सुलक्षणासहितं श्रीकृष्णम् आवाहयामिस्थापयामि पूजयामि।**

इत्यावाह्य पुरुषसूक्तेन आसन-अर्घ्य-पाद्य-आचमन-स्नान-वस्त्र-यज्ञोपवीत-गन्ध-पुष्प-पुष्पमालिका-धूप-दीप-नैवेद्य-ताम्बूल-दक्षिणा-प्रदक्षिणा-नमस्कारैः सम्पूज्य प्रणमेत्।

## पिण्डदानम्

ततः पायसेन घृततिलयुक्तेन बिल्वामलकसदृशान् सप्तविंशतिपिण्डान् निर्माय पूर्वाभिमुखो भूत्वा केशवादिचतुर्विंशतिव्यूहानां पुरतः कौशेयासनानि दद्यात्।

हस्ते सजलकुशानि आदाय –

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) वैकुण्ठोत्सवाङ्गभूतनारायण-बलिकर्मणि केशवादिचतुर्विंशतिव्यूहाः सशक्तिकाः एतानि कौशेयासनानि चतुर्विंशतिधा विभज्य वो नमः।**

ततः हस्ते एकं पिण्डम् आदाय प्रथमव्यूहस्य अग्रे कुशासने अष्टाक्षर मूलमन्त्रम् अनुसन्दधानः पिण्डं दद्यात् –

१. ॐ अद्यामुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) वैकुण्ठोत्सवाङ्गभूतनारायणबलि-कर्मणि ॐ भूर्भुवःस्वः श्रीसहिताय केशवाय नमः स्वाहा।

एवं क्रमेण चतुर्विंशतिभ्यो व्यूहेभ्यः पृथक् पृथक् सङ्कल्प्य पिण्डान् दद्यात्। सङ्कल्पवाक्ये विशेषः -

| | | | |
|---|---|---|---|
| २... | ॐ भूर्भुवः स्वः | लक्ष्मीसहिताय नारायणाय | नमः स्वाहा। |
| ३... | ॐ भूर्भुवः स्वः | कमलासहिताय माधवाय | नमः स्वाहा। |
| ४... | ॐ भूर्भुवः स्वः | पद्मासहिताय गोविन्दाय | नमः स्वाहा। |
| ५... | ॐ भूर्भुवः स्वः | पद्मिनीसहिताय विष्णवे | नमः स्वाहा। |
| ६... | ॐ भूर्भुवः स्वः | कमलालयासहिताय मधुसूदनाय | नमः स्वाहा। |
| ७... | ॐ भूर्भुवः स्वः | रमासहिताय त्रिविक्रमाय | नमः स्वाहा। |
| ८... | ॐ भूर्भुवः स्वः | वृषाकपिसहिताय वामनाय | नमः स्वाहा। |
| ९... | ॐ भूर्भुवः स्वः | धन्यासहिताय श्रीधराय | नमः स्वाहा। |
| १०... | ॐ भूर्भुवः स्वः | वृत्तिसहिताय हृषीकेशाय | नमः स्वाहा। |
| ११... | ॐ भूर्भुवः स्वः | यज्ञासहिताय पद्मनाभाय | नमः स्वाहा। |
| १२... | ॐ भूर्भुवः स्वः | इन्दिरासहिताय दामोदराय | नमः स्वाहा। |
| १३... | ॐ भूर्भुवः स्वः | हरिणीसहिताय वासुदेवाय | नमः स्वाहा। |
| १४... | ॐ भूर्भुवः स्वः | हिरण्यासहिताय सङ्कर्षणाय | नमः स्वाहा। |
| १५... | ॐ भूर्भुवः स्वः | सत्यासहिताय प्रद्युम्नाय | नमः स्वाहा। |
| १६... | ॐ भूर्भुवः स्वः | नित्यासहिताय अनिरुद्धाय | नमः स्वाहा। |
| १७... | ॐ भूर्भुवः स्वः | नन्दासहिताय पुरुषोत्तमाय | नमः स्वाहा। |
| १८... | ॐ भूर्भुवः स्वः | त्रयीसहिताय अधोक्षजाय | नमः स्वाहा। |
| १९... | ॐ भूर्भुवः स्वः | सुखासहिताय नारसिंहाय | नमः स्वाहा। |
| २०... | ॐ भूर्भुवः स्वः | सुगन्धासहिताय अच्युताय | नमः स्वाहा। |

२१... ॐ भूर्भुवः स्वः सुन्दरीसहिताय जनार्दनाय नमः स्वाहा।
२२... ॐ भूर्भुवः स्वः विद्यासहिताय उपेन्द्राय नमः स्वाहा।
२३... ॐ भूर्भुवः स्वः सुशीलासहिताय हरये नमः स्वाहा।
२४... ॐ भूर्भुवः स्वः सुलक्षणासहिताय श्रीकृष्णाय नमः स्वाहा।

ततः पिण्डान् चन्दनपुष्पतुलसीधूपदीपैः सम्पूज्य पुरुषसूक्तेन गोपयसा स्नापयेत् -

**ॐ पयः पृथिव्यां पय ओषधीषु पयोदिव्यन्तरिक्षे पयोधाः।**
**पयस्वतीः प्प्रदिशः सन्तु मह्यम्।**

ततो नूतनकौशेयवाससा पिण्डान् आच्छादयेत्। ततः एतद्वेद्याः दक्षिणे, हवनवेद्याः उत्तरे दक्षिणोत्तरक्रमेण द्वादशाङ्गुलविस्तारां चतुरङ्गुलायतां वेदीं निर्माय तत्र तिस्रो रेखाः कृत्वा रेखासु प्रत्येकं कुशद्वयं निधाय तत्र कुशकूर्चेषु नित्यमुक्तदिवङ्गतान् आवाहयेत्।

नित्यान् -
**नित्यानावाहयाम्यत्र पार्षदान् श्रीपतेः प्रियान्।**
**स्वागतं वो महाभागा यथाविध्यर्चयाम्यहम्॥**

**ॐ नित्येभ्यो नमः नित्यान् आवाहयामि स्थापयामि पूजयामि।**

मुक्तान् -
**मुक्तानावाहयाम्यत्र वैकुण्ठपदचिन्तकान्।**
**पूजयामि च सर्वांस्तान् श्रीमन्नारायणे रतान्॥**

**ॐ मुक्तेभ्यो नमः, मुक्तान् आवाहयामि स्थापयामि पूजयामि।**

दिवङ्गतम् (दिवङ्गताम्) -
**आवाहयाम्यहं जीवं वैकुण्ठोत्सवकर्मणि।**
**दिवङ्गतं हरेः श्रीमत्कैंकर्यकरणेप्सया॥**

**ॐ अमुकगोत्रोत्पन्नाय अमुकनाम्ने दिवङ्गताय श्रीवैष्णवाय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै श्रीवैष्णव्यै) नमः, अमुकगोत्रोत्त्पन्नम् अमुकनामानं दिवङ्गतं श्रीवैष्णवम् (अमुकगोत्राम्, अमुकनाम्नीं दिवङ्गतां श्रीवैष्णवीम्) आवाहयामि स्थापयामि पूजयामि ॥**

ततः सर्वोपचारैः सम्पूज्य नित्यमुक्तानाम् कृते वेद्यां कौशेयासनानि दद्यात् । हस्ते सजलकुशानि आदाय -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) वैकुण्ठोत्सवाङ्ग-भूतनारायणबलिकर्मणि नित्यमुक्ता एतानि कौशेयासनानि यथाभागं विभज्य वो नमः ।**

इति आसनानि दत्वा हस्ते एकपिण्डम् आदाय -

**ॐ नित्येभ्यो नमः स्वाहा** । इति नित्यानां स्थाने कुशोपरि एकं पिण्डं दद्यात् । पुनः अपरं पिण्डम् आदाय -

**ॐ मुक्तेभ्यो नमः स्वाहा** । इति मुक्तानां स्थाने कुशोपरि एकं पिण्डं दद्यात् -

इति पिण्डं दत्वा दिवङ्गताय (दिवङ्गतायै) कौशेयम् आसनं दद्यात् -

**ॐ अद्य अमुकगोत्रस्य अमुकनाम्नो दिवङ्गतस्य (अमुकगोत्रायाः अमुकनाम्न्याः दिवङ्गतायाः) वैकुण्ठोत्सवाङ्ग-भूतनारायणबलिकर्मणि अमुकगोत्र अमुकनामन् दिवङ्गत श्रीवैष्णव (अमुकगोत्रे अमुकनाम्नि दिवङ्गते श्रीवैष्णवि) ते एतत् कौशेयासनं नमः ।**

इति दिवङ्गगतस्य (दिवङ्गतायाः) स्थाने कुशासनं दत्वा तदुपरि पिण्डं दद्यात् -

ॐ अमुकगोत्रोत्पन्नाय अमुकनाम्ने दिवङ्गताय श्रीवैष्णवाय (अमुकगोत्रायै अमुकनाम्न्यै दिवङ्गतायै श्रीवैष्णव्यै) नमः स्वाहा ।

इति पिण्डान् दत्वा चन्दनपुष्पतुलसीधूपदीपैः सम्पूज्य गोदुग्धेन पिण्डान् स्नापयेत् –

**ॐ पयःपृथिव्यां पय ओषधीषु पयोदिव्यन्तरिक्षे पयोधाः ।**
**पयस्वतीः प्प्रदिशः सन्तु मह्यम् ।**

ततो नववस्त्रेण पिण्डान् आच्छाद्य महापुरुषविद्यया उपतिष्ठेत् ।

## महापुरुषविद्या

**ॐ तस्मान्न्यासमेषां तपसामतिरिक्तमाहुर्वसुरण्वोविभूरसि प्राणे त्वमसि सन्धाता ब्रह्मन् त्वमसि विश्वसृत्तेजोदास्त्वमस्यग्निरसि वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमसः उपयामगृहीतोसि ब्रह्मणे त्वा महसे ओमित्यात्मानं युञ्जीत । तस्यैवं विदुषो यज्ञस्यात्मा यजमानश्श्रद्धापत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोग्निश्शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्यु र्मनोब्रह्मा श्रोत्रमग्नीद्यावद्ध्रियते सा दीक्षा यदश्नाति यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदोयत्संचरत्युपविशतित्युत्तिष्ठते च सप्रवर्ग्यो यन्मुखं तदाहवनीयो यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधो यत्प्रातर्मध्यंदिनँसायं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्चते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये संवथ्सराश्च परिवथ्सराश्च तेऽहर्गणास् सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथ एतद्वै जरामर्यमग्निहोत्रं सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं**

गत्वाऽऽदित्यस्य सायुज्यङ्गच्छत्यथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानम् आप्नोति तस्मात् ब्रह्मणो महिमानम् ॥

ॐ शान्तिः ॐ शान्तिः ॐ शान्तिः ।

ॐ वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्वाः ।
ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ॥

इति सम्प्रार्थ्य गन्धपुष्पतुलसीदलसहितगोदुग्धमिश्रितोदकेन तर्पणं कुर्यात् ।

तर्पणाधारपात्रे पीताक्षतैः देवान् आवाहयेत् -

**ॐ सश्रीकं नारायणं सशक्तिकान् केशवादिचतुर्विंशतिव्यूहान् तत्पार्षदाँश्च आवाहयामि** इत्युक्त्वा -

**ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सभूमिँसर्वतस्स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥
ॐ पुरुष एवेदँसर्वं यद्भूतं यच्चभाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।
ॐ विश्वेदेवासऽआगत श्रृणुतामऽइम ँ हवम् ।
एदम्बर्हि निषीदत ॥
ॐ विश्वेदेवाःश्रृणुतेम ँ हवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठा ।
येऽअग्नि जिह्वाऽउतवा यजत्राऽआसद्यास्मिन् बर्हिषि मादयध्वम् ।**

इत्यावाहयेत् ।

ततः प्राङ्मुखः सन् सव्येन देवतीर्थेन मूलमन्त्रेण दशवारं तर्पयित्वा क्रमशः तर्पणं कुर्यात् -

| | | |
|---|---|---|
| ॐ सश्रीकं | नारायणं | तर्पयामि |
| ॐ भूस्तर्पयामि | | |
| ॐ भुवस्तर्पयामि | | |
| ॐ स्वस्तर्पयामि | | |
| ॐ भूर्भुवः स्वस्तर्पयामि | | |
| ॐ श्रीसहितं | केशवं | तर्पयामि |
| ॐ लक्ष्मीसहितं | नारायणं | तर्पयामि |
| ॐ कमलासहितं | माधवं | तर्पयामि |
| ॐ पद्मासहितं | गोविन्दं | तर्पयामि |
| ॐ पद्मिनीसहितं | विष्णुं | तर्पयामि |
| ॐ कमलालयासहितं | मधुसूदनं | तर्पयामि |
| ॐ रमासहितं | त्रिविक्रमं | तर्पयामि |
| ॐ वृषाकपिसहितं | वामनं | तर्पयामि |
| ॐ धन्यासहितं | श्रीधरं | तर्पयामि |
| ॐ पृथ्वीसहितं | हृषीकेशं | तर्पयामि |
| ॐ यज्ञासहितं | पद्मनाभं | तर्पयामि |
| ॐ इन्दिरासहितं | दामोदरं | तर्पयामि |
| ॐ हरिणीसहितं | वासुदेवं | तर्पयामि |
| ॐ हिरण्यासहितं | सङ्कर्षणं | तर्पयामि |
| ॐ सत्यासहितं | प्रद्युम्नं | तर्पयामि |
| ॐ नित्यासहितम् | अनिरुद्धं | तर्पयामि |
| ॐ नन्दासहितं | पुरुषोत्तमं | तर्पयामि |
| ॐ त्रयीसहितम् | अधोक्षजं | तर्पयामि |

| | | |
|---|---|---|
| ॐ सुखासहितं | नारसिंहं | तर्पयामि |
| ॐ सुगन्धासहितम् | अच्युतं | तर्पयामि |
| ॐ सुन्दरीसहितं | जनार्दनं | तर्पयामि |
| ॐ विद्यासहितम् | उपेन्द्रं | तर्पयामि |
| ॐ सुशीलासहितं | हरिं | तर्पयामि |
| ॐ सुलक्षणासहितं | श्रीकृष्णं | तर्पयामि |

इति तर्पयित्वा वैकुण्ठपार्षदान् तर्पयेत् –

## वैकुण्ठपार्षदतर्पणम्

| | |
|---|---|
| ॐ आधारशक्तिं | तर्पयामि |
| ॐ प्रकृतिं | तर्पयामि |
| ॐ अखिलजगदाधारं कूर्मरूपिणं नारायणं | तर्पयामि |
| ॐ अनन्तं नागराजं | तर्पयामि |
| ॐ भूमिं | तर्पयामि |
| ॐ वैकुण्ठं दिव्यलोकं | तर्पयामि |
| ॐ वैकुण्ठं दिव्यजनपदं | तर्पयामि |
| ॐ वैकुण्ठं दिव्यनगरं | तर्पयामि |
| ॐ वैकुण्ठं दिव्यविमानं | तर्पयामि |
| ॐ आनन्दमयं दिव्यमण्डपरत्नं | तर्पयामि |
| ॐ आस्तरणरूपिणम् अनन्तं नागराजं | तर्पयामि |
| ॐ धर्मं पीठपादं | तर्पयामि |
| ॐ ज्ञानं पीठपादं | तर्पयामि |
| ॐ वैराग्यं पीठपादं | तर्पयामि |

| | |
|---|---|
| ॐ ऐश्वर्यं पीठपादं | तर्पयामि |
| ॐ ऋग्वेदं पीठवाहकं | तर्पयामि |
| ॐ यजुर्वेदं पीठवाहकं | तर्पयामि |
| ॐ सामवेदं पीठवाहकं | तर्पयामि |
| ॐ अथर्ववेदं पीठवाहकं | तर्पयामि |
| ॐ अधर्मं पीठगात्रं | तर्पयामि |
| ॐ अज्ञानं पीठगात्रं | तर्पयामि |
| ॐ अवैराग्यं पीठगात्रं | तर्पयामि |
| ॐ अनैश्वर्यं पीठगात्रं | तर्पयामि |
| ॐ एभिः परिच्छिन्नतनुं सदसदात्मकं पीठभूतं नागराजं | तर्पयामि |
| ॐ पीठस्योपरि अष्टदलपद्मं | तर्पयामि |
| ॐ सोममण्डलं | तर्पयामि |
| ॐ सूर्यमण्डलं | तर्पयामि |
| ॐ वह्निमण्डलं | तर्पयामि |
| ॐ विमलां चामरकरां | तर्पयामि |
| ॐ क्रियां चामरकरां | तर्पयामि |
| ॐ उत्कर्षिणीं चामरकरां | तर्पयामि |
| ॐ ज्ञानां चामरकरां | तर्पयामि |
| ॐ प्रह्वीं चामरकरां | तर्पयामि |
| ॐ ईशानां चामरकरां | तर्पयामि |
| ॐ सत्यां चामरकरां | तर्पयामि |
| ॐ योगां चामरकरां | तर्पयामि |
| ॐ अनुग्रहां चामरकरां | तर्पयामि |
| ॐ जगत्प्रकृतिं चामरकरां | तर्पयामि |

ॐ सहस्रशीर्षाणम् अनन्तं तर्पयामि
ॐ पुरतः पादपीठं तर्पयामि
ॐ भगवत्पादुके तर्पयामि
ॐ अस्मद्गुरून् तर्पयामि
ॐ अस्मत्परमगुरून् तर्पयामि
ॐ अस्मत्सर्वगुरून् तर्पयामि
ॐ श्रीमन्तं रामानुजं तर्पयामि
ॐ श्रीपराङ्कुशदासं तर्पयामि
ॐ श्रीमद्यामुनमुनिं तर्पयामि
ॐ श्रीराममिश्रं तर्पयामि
ॐ श्रीपुण्डरीकाक्षं तर्पयामि
ॐ श्रीमन्नाथमुनिं तर्पयामि
ॐ श्रीमन्तं शठकोपं तर्पयामि
ॐ श्रीमन्तं विष्वक्सेनं तर्पयामि
ॐ श्रियं तर्पयामि
ॐ श्रीधरं तर्पयामि
ॐ सुदर्शनं हेतिराजं तर्पयामि
ॐ पाञ्चजन्यं शंखाधिपतिं तर्पयामि
ॐ कौमोदकीं गदाधिपतिं तर्पयामि
ॐ नन्दकं खड्गाधिपतिं तर्पयामि
ॐ शार्ङ्गं चापाधिपतिं तर्पयामि
ॐ श्रीवत्सं श्रीनिवासं तर्पयामि
ॐ कौस्तुभं सर्वरत्नाधिपतिं तर्पयामि
ॐ वैजयन्तीं वनमालां तर्पयामि

ॐ ह्रीं पुष्टीं तर्पयामि
ॐ ऐं सरस्वतीं तर्पयामि
ॐ द्रां निद्रां तर्पयामि
ॐ क्लीं कान्तिं तर्पयामि
ॐ कं पृथिवीं तर्पयामि
ॐ गं गरुडं तर्पयामि
ॐ किरीटं मुकुटाधिपतिं तर्पयामि
ॐ मकराकृतिकुण्डले तर्पयामि
ॐ कण्ठिकाभरणं तर्पयामि
ॐ किरीटमालाम् आपीडात्मिकां तर्पयामि
ॐ श्रीमत्तुलसीं तर्पयामि
ॐ हारं सर्वाभरणाधिपतिं तर्पयामि
ॐ काञ्चीगुणोज्वलम्पीताम्बरं तर्पयामि
ॐ सर्वाणि भगवद्भूषणानि तर्पयामि
ॐ सर्वान् भगवद्दिव्यायुधान् तर्पयामि
ॐ सर्वाः भगवत्पादसंवाहिनीः तर्पयामि
ॐ सर्वान् भगवत्परिकरान् तर्पयामि
ॐ अनन्तं तर्पयामि
ॐ विष्वक्सेनं तर्पयामि
ॐ सूत्रवतीं तर्पयामि
ॐ गं गजाननं तर्पयामि
ॐ जं जयत्सेनं तर्पयामि
ॐ हं हयाननं तर्पयामि
ॐ कं कालप्रकृतिसंज्ञं तर्पयामि

ॐ सर्वान् विष्वक्सेनपरिजनान् तर्पयामि
ॐ चण्डं तर्पयामि
ॐ प्रचण्डं तर्पयामि
ॐ भद्रं तर्पयामि
ॐ सुभद्रं तर्पयामि
ॐ जयं तर्पयामि
ॐ विजयं तर्पयामि
ॐ धातारं तर्पयामि
ॐ विधातारं तर्पयामि
ॐ कुमुदं सायुधं सपरिवारं सशक्तिकं तर्पयामि
ॐ कुमुदाक्षं सायुधं सपरिवारं सशक्तिकं तर्पयामि
ॐ पुण्डरीकं सायुधं सपरिवारं सशक्तिकं तर्पयामि
ॐ वामनं सायुधं सपरिवारं सशक्तिकं तर्पयामि
ॐ शङ्कुकर्णं सायुधं सपरिवारं सशक्तिकं तर्पयामि
ॐ सर्पनेत्रं सायुधं सपरिवारं सशक्तिकं तर्पयामि
ॐ सुमुखं सायुधं सपरिवारं सशक्तिकं तर्पयामि
ॐ सुप्रतिष्ठितं सायुधं सपरिवारं सशक्तिकं तर्पयामि
ॐ सर्वान् भगवद्गणाधिपतीन् तर्पयामि
ॐ नित्यान् तर्पयामि
ॐ मुक्तान् तर्पयामि
ॐ दिव्यान् तर्पयामि
ॐ समस्तपरिवारविशिष्टं श्रीमन्तं नारायणं तर्पयामि

ॐ अस्मत्पितृपितामहप्रपितामहात्मकान् सपत्नीकान् सर्वपरिवारविशिष्टान् अनिरुद्ध-प्रद्युम्न-सङ्कर्षण-वासुदेवान् तर्पयामि।

ततो जानुनी भूमौ निपात्य पयःकुसुमान्वितं विशेषार्घ्यं दद्यात् –

**शंखे कृत्वा तु पानीयं सपयं कुसुमान्वितम्।**
**विशेषार्घ्यं ततो दद्याद् यजमानः समाहितः॥**
**जानुभ्यामवनिं गत्वा मन्त्रैः सम्प्रार्थयेत्ततः।**
**नारायणदयासिन्धो जगन्नाथ जनार्दन॥**
**मामुद्धर महाविष्णो संसाराब्धेः सुदुस्तरात्।**
**सप्तजन्मकृतं पापं सञ्चितं मम पूर्वजैः॥**
**अनेनार्घ्यप्रदानेन सकलं तत्प्रणश्यतु।**
**मुक्तिं प्रयान्तु पितरो निरयादतिदारुणात्॥**
**वियोनिञ्च गता ये वै पापं कृत्वा सुदारुणम्।**
**येऽतीता ये भविष्याश्च सम्प्रजाता कुले मम॥**
**मया दत्तार्घ्यदानेन तान्समुद्धर माधव।**

इत्यर्घ्यं दत्वा कर्पूरादिना नीराज्य प्रार्थयेत् –

**यज्जन्मनः प्रभृति मोहवशं गतेन नानापराधशतमाचरितं मया ते।**
**अन्तर्बहिश्च सकलं तव पश्यतोऽपि क्षन्तुं त्वमर्हसि हरे करुणावशेन॥**
**स त्वं प्रसीद भगवन् कुरुमय्यनाथे**
**विष्णो कृपां परमकारुणिकः किल त्वम्।**
**संसारसागरनिमग्नमनन्तदीनम्**
**उद्धर्तुमर्हसि हरे करुणावशेन॥**

इति प्रणम्य पूर्णाहुतिं कृत्वा उत्तरपरिषेचनादिकं विधाय चतसृषु दिक्षु पार्षदेभ्यो बलिं दद्यात् –

पायसपिण्डान् पुटके निधाय दीपं प्रज्वाल्य –

पूर्वे –

**ॐ आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशि स्थिताः।**
**प्रसन्नाः परितुष्टास्ते गृह्णन्तु बलिमुत्तमम्॥**

दक्षिणे -

**ॐ वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः ।**
**भूमौ व्योम्नि स्थिता ये च बलिं गृह्णन्तु ते त्वमुम् ॥**

पश्चिमे -

**ॐ विनायकाः क्षेत्रपाला ये चान्ये बलिकाङ्क्षिणः ।**
**पूषाद्याः पार्षदाश्चैव प्रतिगृह्णन्तु ते बलिम् ॥**

उत्तरे -

**ॐ कुमुदाद्याश्च ये भूताः सर्वतोदिक्षु संस्थिताः ।**
**आगच्छन्तु च ते सर्वे गृह्णन्तु बलिमुत्तमम् ॥**

इति बलीन् प्रदद्यात्। (विश्रान्तिसमये ४१० पृष्ठोक्तप्रकारेण पारायणनिवेदनं कृत्वा नीराजनं पुष्पाञ्जलिञ्च कुर्यात् । समापनदिवसे तु शरणागतिगद्यपाठानन्तरमेव पारायणनिवेदनं कुर्यात्। )

ततः आमन्त्रितचतुर्विंशतिव्यूहरूपिणो ब्राह्मणान् चन्दनपुष्पमालाभिः अलङ्कृत्य स्वञ्चालङ्कृत्य सर्वेषां हस्तेषु सशिखान् इक्षुदण्डान् दत्वा तैः सह यागभूमिं देवागारं च परिक्रामेत् । परिक्रमावसरे आचार्यादयः सर्वे यथायथं विष्णुसहस्रनाम-पञ्चसूक्त-गद्यत्रय-जितन्तेस्तोत्र-स्तोत्ररत्न-वैकुण्ठस्तवादीन् पठेयुः । यदि च नगरपरिक्रमणं स्यात्तर्हि मार्गस्थैः तेषां गन्धपुष्पवस्त्रदक्षिणादिभिः यथाशक्ति पूजा कर्तव्या । एवं ग्रामं मन्दिरं यागभूमिञ्च परिक्रम्य पुनर्यागभूमिमागत्य नीराजनं विधाय नारायणोपनिषदं पठन्तः इक्षुदण्डान् भञ्जयेयुः ।

## नारायणोपनिषत्

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहैं।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति । नारायणात्प्राणो जायते। मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी। नारायणाद् ब्रह्मा जायते । नारायणाद् रुद्रो जायते । नारायणादिन्द्रो जायते । नारायणात्प्रजापतयः प्रजायन्ते । नारायणाद् द्वादशादित्या रुद्रा वसवः सर्वाणि छन्दाꣳसि। नारायणादेव समुत्पद्यन्ते। नारायणात् प्रवर्तन्ते। नारायणे प्रलीयन्ते। एतदृग्वेदशिरो योऽधीते ॥१॥

ॐ अथ नित्यो नारायणः। ब्रह्मा नारायणः। शिवश्च नारायणः। शक्रश्च नारायणः । कालश्च नारायणः । दिशश्च नारायणः । विदिशश्च नारायणः । ऊर्ध्वञ्च नारायणः । अधश्च नारायणः । अन्तर्बहिश्च नारायणः । नारायण एवेदं सर्वम् । यतद्भूतं यच्च भव्यम्ँ । निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः । न द्वितीयोँऽस्ति कश्चित् । य एवं वेद । स विष्णुरेव भवति स विष्णुरेव भवति। एतद्यजुर्वेदशिरो योऽधीते ॥२॥

ॐ इत्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणाय इत्युपरिष्टात्। ॐ इत्येकाक्षरम् । नम इति द्वे अक्षरे । नारायणाय इति पञ्चाँक्षराणि । एतद्वै नारायणस्याष्टाक्षरं पदम् । यो ह वै नारायणस्याष्टाक्षरं पदमध्येति अनपब्रुवः सर्वमायुरेति ।

विन्दते प्राजापत्यं रायस्पोषङ्गौपत्यम् ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति। एतच्छामवेदशिरो योऽधीते ॥३॥

ॐ प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम्। अकार उकारो मकार इति। तानेकधा समभरत्तदेतदोमिति। यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात्। ॐ नमो नारायणाय इति मन्त्रोपासकः। वैकुण्ठभुवनं गमिष्यति। तदिदं पुण्डरीकं विज्ञानघनम्। तस्मात्तडिदाभ मात्रम्। ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः। ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युत इति। सर्वभूतस्थमेकं वै नारायणः कारणपुरुषमकारणं परंब्रह्मोम्। एतदथर्वशीरो योऽधीते ॥४॥

प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायमधीयानो दिवसकृतं पापं नाशयति। सायं प्रातरधीयानः पापोऽपापो भवति। मध्यन्दिनमादित्याभिमुखोऽधीयानः सद्यः पञ्चमहापातकोपपातकेभ्यः प्रमुच्यते। सर्ववेद पारायणपुण्यं लभते। नारायणसायुज्यमवाप्नोति। श्रीमन्नारायणसायुज्यमवाप्नोति। य एवं वेद। इत्युपनिषत्।

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ इति नारायणोपनिषत् ॥

इति पठित्वा इक्षुदण्डान् द्विधा विभज्य शरणागतिगद्येन वैकुण्ठगद्येन भगवन्तं प्रणमेत्। तद्यथा – यजमानादयः दण्डवत् साष्टङ्गं कुर्युः, आचार्यः शरणागति–वैकुण्ठगद्यादिकं पठेत्।

## अथ शरणागतिगद्यम्

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धो :
रामानुजस्य चरणौ शरणं प्रपद्ये ॥१॥
वन्दे वेदान्तकर्पूरचामीकरकरण्डकम् ।
रामानुजार्यमार्याणां चूडामणिमहर्निशम् ॥२॥

ॐ भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्यशीला-द्यनवधिकातिशयासङ्ख्येयकल्याणगुणगणां, पद्मवनालयां भगवतीं श्रियं देवीं नित्यानपायिनीं निरवद्यां देवदेवदिव्यमहिषीम्, अखिलजगन्मातरम्, अस्मन्मातरम्, अशरण्यशरण्याम्, अनन्यशरणः शरणमहं प्रपद्ये ॥१॥

पारमार्थिकभगवच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपर-ज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानव-धिकातिशयप्रियभगवदनुभवजनितानवधिकातिशयप्रीतिकारिता-शेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकैङ्कर्यप्राप्त्यपेक्षया पारमा-र्थिकी भगवच्चरणारविन्दशरणागतिर्यथावस्थिता अविरताऽस्तु मे ॥२॥ अस्तु ते ॥३॥ तयैव सर्वं सम्पत्स्यते ॥४॥

अखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षण अनन्तज्ञानानन्दैकस्वरूप!स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुत-निरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणनिधिदि-व्यरूप! स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजस्सौशी-ल्यवात्सल्यमार्दवार्जवसौहार्दसाम्यकारुण्यमाधुर्यगाम्भीर्यौदार्यचातुर्यस्थैर्य-धैर्यशौर्यपराक्रमसत्यकामसत्यसङ्कल्पकृतित्वकृतज्ञताद्यसङ्ख्येयकल्याण-

गुणगणौघमहार्णव ! स्वोचितविविधविचित्रानन्ताश्चर्यनित्यनिरवद्य-निरतिशयसुगन्धनिरतिशयसुखस्पर्शनिरतिशयौज्वल्यकिरीटमुकुट-चूडावतंसमकरकुण्डलग्रैवेयकहारकेयूरकटकश्रीवत्सकौस्तुभमु-क्तादामोदरबन्धनपीताम्बरकाञ्चीगुणनूपुराद्यपरिमितदिव्यभूषण ! स्वानुरूपाचिन्त्यशक्तिशङ्खचक्रगदासिशार्ङ्गाद्यसङ्ख्येयनित्यनिर-वद्यनिरतिशयकल्याणदिव्यायुध ! स्वाभिमतनित्यनिरवद्यानुरूप-स्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासङ्ख्येय-कल्याणगुणगणश्रीवल्लभ ! एवम्भूतभूमिनीलानायक ! स्वच्छन्दानुवर्तिस्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्य-निरवद्यनिरतिशयज्ञानक्रियैश्वर्याद्यनन्तगुणगणशेषशेषाशनगरुडप्र-मुखनानाविधानन्तपरिजनपरिचारिकापरिचरितचरणयुगल ! परम-योगिवाङ्मनसा परिच्छेद्यस्वरूपस्वभावस्वाभिमतविविधविचि-त्रानन्तभोग्यभोगोपकरणभोगस्थानसमृद्धानन्ताश्चर्यानन्तमहाविभ-वानन्तपरिमाणनित्यनिरवद्यनिरतिशयवैकुण्ठनाथ ! स्वसङ्कल्पा-नुविधायिस्वरूपस्थितिप्रवृत्तिस्वशेषतैकस्वभावप्रकृतिपुरुषकाला-त्मकविविधविचित्रानन्तभोग्यभोक्तृवर्गभोगोपकरणभोगस्थानरूप-निखिलजगदुदयविभवलयलील ! सत्यकाम ! सत्यसङ्कल्प ! परब्रह्मभूत ! पुरुषोत्तम ! महाविभूते ! श्रीमन् ! नारायण ! श्रीवैकुण्ठनाथ ! अपारकारुण्यसौशील्यवात्सल्यौदार्यैश्वर्यसौन्दर्य-महोदधे ! अनालोचितविशेषाशेषलोकशरण्य ! प्रणतार्त्तिहर ! आश्रितवात्सल्यैकजलधे!अनवरतविदितनिखिलभूतजातयाथात्म्य, अशेषचराचरभूतनिखिलनियमननिरत ! अशेषचिदचिद्वस्तुशेषिभूत! निखिलजगदाधार ! अखिलजगत्स्वामिन् ! अस्मत्स्वामिन् ! सत्यकाम ! सत्यसङ्कल्प ! सकलेतरविलक्षण ! अर्थिकल्पक ! आपत्सख ! श्रीमन् ! नारायण ! अशरण्यशरण्य ! अनन्यशरणः त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये ॥५॥

(अत्र द्वयम् ....)

पितरं मातरं दारान् पुत्रान् बन्धून् सखीन् गुरून्।
रत्नानि धनधान्यानि क्षेत्राणि च गृहाणि च ॥६॥
सर्वधर्मांश्च संत्यज्य सर्वकामाँश्च साक्षरान्।
लोकविक्रान्तचरणौ शरणं तेऽव्रजं विभो ॥७॥

त्वमेव माता च पिता त्वमेव,
त्वमेव बन्धुश्च गुरुस्त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव,
त्वमेव सर्वं मम देव देव ॥८॥

पिताऽसि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभाव ॥९॥

तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम्।
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम् ॥१०॥

मनोवाक्कायैरनादिकालप्रवृत्तानन्ताकृत्यकरणकृत्याकरणभगवदपचारभागवतापचारासह्यापचाररूपनानाविधानन्तापचारान् आरब्धकार्यान् अनारब्धकार्यान् कृतान् क्रियमाणान् करिष्यमाणाँश्च सर्वान् अशेषतः क्षमस्व ॥११॥

अनादिकालप्रवृत्तं विपरीतज्ञानम् आत्मविषयं कृत्स्नजगद्विषयञ्च विपरीतवृत्तञ्चाशेषविषयम् अद्यापि वर्तमानं वर्तिष्यमाणं च सर्वं क्षमस्व ॥१२॥

मदीयानादिकर्मप्रवाहप्रवृत्तां भगवत्स्वरूपतिरोधानकरीं विपरीतज्ञानजननीं स्वविषयायाश्च भोग्यबुद्धेर्जननीं देहेन्द्रियत्वेन भोग्यत्वेन सूक्ष्मरूपेण चावस्थितां दैवीं गुणमयीं मायां, दासभूतम् शरणागतोऽस्मि, तवास्मि दासः इति वक्तारं मां तारय ॥१३॥

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥
उदारास्सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितस्स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ॥
इति श्लोकत्रयोदितज्ञानिनं मा कुरुष्व ॥१४॥
पुरुषस्स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
भक्त्या त्वनन्यया शक्यः मद्भक्तिं लभते पराम् ॥

इति स्थानत्रयोदितपरभक्तियुक्तं मां कुरुष्व ॥१५॥

परभक्तिपरज्ञानपरमभक्त्येकस्वभावं मा कुरुष्व ॥१६॥

परभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभगवदनुभवोऽहं तथाविधभगवदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भवानि ।

एवं भूतमत्कैङ्कर्यप्राप्त्युपायतयाऽवक्लृप्तसमस्तवस्तुविहीनोऽपि, अनन्ततद्विरोधिपापाक्रान्तोऽपि, अनन्तमदपचारयुक्तोऽपि, अनन्तमदीयापचारयुक्तोऽपि, अनन्तासह्यापचारयुक्तोऽपि, तत्कार्यकारण-

भूतानादिविपरीताहङ्कारविमूढात्मस्वभावोऽपि, तदुभयकार्यकारण-भूतानादिविपरीतवासनासम्बद्धोऽपि, एतदनुगुणप्रकृतिविशेष-सम्बद्धोऽपि, एतन्मूलाध्यात्मिकाधिभौतिकाधिदैविकसुखदुःख-तद्धेतुतदितरोपेक्षणीयविषयानुभव ज्ञानसङ्कोचरूपमच्चरणारविन्द-युगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिविघ्नप्रतिहतोऽपि, येन केनापि प्रकारेण द्वयवक्ता त्वं, केवलं मदीययैव दयया निःशेषविनष्टसहेतुकमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपर-भक्तिविघ्नः परज्ञानपरमभक्तिमत्प्रसादलब्धमच्चरणरविन्दयुगलै-कान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिः, मत्प्रसादादेव साक्षा-त्कृतयथावस्थितमत्स्वरूपरूपगुणविभूतिलीलोपकरणविस्तारः, अपरोक्षसिद्धमन्नियाम्यतामद्दास्यैकरसात्मस्वभावात्मस्वरूपः, मदेकानुभवः, मद्दास्यैकप्रियः, परिपूर्णानवरतनित्यविशदतमानन्य-प्रयोजनानवधिकातिशयप्रियमदनुभवस्त्वं, तथाविधमदनुभवजनि-तानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूप-नित्यकिङ्करो भव ॥१८॥ एवम्भूतोऽसि ॥१९॥

आध्यात्मिकाधिभौतिकाधिदैविकदुःखविघ्नगन्धरहितस्त्वं द्वय-मर्थानुसन्धानेन सह सदैवं वक्ता यावच्छरीरपातमत्रैव श्रीरङ्गे सुखमास्स्व ॥२०॥

शरीरपातसमये तु केवलं मदीययैव दयया अतिप्रबुद्धः मामेव अवलोकयन् अप्रच्युतपूर्वसंस्कारमनोरथः, जीर्णमिव वस्त्रं सुखेनेमां प्रकृतिं स्थूलसूक्ष्मरूपां विसृज्य तदानीमेव मत्प्रसाद-लब्धमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरम-भक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकाति-शयप्रियमदनुभवस्त्वं तथाविधमदनुभवजनितानवधिकातिशय-

प्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भविष्यसि ॥२१॥ मा ते भूदत्र संशयः ॥२२॥

अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन। रामो द्विर्नाभिभाषते।

सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम॥
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।

इति मयैव ह्युक्तम् ॥२३॥ अतस्त्वं तव तत्त्वतो मज्ज्ञानदर्शनप्राप्तिषु निस्संशयस्सुखमास्स्व ॥२४॥

अन्त्यकाले स्मृतिर्या तु तव कैङ्कर्यकारिता।
तामेनां भगवन्नद्य क्रियमाणां कुरुष्व मे ॥२५॥

॥ इति श्रीभगवद्रामानुजविरचिते गद्यत्रये प्रथमं शरणागतिगद्यं सम्पूर्णम् ॥

## अथ श्रीवैकुण्ठगद्यम्

यामुनार्यसुधाम्भोधिमवगाह्य यथामति।
आदाय भक्तियोगाख्यं रत्नं सन्दर्शयाम्यहम् ॥१॥

स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदं, क्लेशकर्माद्यशेषदोषासंस्पृष्टं स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येयकल्याणगुणगणौघमहार्णवं परमपुरुषं भगवन्तं नारायणं, स्वामित्वेन सुहृत्त्वेन गुरुत्वेन च परिगृह्य ऐकान्तिकात्यन्तिकतत्पादाम्बुजद्वयपरिचर्यैकमनोरथः तत्प्राप्तये च तत्पादाम्बुजद्वयप्रपत्तेरन्यन्न मे कल्पकोटिसहस्रेणापि साधनमस्तीति

मन्वानः तस्यैव भगवतो नारायणस्य अखिलसत्त्वदयैकसागरस्य अनालोचितगुणागुणाखण्डजनानुकूलामर्यादशीलवतः स्वाभाविकानवधिकातिशयगुणवत्तया देवतिर्यङ्मनुष्याद्यखिलजनहृदयानन्दनस्य आश्रितवात्सल्यैकजलधेः भक्तजनसंश्लेषैकभोगस्य नित्यज्ञानक्रियैश्वर्यादिभोगसामग्रीसमृद्धस्य महाविभूतेः श्रीमतश्चरणारविन्दयुगलम्, अनन्यात्मसञ्जीवनेन तद्गतसर्वभावेन शरणमनुव्रजेत् ॥२॥

ततश्च प्रत्यहम्, आत्मोज्जीवनाय एवमनुस्मरेत् ॥३॥

चतुर्दशभुवनात्मकमण्डं दशगुणितोत्तरं चावरणसप्तकं समस्तं कार्यकारणजातमतीत्य वर्तमाने परमव्योमशब्दाभिधेये ब्रह्मादीनां वाङ्मनसागोचरे श्रीमति वैकुण्ठे दिव्यलोके सनकविधिशिवादिभिरप्यचिन्त्यस्वभावैश्वर्यैर्नित्यसिद्धैरनन्तैः भगवदानुकूल्यैकभोगैः दिव्यपुरुषैर्महात्मभिरापूरिते तेषामपीयत्परिमाणम्, इयदैश्वर्यम्, ईदृशस्वभावम्, इति परिच्छेत्तुमयोग्ये दिव्यावरणशतसहस्रावृते दिव्यकल्पकतरूपशोभिते दिव्योद्यानशतसहस्रकोटिभिरावृते अतिप्रमाणे दिव्यायतने कस्मिँश्चिद्विचित्रदिव्यरत्नमये दिव्यास्थानमण्डपे दिव्यरत्नस्तम्भशतसहस्रकोटिभिरूपशोभिते दिव्यनानारत्नकृतस्थलविचित्रिते दिव्यालङ्कारालङ्कृते परितः पतितैः पतमानैः पादपस्थैश्च नानागन्धवर्णैर्दिव्यपुष्पैश्शोभमानैः दिव्यपुष्पोपवनैरूपशोभिते, संकीर्णपारिजातादिकल्पद्रुमोपशोभितैः असङ्कीर्णैश्च कैश्चिदन्तस्थपुष्परत्नादिनिर्मितदिव्यलीलामण्डपशतसहस्रोपशोभितैस्सर्वदा अनुभूयमानैरपि अपूर्ववदाश्चर्यमावहद्भिः क्रीडाशैलशतसहस्रैरलङ्कृतैः कैश्चिन्नारायणदिव्यलीलाऽ-

साधारणैः कैश्चित्पद्मवनालयादिव्यलीलाऽसाधारणैस्साधारणैश्च कैश्चिच्छुकशारिकामयूरकोकिलादिभिः कोमलकूजितैः आकुलैः दिव्योद्यानशतसहस्रैरावृते, णिमुक्ताप्रवालकृतसोपानैर्दिव्यामलामृतरसोदकैर्दिव्याण्डजवरैः अतिरमणीयदर्शनैरतिमनोहरमधुरस्वरैः आकुलैः अन्तःस्थमुक्तामयदिव्यक्रीडास्थानोपशोभितैः दिव्यसौगन्धिकवापीशतसहस्रैः दिव्यराजहंसावलीविराजितैः आवृते निरस्तातिशयानन्दैकरसतया चानन्त्याच्च प्रविष्टानुन्मादयद्भिः क्रीडोद्देशैर्विराजिते तत्र तत्र कृतदिव्यपुष्पपर्यङ्कोपशोभिते नानापुष्पासवास्वादमत्तभृङ्गावलीभिः उद्गीयमानदिव्यगान्धर्वेणापूरिते चन्दनागरुकर्पूरदिव्यपुष्पावगाहिमन्दानिलासेव्यमाने मध्ये पुष्पसञ्चयविचित्रिते महति दिव्ययोगपर्यङ्के अनन्तभोगिनि, श्रीमद्वैकुण्ठैश्वर्यादिदिव्यलोकम् आत्मकान्त्या विश्वमाप्याययन्त्या शेषशेषाशनादिसर्वपरिजनं भगवतस्तत्तदवस्थोचितपरिचर्यायाम् आज्ञापयन्त्या शीलरूपगुणविलासादिभिरात्मानुरूपया श्रिया सहासीनम् प्रत्यग्रोन्मीलितसरसिजसदृशनयनयुगलं स्वच्छनीलजीमूतसङ्काशम्, अत्युज्ज्वलपीतवाससं, स्वया प्रभया अतिनिर्मलया अतिशीतलया अतिकोमलया स्वच्छया माणिक्याभया कृत्स्नं जगद्भासयन्तम्, अचिन्त्यदिव्याद्भुतनित्ययौवनस्वभावलावण्यमयामृतसागरम्, अतिसौकुमार्यादीषत्प्रस्विन्वदालक्ष्यमाणललाटफलकदिव्यालकावलीविराजितं प्रबुद्धमुग्धाम्बुजचारुलोचनं सविभ्रमभ्रूलतमुज्ज्वलाधरं शुचिस्मितं, कोमलगण्डमुन्नसम् उदग्रपीनांसविलम्बिकुण्डलालकावलीबन्धुरकम्बुकन्धरं प्रियावतंसोत्पलकर्णभूषणश्लथालकाबन्धविमर्दशंसिभिः, चतुर्भिराजानुविलम्बिभिर्भुजैर्विराजितम् अतिकोमलदिव्यरेखालङ्कृताताम्रकर-

तलं, दिव्याङ्गुलीयकविराजितम्, अतिकोमलदिव्यनखावलीविराजितातिरक्तङ्गुलीभिरलङ्कृतं तत्क्षणोन्मीलितपुण्डरीकसदृशचरणयुगलम्, अतिमनोहरकिरीटमुकुटचूडावतंसमकरकुण्डलग्रैवेयकहारकेयूरकटकश्रीवत्सकौस्तुभमुक्तादामोदरबन्धनपीताम्बरकाञ्चीगुणनूपुरादिभिरत्यन्तसुखस्पर्शैः दिर्व्यगन्धैर्भूषणैर्भूषितं श्रीमत्या वैजयन्त्या वनमालया विराजितं, शङ्खचक्रगदासिशार्ङ्गादिदिव्यायुधैस्सेव्यमानं स्वसङ्कल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादिके श्रीमति विष्वक्सेने न्यस्तसमस्तात्मैश्वर्यं वैनतेयादिभिस्स्वभावतो निरस्तसमस्तसांसारिकस्वभावैः भगवत्परिचर्याकरणयोग्यैः भगवत्परिचर्यैकभोगैर्नित्यसिद्धैरनन्तैर्यथायोगं सेव्यमानम्, आत्मभोगेनानुसंहितपरादिकालदिव्यामलकोमलावलोकनेनविश्वमाह्लादयन्तम् ईषदुन्मीलितमुखाम्बुजोदरविनिर्गतेन दिव्यानयनारविन्दशोभाजनकेन दिव्यगाम्भीर्यौदार्यसौन्दर्यमाधुर्याद्यनवधिकगुणगणविभूषितेन अतिमनोहरदिव्यभावगर्भेण दिव्यलीलालापामृतेन अखिलजनहृदयान्तराण्यापूरयन्तं भगवन्तं नारायणं ध्यानयोगेन दृष्ट्वा, ततो भगवतो नित्यस्वाम्यम्, आत्मनो नित्यदास्यं च यथावस्थितमनुसन्धाय, कदाऽहं भगवन्तं नारायणं मम कुलनाथं मम कुलदैवतं मम कुलधनं मम भोग्यं मम मातरं मम पितरं मम सर्वं साक्षात्करवाणि चक्षुषा? कदाहं भगवत्पादाम्बुजद्वयं शिरसा धारयिष्यामि ? कदाऽहं भगवत्पादाम्बुजद्वयपरिचर्याशया निरस्तसमस्तेतरभोगाशः अपगतसमस्तसांसारिकस्वभावः तत्पादम्बुजद्वयं प्रवेक्ष्यामि, कदाऽहं भगवत्पादाम्बुजद्वयपरिचर्याकरणयोग्यः तदेकभोगस्तत्पादौ परिचरिष्यामि ? कदा मां भगवान् स्वकीयया अतिशीतलया दृशा अवलोक्य स्निग्ध-

गम्भीरमधुरया गिरा परिचर्यायाम् आज्ञापयिष्यति ? इति भगवत्परिचर्यायाम् आशां वर्धयित्वा तयैवाशया तत्प्रसादोपबृंहितया भगवन्तमुपेत्य, दूरादेव भगवन्तं शेषभोगे श्रिया सहासीनं वैनतेयादिभिः सेव्यमानं समस्तपरिवाराय श्रीमते नारायणाय नमः, इति प्रणम्योत्थायोत्थाय पुनः पुनः प्रणम्य अत्यन्तसाध्वसविनयावनतो भूत्वा, भगवत्पार्षदगणनायकैर्द्वारपालैः कृपया स्नेहगर्भया दृशाऽवलोकितः, सम्यगभिवन्दितैस्तैस्तैरेवानुमतः भगवन्तमुपेत्य, श्रीमता मूलमन्त्रेण भगवन्, माम् ऐकान्तिकात्यन्तिकपरिचर्याकरणाय परिगृह्णीष्व इति याचमानः प्रणम्य आत्मानं भगवते निवेदयेत् ॥४॥

ततो भगवता स्वयमेवात्मसञ्जीवनेनामर्यादशीलवताऽतिप्रेमान्वितेनावलोकनेनावलोक्य सर्वदेशसर्वकालसर्वावस्थोचितात्यन्तशेषभावाय स्वीकृतोऽनुज्ञातश्च अत्यन्तसाध्वसविनयावनतः किङ्कुर्वाणः कृताञ्जलिपुटो भगवन्तमुपासीत ॥५॥

ततश्चानुभूयमानभावविशेषः निरतिशयप्रीत्या अन्यत् किञ्चित्कर्तुं द्रष्टुं स्मर्तुम् अशक्तः पुनरपि शेषभावमेव याचमानः भगवन्तमेव अविच्छिन्नस्रोतोरूपेणावलोकनेनावलोकयन्नासीत ।६। ततो भगवता स्वयमेवात्मसञ्जीवनेनावलोकनेनावलोक्य सस्मितमाहूय समस्तक्लेशापहं निरतिशयसुखावहमात्मीयं श्रीमत्पादारविन्दयुगलं शिरसि कृतं ध्यात्वामृतसागरान्तर्निमग्नसर्वावयवः सुखमासीत ॥७॥

लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नो<br>
योऽसौपुरासमजनिष्टजगद्धितार्थम् ।<br>
प्राच्यं प्रकाशयतु नः परमं रहस्यं<br>
संवाद एष शरणागतिमन्त्रसारः ॥

॥ इति श्रीभगवद्रामानुजविरचिते गद्यत्रये द्वितीयं श्रीवैकुण्ठगद्यं सम्पूर्णम् ॥

इत्यनेन गद्येन प्रणम्योत्थाय पुष्पाण्यादाय प्रार्थयेत् –

**यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्तिदिव्यैस्स्तवैः**
**वेदैस्साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।**
**ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो**
**यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥**

## पारायणनिवेदनम्

**ॐ स्वस्ति, हे देवदेवोत्तम, देवतासार्वभौम, अखिलकोटिब्रह्माण्डनायक, वेदवेदान्तवेद्य, पुराणपुरुषोत्तम, श्रीभूनीलासमेत श्रीवैकुण्ठनाथ, स्वामिन् अमुकगोत्रस्य/ गोत्रायाः अमुकनाम्नः/नाम्न्याः, एकाह्निक (द्व्याह्निक/त्र्याह्निक/पञ्चाह्निक) श्रीवैकुण्ठोत्सवपूर्वकनारायणबलिकर्मणि अद्य अमुकदिवसे प्रातः/ मध्याह्न/सायंकाले प्रातः/मध्याह्न/सायंकालिकसमाराधना-समाप्तिसमये वेदेतिहासपुराणक्षेत्रमाहात्म्यस्तोत्रपाठगद्यपद्यदिव्य-प्रबन्धादीन् अवधारय ।**

१. तत्रादौ ऋग्वेदश्रवणप्रिय ऋग्वेदम् अवधारय

**ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ।**

२. यजुर्वेदम् अवधारय

**ॐ इषेत्वोर्ज्जेत्वा वायवस्थदेवो वः सविता प्रार्प्पयातु श्रेष्ठतमाय कर्मण आप्प्यायध्व मघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मामा वस्तेन ईशतमाघशꣳसो ध्रुवा अस्मिन् गोपतौस्यात बह्वीर्यजमानस्य पशून्पाहि ॥**

३. सामवेदम् अवधारय

**ॐ अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥**

४. अथर्ववेदम् अवधारय

**ॐ शन्नो देवीरभिष्टय आपो भवन्तु वीतये। शंयोरभिश्रवन्तु नः ॥**

५. उपनिषदम् अवधारय

**ॐ इत्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणाय इत्युपरिष्टात्। ॐ इत्येकाक्षरम् । नम इति द्वे अक्षरे । नारायणाय इति पञ्चाक्षराणि । एतद्वै नारायणस्याष्टाक्षरं पदम् । यो ह वै नारायणस्याष्टाक्षरं पदमध्येति अनपब्रुवः सर्वमायुरेति। विन्दते प्राजापत्यं रायस्पोषङ्गौपत्यम् ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति। एतच्छामवेदशिरो योऽधीते ॥**

६. कल्पसूत्रम् अवधारय

**ॐ अथ कर्माण्याचाराद्यानि गृह्यन्त उदगयन पूर्वपक्षाह पुण्याहेषु कार्याणि यज्ञोपवीतिना प्रदक्षिणम् ॥**

७. गृह्यसूत्रम् अवधारय

**ॐ अथातस्समयाचारिकान् धर्मान् व्याख्यास्यामः। धर्मज्ञसमयः प्रमाणं वेदाश्च चत्वारो वर्णाः ब्राह्मणक्षत्रियवैश्यशूद्राः तेषां पूर्वतः पूर्वो जन्मतः श्रेयान् ॥**

८. श्रीमद्वाल्मीकीयरामायणम् अवधारय

**ॐ तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।**
**नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥**
**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीस्समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥**

९. श्रीविष्णुपुराणम् अवधारय

ॐ अंशैष्षड्भिस्समाकीर्णमङ्गैर्वेदमिवापरम् ।
पुराणं वैष्णवं चक्रे यस्तं वन्दे पराशरम् ॥
पराशरं मुनिवरं कृतपौर्वाह्णिकक्रियम् ।
मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ॥

१०. श्रीमद्भागवतम् अवधारय

ॐ जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्,
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा,
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥

११. श्रीभाष्यम् अवधारय

ॐ अखिलभुवनजन्मस्थेमभङ्गादिलीले,
विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे,
भवतु मम परस्मिन् शेमुषी भक्तिरूपा ॥
पाराशर्यवचस्सुधामुपनिषद्दुग्धाब्धिमध्योद्धृताम्,
संसाराग्निविदीपनव्यपगतप्राणात्मसञ्जीवनीम् ।
पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थिताम्,
आनीतां तु निजाक्षरैस्सुमनसो भौमाः पिबन्त्वन्वहम् ॥
भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुः,
तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते ।
अथातो ब्रह्मजिज्ञासा ।

अत्रायमथशब्दः आनन्तर्ये भवति, अतःशब्दो वृत्तस्य हेतुभावे, अधीतसाङ्गसशिरस्कवेदस्याधिगताल्पास्थिरफलकेवलकर्मज्ञानतया सञ्जातमोक्षाभिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनी । ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा।

१२. श्रीगीताभाष्यम् अवधारय

ॐश्रियःपतिः निखिलहेयप्रत्यनीककल्याणैकतानः स्वेतरसमस्तवस्तु-विलक्षणानन्तज्ञानानन्दैकस्वरूपः स्वाभाविकानवधिकातिशयज्ञान-बलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसङ्ख्येयकल्याणगुणगणमहोदधिः, स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्य-सौगन्ध्यसौन्दर्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणनिधिदिव्यरूपः, स्वोचितविविधविचित्रानन्ताश्चर्यनित्यनिरवद्यापरिमितदिव्यभूषणः, स्वानुरूपासङ्ख्येयाचिन्त्यशक्तिनित्यनिरवद्यनिरतिशयकल्याणदिव्या-युधः, स्वाभिमतानुरूपनित्यनिरवद्यस्वरूपरूपगुणविभवैश्वर्यशीला-द्यनवधिकातिशयासङ्ख्येयकल्याणगुणगणश्रीवल्लभः, स्वसङ्कल्पानुविधायिस्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूप-नित्यनिरवद्यनिरतिशयज्ञानक्रियैश्वर्याद्यनन्तगुणगणापरिमितसूरिभिः अनवरताभिष्टुतचरणयुगलः, वाङ्मनसापरिच्छेद्यस्वरूपस्वभावः, स्वोचितविविधविचित्रानन्तभोग्यभोगोपकरणभोगस्थानसमृद्धानन्ता-श्चर्यानन्तमहाविभवानन्तपरिमाणनित्यनिरवद्याक्षरपरमव्योमनिलयः, विविधविचित्रानन्तभोग्ययोक्तृवर्गपरिपूर्णनिखिलजगदुदयविभवलयलीलः, परं ब्रह्म पुरुषोत्तमो नारायणो ब्रह्मादिस्थावरान्तम् अखिलं जगत् सृष्ट्वा स्वेन रूपेण अवस्थितः, ब्रह्मादिदेवमनुष्याणां ध्यानाराधनाद्यगोचरः, अपि अपारकारुण्यसौशील्यवात्सल्यौदार्यमहो-दधिः, स्वमेव रूपं तत्तत्सजातीयसंस्थानं स्वस्वभावम् अजहद् एव कुर्वन् तेषु तेषु लोकेषु अवतीर्य अवतीर्य तैः तैः आराधितः तत्तदिष्टानुरूपं धर्मार्थकाममोक्षाख्यं फलं प्रयच्छन्, भूभारावतारणाप-

देशेन अस्मदादीनाम् अपि समाश्रयणीयत्वाय अवतीर्य उर्व्यां सकलमनुजनयनविषयगतां गतः परावरनिखिलजनमनोनयनहारि-दिव्यचेष्टितानि कुर्वन्, पूतनाशकटयमलार्जुनारिष्टप्रलम्बधेनुक-कालीयकेशिकुवलयापीडचाणूरमुष्टिकतोसलकंसादीन् निहत्य अनवधिकदयासौहार्दानुरागगर्भावलोकनालापामृतैः विश्वम् आप्याययन् निरतिशयसौन्दर्यसौशील्यादिगुणगणाविष्कारेण अक्रूरमालाकारादीन् परमभागवतान् कृत्वा पाण्डुतनययुद्धप्रोत्साहन-व्याजेन परमपुरुषार्थलक्षणमोक्षसाधनतया वेदान्तोदितं स्वविषयं ज्ञान-कर्मानुगृहीतं भक्तियोगम् अवतारयामास।

**धृतराष्ट्र उवाच**

**धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।**
**मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥**

१३. श्रीविष्णुसहस्रनामस्तोत्रम् अवधारय

**ॐ विश्वं विष्णोर्वषट्कारः भूतभव्यभवत्प्रभुः।**
**भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः॥**

१४.श्रीस्तोत्ररत्नम् अवधारय

**ॐ यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः।**
**वस्तुतामुपयातोऽहं यामुनेयं नमामि तम्॥**
**यन्मूर्ध्नि मे श्रुतिशिरस्सु च भाति यस्मिन्,**
**अस्मन्मनोरथपथस्सकलस्समेति।**
**स्तोष्यामि नः कुलधनं कुलदैवतं तत्,**
**पादारविन्दमरविन्दविलोचनस्य॥**

१५. रहस्यग्रन्थेषु श्रीसहस्रगीतिम् अवधारय

भक्तामृतं विश्वजनानुमोदनं
सर्वार्थदं श्रीशठकोपवाङ्मयम्।
सहस्रशाखोपनिषत्समागमं
नमाम्यहं द्राविडवेदसागरम्॥
(उयर्वर उयर् नलम् ★ उडैयवन् यवन् अवन् ★
मयर्वर मदि नलम् ★ अरुळिनन् यवन् अवन् ★
अयर्वरुम् अमरर्गळ् ★ अविदि यवन् अवन् ★
तुयररु शुडरडि ★ ताळुदळन् मनने ! )

उच्छ्रायशून्यमुच्छ्रयदानन्दवान् यः सोऽज्ञाननिवृत्तिमत्यानन्दं दत्तवान् यः स विस्मृतिशून्यामराधिपतिर्यस्तस्य दुःखनिवर्तकतेजश्चरणावाश्रित्य वर्द्धस्व मन्मनः॥

१६.श्रीवचनभूषणम् अवधारय

लोकाचार्याय गुरवे कृष्णपादस्य सूनवे।
संसारभोगिसन्दष्टजीवजीवातवे नमः॥
आकण्ठोत्कण्ठवैकुण्ठप्रियाणां कण्ठभूषणम्।
गुरुणा जगतामुक्तं व्याप्तं वचनभूषणम्॥
वेदार्थो निश्चेतव्यः स्मृतीतिहासपुराणैः।१।
स्मृत्या पूर्वाभागो निर्णीयते, अन्याभ्यां द्वाभ्यामुत्तरभागार्थो निर्णीयते।२।
अनयोरुभयोर्मध्ये इतिहासः प्रबलः।३।
तेन स पूर्वं भवति॥४॥

१७. श्रीमुमुक्षुप्पडीम् अवधारय

लोकाचार्याय गुरवे कृष्णपादस्य सूनवे।
संसारभोगिसन्दष्टजीवजीवातवे नमः॥

**ॐ मुमुक्षोर्ज्ञातव्यानि रहस्यानि त्रीणि ॥**

**तत्र प्रथमरहस्यं श्रीमन्त्रम् ॥**

१८. श्रीदिव्यप्रबन्धम् अवधारय

**★ पल्लाण्डु पल्लाण्डु पल्लयिरत्ताण्डु**
**पलकोडि नूरायिरम्**
**मल्लाण्ड तिण्डोल् मणिवण्णा !**
**उन् शेवडि शेव्वि तिरुक्काप्पु ॥ १॥**
**★ अडियोमोडुं निन्नोडुं पिरिविन्रि आयिरं पल्लाण्डु**
**वडिवाय् निन् वलमार्बिनिल् वाडिगिन्र मंगैयुं पल्लाण्डु**
**वडिवार शोदि वलत्तुरैयुं शुडराडियुं पल्लाण्डु**
**पडैपोर पुक्कु मुषङ्गुम् अप्पाञ्चशन्नियमुं पल्लाण्डे ॥ २ ॥**
ॐ स्वस्ति ।

(अत्र येषां ग्रन्थानां पारायणं विहितमस्ति, तेषामेव ग्रन्थानां पाठाः निवेदनीयाः, एतदतिरिक्तानाम् अन्येषाञ्च ग्रन्थानां पारायणं विहितमस्ति चेत्, तेषाञ्च पाठाः निवेदनीयाः)।

## सम्भावनावितरणप्रकारः

१. श्रीभगवतः सम्भावना

श्रीसुदर्शनादि-आयुध-श्रीभूनीलागोदादिसहितस्य भगवतः सम्भावनाम् आदाय -

**ॐ वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तुपारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदास्ते । धातापुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान् प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ॥**

**ॐ श्रीदेवदेवोत्तमस्य देवतासार्वभौमस्य अखिलकोटिब्रह्माण्ड-नायकस्य जगत्कुटुम्बिनः जगद्रक्षणार्थमवतीर्णस्य अर्चास्वरूपिणः श्रीभूनीलासमेतस्य सायुधस्य श्रीमन्नारायणस्वामिनः इयं सम्भावना ॥**

इति भगवते सम्भावनां समर्पयेत्।

२. श्रीमहालक्ष्म्याः सम्भावना

ततः श्रीमहालक्ष्म्याः सम्भावनाम् आदाय –

**ॐ गृणाहि घृतवती सवितराधिपत्यः पयस्वती रन्तिराशानो अस्तु ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोतौ ॥ बृहस्पतिर्मातरिश्वोत वयुस्सन्धुवानां वाता अभिनो गृणन्तु । विष्टम्भो दिवोधरुणः पृथिव्या अस्येश्याना जगतो विष्णुपत्नी ॥**

**श्रीजगज्जनन्याः महालक्ष्म्याः इयं सम्भावना ॥**

इति श्रीमहालक्ष्म्यै सम्भावनां समर्पयेत्।

३. श्रीशठकोपसूरेः सम्भावना

श्रीशठकोपसूरेः सम्भावनाम् आदाय –

**ॐ चरणं पवित्रं विततं पुराणं येन पूतास्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूताः अतिपाप्मानमरातिन्तरेम । लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मत् भ्राजमानं महस्तत्। अमृतस्य धारा बहुधा दोहमानं चरणन्नो लोके सुधितान्दधातु।**

**श्रीप्रपन्नजनकूटस्थश्रीशठकोपस्वामिनाम् इयं सम्भावना ॥**

इति श्रीशठकोपसूरये सम्भावनां समर्पयेत्।

४. श्रीरामानुजस्वामिनः सम्भावना

श्रीरामानुजस्वामिनः सम्भावनाम् आदाय –

**ॐ न कर्मणा न प्रजया धनेन त्यागेनैकेऽअमृतत्वमानशुः । परेण नाकं निहितं गुहायां विभ्राजते यद्यतयोविशन्ति । वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयःशुद्धसत्वाः । ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे । दह्रं विपाप्मं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसग्ग्स्थम् । तत्रापि दह्रं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम् । यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥**

**दर्शनस्थापकानां श्रीभाष्यकाराणां श्रीभगवद्–रामानुजाचार्याणाम् इयं सम्भावना ॥**

इति श्रीरामानुजस्वामिने सम्भावनां समर्पयेत् ।

५. श्रीवरवरमुनिस्वामिनः सम्भावना

श्रीवरवरमुनिस्वामिनः सम्भावनाम् आदाय –

**ॐ यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥**

**विशदवाक्–शिखामणीनां श्रीमद्वरवरमुनिस्वामिनाम् इयं सम्भावना ॥**

इति श्रीवरवरमुनिस्वामिने सम्भावनां समर्पयेत् ।

६. आचार्यस्य सम्भावना

आचार्यसम्भावनाम् आदाय –

**ॐ वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तुपारे। सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन् यदास्ते। धातापुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान् प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते॥**

**श्रीमद्वेदमार्गप्रतिष्ठापकाचार्याणाम् .........अमुक–आचार्याणाम् इयं सम्भावना॥**

इति आचार्याय सम्भावनां समर्पयेत्। एवं क्रमेण सर्वेभ्यः आचार्येभ्यः, पाठपारायणकर्तृभ्यः, ब्राह्मणेभ्यः, अन्येभ्यः महाभागवतेभ्यः श्रीवैष्णवेभ्यश्च सम्भावनां समर्पयेत्।

एवं सम्भावनां समर्प्य आवाहितान् देवान् विसर्जयेत्।

## आवाहितदेवविसर्जनम्

पीताक्षतान् पुष्पाणि च आदाय –

**ॐ यान्तु देवगणाः सर्वे पूजामादायमामकीम्।**
**इष्टकामप्रदानाय पुनरागमनाय च॥**
**यज्ञयज्ञंगच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा।**
**एष ते यज्ञो यज्ञपते सह सूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा।**

इति तत्तद्देवावाहनस्थले निक्षिपेत्। इति विसर्जनं कृत्वा साष्टाङ्गप्रणामं कुर्यात्॥

॥ इति श्रीवैकुण्ठोत्सवविधिः॥

श्रीवत्सवंशतिलकाद्धिशुकाख्यसूरेः
संस्कारपञ्चककृतादनिमल्लता या ।
श्रीभाष्यनीरकृतसेचनवर्धिता सा
गोपालजीमूतवराच्च विरम्यते हा ॥
पराङ्कुशीयबहुसूक्तिविनिश्चितस्य
ग्रन्थस्य लेखनकृतेः श्रमिता नवीना ।
ग्रन्थस्य लेखनभवाञ्चतुरश्च दोषान्
क्षान्त्वा गुणान् प्रकरणेन पठन्तु सन्तः ॥

श्रीवृन्दावनवास्तव्यश्रीमद्भागवतरहस्यज्ञश्रीमत्सुदर्शनसूरिचरणचञ्चरीकेण दक्षिणदेशवास्तव्यश्रीमद्गोपालाचार्यकृपालब्धोभयवेदान्तरहस्यकेन कौडिन्येन श्रीपराङ्कुशाचार्येण सङ्कलिता (प्रसादिता) श्रीवैकुण्ठचन्द्रिका समाप्ता ॥

卐 卐 卐 卐

# ❀ परिशिष्टम् ❀

## क. प्रमाणसङ्ग्रहः

### २. ब्रह्ममेधविधेः प्रमाणानि

सति सम्भवे गृहे (मरणस्थले ) एव
रङ्गवल्ल्यादिभिस्तत्र कुर्यात् सर्वत्र मङ्गलम् ।
रोदनं वर्जयित्वैव गोमयेन शुचिस्थलम् ॥
विलिप्य मण्डले तत्र धान्यस्योपर्युलूखलम् ।
कलशांस्तु चतुर्दिक्षु तण्डुलोपरि निक्षिपेत् ॥
हिरण्यपञ्चगव्यानि पञ्च त्वक्पल्लवान्यसेत् ।
वाससा तन्तुना वाऽपि वेष्टयेत्त्रिः प्रदक्षिणम् ॥
उलूखले वासुदेवं कलशेषु क्रमेण तु ।
प्रद्युम्नमनिरुद्धं च संकर्षणमधोक्षजम् ॥
सम्पूज्य गन्धपुष्पाद्यैर्भक्त्या भक्ष्यं निवेदयेत् ।
अभ्यर्च्य मुसलं पुष्पैर्गायत्र्या प्रणवेन च ॥
हरिद्रामवहन्यात्तु परोमात्रेति वै जपन् ।
भगवन्मन्दिरे विष्णुं हरिद्राद्यैः प्रपूजयेत् ॥
पितुः शरीरं विधिवत्स्नापयेत्कलशोदकैः।
तिलैश्च पञ्चगव्यैश्च गायत्र्या वैष्णवेन च ॥
उद्वर्त्य धात्रि (त्री) चूर्णेन तिलैः पञ्चामृतैस्तथा ।
संवाकर्मेति सूक्तेन गायत्र्या वैष्णवेन च ॥
न वा कर्मणेति (ततः) स्नापयेत्पितरं सुतः ।
नारायणानुवाकेन चैवं स्नाप्य ततः पितुः ॥
धौतवस्त्रं च संवेष्ट्य भूषणैर्भूषयेत्ततः ।
गन्धमाल्यैरलंकृत्य शुचौ देशे कुशोत्तरे ॥
तिलोपरि निधायैनं वस्त्रं हित्वाऽन्यतः सुतः ।

धारयेदुत्तरीये द्वे यावत्कर्म समाप्यते ॥
हुत्वैवोपासनं तस्य आर्द्रायज्ञी(ज्ञि)यकाष्ठकैः ।
शिबिकां कारयित्वाऽथ वस्त्रमालादिभिः शुभाम् ।
पिता वा यदि वा माता भ्राता वाऽन्यसुहृज्जनः ।
यदि पञ्चत्वमापन्नः कथं कुर्याद् द्विजोत्तमः । इत्याद्यारभ्य.....
.....
केशवार्पितसर्वाङ्गं शशिभं मङ्गलाद्वयम् ।
न वृथा दाहयेत् विद्वान् ब्रह्ममेधविधिं विना ॥ (वृद्धहारितस्मृतिः ९/८१-११४)
पितृमातृगुरुभ्रातृसुतमातामहादयः ।
संस्कार्याः पिण्डमेवैन यदि पञ्चत्वमागताः ॥ इत्याद्यारभ्य.....
....
अलङ्कृत्य यथा प्रेतं दाहदेशं निवेदयेत् ॥ (वशिष्ठस्मृतिः, ६/३१५-३२२)

## गरुडपुराणेऽपि

ततः सबान्धवः स्नात्वा धौतवस्त्राणि धारयेत् ॥
सद्यो जलं समानीय ततस्तं स्नापयेच्छवम् ।
मण्डयेच्चन्दनैः स्रग्भिर्गङ्गामृत्तिकयाऽथवा ॥
संमार्ज्य भूमिं संलिप्योल्लिख्योद्धृत्य च वेदिकाम् ।
अभ्युक्ष्योपसमाधाय वह्निं तत्र विधानतः ॥ (गरुडपुराणम्, प्रेतकल्पः)

## ३. ब्रह्ममेधस्याग्नेर्नाम्नः प्रमाणम्

अपावृत्य गार्हपत्याद् क्रव्यादा प्रेत दक्षिणा ।
प्रियं पितृभ्य आत्मने ब्रह्मभ्यः कृणुताप्रियाम् ॥ (अथर्ववेदः, १२/२/३४)
इति प्रमाणात् गार्हपत्यनामाग्निः ब्रह्ममेधे ।

## ४. षट्पिण्डानां प्रमाणानि

स्थाने द्वारेऽर्धमार्गे च चितायां शवहस्तके ।
अस्थिसञ्चयने षष्ठो दश पिण्डाः दशाह्निकाः ॥
(सारोद्धारगरुडपुराणम्, प्रेतकल्पः, १२/५८)

## ५. दशाहाभ्यन्तरे हवनप्रमाणानि (हवनाधिकारिकर्तृणामेव)

क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्ञो गच्छन् रिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ (ऋग्वेदः, १०/१६/९)

क्रव्यादम् । क्रव्यमामिषं । तस्यात्तारं तीव्रमग्निं दूरं विप्रकृष्टदेशे प्र हिणोमि । प्रगमयामि । रिप्रवाहः । रिप्रं पापं तस्य वोढा सोऽग्निर्यमराज्ञो यमो राजा येषां तान् यमराजकान् अन्य प्रदेशान् गच्छतु प्राप्नोतु । अथ शान्तिकर्मार्थमुपासन इतर क्रव्यादादन्यो जातवेदा जातानां वेदिता जातधनो वा प्रजानन् सर्वैर्विज्ञायमानोऽग्निरहैव देशे देवेभ्यो देवार्थं हव्यं हवनयोग्यं हविर्वहतु । प्रापयतु । (सायणभाष्यम्)

यो अग्निः क्रव्यात्प्रविवेश वो गृहमिमं पश्यन्नितरं जातवेदसम् ।

तं हरामि पितृयज्ञाय देव स घर्ममिन्वात्परमे सधस्थे ॥(ऋग्वेदः, १०/१६/१०)

यः क्रव्यादोऽग्निर्देवो युष्माकं गृहिणां गृहं प्रविवेश प्रविष्टवान् तं क्रव्यादं देवं हरामि । गृहाद् बहिर्निष्क्रामयामि इत्यर्थः । किमर्थं पितृयज्ञाय तदर्थम् । किं कुर्वन् । इमिमितरं तस्मादन्यं हव्यवाहं जातवेदसम् पश्यन् पर्यालोचयन् । तथा सति क्रव्यादात्परोऽग्निः परम उत्कृष्टे सधस्थे सदस्थाने घर्मं यत्रमिन्वात् । प्राप्नोतु । (सायणभाष्यम्)

अन्वष्टकस्थालीपाकेन पिण्डपितृयज्ञो व्याख्यातः । पिण्डपितृयज्ञः पिण्डं शरीरं भस्मीभूतं तदुपलक्ष्य यत् पितृपुरुषस्यार्चनं तदेव कर्म पिण्डपितृयज्ञ इत्युच्यते । (गोभिलगृह्यसूत्रम्, चतुर्थप्रपाठकम्, तृतीयखण्डः)

### अस्य व्याख्यानं संस्काररत्नमालायाम् –

पिण्डैः पिण्डदानेन सहितः । पितृभ्यो देवेभ्यो यज्ञो होमः स पिण्डपितृयज्ञः । पिण्डाः मानुषेभ्यः पितृभ्यो दीयन्ते इति प्रसिद्धम् । तदिदं पिण्डदानं पिण्डशब्देनोपलक्षितम् । तेन सहभावो देवरूपपितृहोमस्योक्तः । तेन पिण्डदानहोमरुभयोरपि प्राधान्यमुक्तम् । तेनास्य कर्मणो दैवत्वं पित्र्यत्वं चास्ति । (गोपीनाथदीक्षितविरचिता संस्काररत्नमाला, उत्तरार्धम् )

## सपिण्डीकरणान्तानि श्राद्धानि लौकिकाग्निना कार्याणि

तदुक्तम् –

सपिण्डीकरणान्तानि प्रेतश्राद्धानि यानि वै।

तानि स्युर्लौकिके वह्नावित्याह चाश्वलायनः।

(पारश्करगृह्यसूत्रम्, परिशिष्टभागः, श्राद्धसूत्रम्, चतुर्थी कण्डिका, गदाधरभाष्यम्)

(उपर्युक्तैः श्रुतिस्मृतिवचनैः मलीनषोडशश्राद्धेऽपि हवनं कर्तव्यमेवेति स्पष्टमस्ति, परन्तु द्विजेतराः हवनानधिकारिणः कर्तारः सन्ति चेत् तेषां कृते हवनं नावश्यकम्, तैः हवनं विनैव दशगात्रकर्माणि कार्याणि)

## ६. दशाहाभ्यन्तरे मानसिकसन्ध्याबन्धनस्य प्रमाणम्

सूतके मृतके चैव सन्ध्याकर्म न सन्त्यजेत्।

व्योम्नि च हृदये वापि मनसा संस्मरेद्धरिम्॥ (वसिष्ठस्मृतिः ६/४६६)

## ७. तिलकधारणप्रमाणम्

श्राद्धं होमस्तथा दानं स्वाध्यायपितृतर्पणम्।

भस्मीभवति तत्सर्वमूर्ध्वपूण्ड्रं विना कृतम्॥

ऊर्ध्वपुण्ड्रं विना यस्तु श्राद्धं कुर्वीत स द्विजः।

सर्वं तद्राक्षसैर्नीतं नरकं चाधिगच्छति॥(वृद्धहारितस्मृतिः २/५९, ६०)

मासिके च सपिण्डे च प्रतिसंवत्सरे तथा।

व्यर्थं भवति तच्छ्राद्धं वासुदेवं विना कृतम्॥

जपस्तपः श्राद्धकर्म स्वाध्यायादिकमेव च।

व्यर्थं भवति तत् सर्वमूर्ध्वपुण्ड्रं विना कृतम्॥ (बाधूलस्मृतिः, १९९, २००)

शिखोपवीतवद् धार्यमूर्ध्वपुण्ड्रं द्विजेन च।

विना कृताश्चेत् विफलाः क्रियाः सर्वा महामुने॥(देवीभागवतम्, ११-१५-१०५)

## ९. चितायां शवस्थापनाप्रकारः

सामेतरेषामुत्तरशिरस्त्वम् (श्राद्धतत्वम्)।

सन्दिग्धे सति विवाहश्मशानयोर्ग्रामं प्रविशतात् इति पारस्करगृह्यसूत्र-वचनानुसारमुत्तरशिरस्त्वमेव।

ततो नीत्वा श्मशानेषु स्थापयेदुत्तरामुखम्॥ (गरुडपुराणम्, प्रेतकल्पः)

## १०. चितापरिभ्रमणपूर्वकमस्त्रकलशस्य वियति प्रक्षेपणे प्रमाणम्

ततोऽस्त्रकुम्भमादाय वरुणाशादितो द्विज।

विक्षिपन्नौदकीं धारां वामतश्च परिभ्रमेत्।

दिशि क्षिपेद्दक्षिणस्यां कलशं गगनोपरि॥ (जयाख्यसंहिता, चतुर्विंशपटलः ६१, ६२)

## ११. उदककुम्भदाननिर्णयः (मासिके)

कुर्वीत परया भक्त्या वैकुण्ठपदमाप्नुयात्।

नित्यं च प्रतिमासं च पित्रोः श्राद्धं विधानतः॥

सोदकुम्भं प्रदद्यात्तु यावदब्दान्तिकं नरः।(बृहद्ब्रह्मसंहिता३/९/१५१-१५२)

नित्यञ्च प्रतिमासञ्च पित्रोः श्राद्धं विधानतः।

सोदकुम्भं प्रदद्यात्तु यावदब्दान्तिकं द्विजः॥ (हारितस्मृतिः)

यावदब्दं तु यो दद्यादुदकुम्भं विमत्सरः।

प्रेतायान्नसमायुक्तं सोऽश्वमेधफलं लभेत्॥ (मत्स्यपुराणम्)

अर्वाक्सपिण्डीकरणं यस्य संवत्सराद्भवेत्।

तस्याप्यन्नं सोदकुम्भं द्वयं दद्याद्विजन्मने॥ ( याज्ञवल्क्यस्मृतिः)

यस्य संवत्सरादर्वाक्सपिण्डीकरणं कृतम्।

मासिकं चोदकुम्भश्च देयौ तस्यापि वत्सरम्॥ ( अङ्गिरास्मृतिः)

## १२. पात्रालम्भननिर्दशप्रकारः

दक्षिणं तु करं कृत्वा वामोपरि निधाय च।

देवपात्रमथालभ्य पृथ्वी ते पात्रमुच्चरेत्॥

दक्षिणोपरि वामं च पित्र्यपात्रस्य लम्भनम्।

पात्रालम्भनं कुर्याद् दत्त्वा चान्नं यथाविधिः॥

पित्र्येऽनुत्तानपाणिभ्यामुत्तानाभ्यां च दैवते।(श्राद्धकाशिका)

## १३. वैष्णवपितृणां स्वरूपप्रमाणम्

केचित्तु (वैष्णवाः) पितृपितामहप्रपितामहाः प्रद्युम्नसङ्कर्षणवासुदेवात्मना ध्येयाः । कर्तानिरुद्धात्मनेत्याहुः अतः वैष्णवैः वसुरुद्रादित्यस्वरूपाणां स्थाने प्रद्युम्नादयः श्राद्धदेवताः मन्यन्ते। (धर्मसिन्धौ श्राद्धदेवताविचारः)

येन श्राद्धं कृतं ब्रह्मन् तं विद्यादनिरुद्धकम्।
प्रद्युम्नं च ततो विद्यात्सङ्कर्षणमतः परम्॥
वासुदेवं च तत्पश्चात्प्रपितामहमर्चयेत्। (श्रीमन्नारायण संहिता ३/४/३०-३१)
पितापितामहाश्चैव तथैव प्रपितामहः।
प्रद्युम्नसङ्कर्षणकवासुदेवस्वरूपकाः॥ (बृहद्ब्रह्मसंहिता ३/१०/२६-२७)

## १४. सपिण्डीकरणे जलसंयोजनप्रमाणम्

गन्धोदकतिलैर्युक्तं यावदनुष्ठानम्।
प्रेतपात्रोदकं तेषु पितृपात्रेषु योजयेत्॥
पृथक् संयोजयेदद्भिः सङ्गच्छध्वमिति ऋचा।
ये समाना इति द्वाभ्यां मधुवाता इति ऋचा॥(वसिष्ठस्मृतिः ६/३६८,३६९)

## १५. सपिण्डनश्राद्धकर्मणि भगवदाराधनकरणप्रमाणम्

मासिके च सपिण्डे च प्रतिसंवत्सरे तथा।
व्यर्थं भवति तत्सर्वं वासुदेवं विना कृतम्॥(वाधूलस्मृतिः श्लो.सं.१९९)

## १६. पुत्तलकनिर्माणे प्रमाणानि

पश्चात्पुत्तलकं कार्यं सर्वौषधिसमन्वितम् ।
पलाशस्य च वृंतानां विभागं श्रृणु काश्यप॥
कृष्णाजिनं समास्तीर्य कुशैश्च पुरुषाकृतिम्।
इत्याद्याराभ्य
स्त्रियः:पुनन्तु मे शिर इमं मे वरुणेन च ।
प्रेतस्य पावनं कृत्वा शालग्रामशिलोदकैः॥
विष्णमुद्दिश्य दातव्या सुशीला गौः पयस्विनी।

महादानानि देयानि तिलपात्रं तथैव च ॥
अग्निदाहं ततः कुर्य्यात् सूतकं तु दिनत्रयम् ।
दशाहं गतपिण्डाश्च कर्त्तव्या विधिपूर्वकम् ॥ (गरुडमहापुराणम्)

## १७. पञ्चकमरणे शान्तिप्रमाणम्

धनिष्ठा पञ्चके जीवो मृतो यदि कथञ्चन ।
त्रिपुष्करे याम्यभे वा कुलनान् मारयेद् ध्रुवम् ॥
तत्रानिष्टविनाशार्थं विधानं समुदीर्यते ।
प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूपिमः ॥
प्रेतहर्ता पञ्चमस्तु नामान्येतानि च क्रमात् ।
सूतकान्ते ततः पुत्रः कुर्याच्छान्तिकपौष्टिकम् ॥(ब्रह्मपुराणम्)

## १८. वार्षिकश्राद्धे पिण्डप्रमाणम्

प्रत्यब्दं पार्वणं कुर्यात् मातापित्रोर्मृतेऽहनि ।
अर्चयित्वाऽच्युतं भक्त्या पश्चात् कुर्याद्विधानतः ॥(वृद्धहारितस्मृतिः ६/१४७)
प्रत्यब्दं पार्वणं कुर्यात् मातापित्रोर्मृतेऽहनि ।
अन्यथा कुरुते यस्तु ब्रह्महत्यां स विन्दति ॥
अकृत्वा पार्वणं श्राद्धं मातापित्रोर्मृतेऽहनि ।
स चण्डालो भवेत् सद्यो रौरवं नरकं व्रजेत् ॥(वसिष्ठस्मृतिः, ६/३७६, ७७)
प्रत्यब्दं पार्वणश्राद्धं मातापित्रोर्मृतेऽहनि ॥(बृहद्ब्रह्मसंहिता ३/९/१५२)

## १९. बदरिकाक्षेत्रे ब्रह्मकपालकृते सत्यपि गृहेऽपि पिण्डदानं कर्तव्यम्, इत्यत्र प्रमाणम्


श्रीमद्बदरिकाक्षेत्रस्थितब्रह्मकपालके ।
पिण्डदानाब्दिके प्राप्ते कर्तव्यं यत्सदा गृहे ॥
(अन्त्यकर्मश्राद्धप्रकाशः, वायुपुराणम्)

॥ इति प्रमाणसङ्ग्रहः ॥

卐卐卐卐


# ❀ चित्रावलिः ❀

## १. ब्रह्ममेधस्थापनप्रकारः



२. दशाहकर्मस्थापनाप्रकारः

पूर्व





★ हवनानधिकारी कर्ताका लागि हवनवेदी नराख्ने

---

३. पाथेयश्राद्धस्थापनाप्रकारः

पूर्व





★ हवनानधिकारी कर्ताका लागि हवनवेदी नराख्ने




Upayogibooks.com

## ४. मध्यमषोडशश्राद्धस्थापनप्रकारः




★ हवनानधिकारी कर्ताका लागि हवनवेदी नराख्ने

## ५. उत्तमषोडशश्राद्धस्थापनप्रकारः





★ हवनानधिकारी कर्ताका लागि हवनवेदी नराख्ने



Upayogibooks.com

## ६. आद्याब्दिकश्राद्धस्थापनप्रकारः




★ हवनानधिकारी कर्ताका लागि हवनवेदी नराख्ने

---

## ७. पञ्चकशान्तिस्थापनप्रकारः





★ यो स्थापना धनिष्ठा नक्षत्रमा मृत्यु भएकाको लागि हो। यसैगरी जुन नक्षत्रमा मृत्यु भएको हो त्यो नक्षत्रकलश १ मा (बिचमा) राखेर त्यो भन्दा अगाडिका नक्षत्रकलशलाई क्रमशः २ देखि राख्ने।



Upayogibooks.com

## ८. दुर्मरणनिमित्तक–नारायणबलिस्थापनप्रकारः



## ९. सपिण्डीकरणश्राद्धस्थापनक्रमः

दीपः पूर्व

भगवद्वेदी | हवनवेदी

कर्ता

उ.

कर्ता


- ३ वासुदेवः(प्रपितामहः)
- २ सङ्कर्षणः(पितामहः)
- १ प्रद्युम्नः(पिता)

द.

- ४ अनिरुद्धः(दिवंगतः)

- ↑ विश्वेदेवाः (पूर्वाभिमुखः)

## १०. वैकुण्ठोत्सवे नारायणबलिस्थापनप्रकारः



## १. ब्रह्ममेधका लागि आवश्यक सामाग्रीहरू

कर्मपात्र, कुश, तिल, जौ, चन्दन, श्रीखण्ड, पुष्प, दुबो, पीताक्षत, दीयो, बाती, जनै, सुपारी, माटाका २१ ओटा घडा, माटाको अलि ठूलो घडा १, शव राख्ने केराको पात, रंगवल्लीका लागि पिठो, हर्दि (बेसार), धान, चामल, घ्यू, दुना, बोहोता, टपरी, अगरवत्ती, लाजा, चानचुने पैसा, ओखल मूसल(खल-बच्चा), काँचो पाना हर्दि, अमलाको पात या चूर्ण, पञ्चपल्लव, विमान सजाउने वस्त्र, शवलाई लगाई दिने धोती आदि वस्त्र, सेतो कपडा, पहेँलो कपडा, रातो कपडा, रामनामी, पीताम्बर वस्त्र, हरियोबाँस, अग्नि लाने माटाको पात्र, गोबर गुईठा, समिधा, सागरमा लाने बञ्चरो, खुकुरी, कोदालो, तुलसी-श्रीखण्ड आदि सुगन्धित लकडी, सलाई, पञ्चगव्य ( गाईको दूध, दहि, घिउ, गोमूत्र, गोवर), गंगाजल, भगवान्को तीर्थ, श्रीपाद तीर्थ, तिलकपेटी, श्री, तिलक, पञ्चमाला, फूलमाला, बाल्टी, शुद्धजल, काँचो धागो, कपूर, क्रियापुत्रीले लाउने धोती आदि वस्त्र, इत्यादि ॥

## २. दश दिनसम्मको लागि सामाग्री

तिल, जौ, कुश, सेतो फूल, सर्स्यूं, डालो, भृङ्गीराज, फलामका पैसा, उशीर, ऊनको धागो, बाती, सलाई, गाईको दूध, धूप, गोमूत्र, गोबर, आसन, खोँची, पात, सिन्का, चनौटो, बेसार, चन्दन, अक्षता, कुश, सिधाको सामान, पञ्चगव्य, जनै, नैवेद्य, फलफूल, सुपारी, माटाको दीयो साना ११, सप्तधान्य,(जौ,धान, गहूँ, कागुनु, मुंग, चना, सावा) पिण्ड पकाउने भाँडो, त्रिकाष्ठी ५, काँचो धागो, सालका पात, माटाको घडा-१५, खाना पकाउने भाँडो, समिधा(हवन सामाग्री) तिल, घ्यू, हाँडी १, माटाको दीयो ठूलो, सुनको फाली, चाँदीको कोदालो।

## ३. एघारौं दिनमा चाहिने सामाग्री

### क. नारायणबलीको सामाग्री

आसन पाँच, कम्बल, चौकी २ हाथ लामो २हाथ चौडा, सेतो कपडा३ मिटर, कलश ६, पाला ६, चामल, रोली, अवीर, सिन्दुर, बेसार, सुपारी ६० ओटा, धूप, जनै २५ वटा, कपूर १ बट्टा, सर्वौषधी, सप्तधान्य (जौ, गहूँ, धान, कागुनु, मुगी, चना, साँवा), पञ्चपल्लव(वर, पिपल, डुम्री, आँप, पाखरी), मौली, रुई कपास, नरिवल ६ वोटा, पहेंलो कपडा १ मिटर, कालो कपडा १ मिटर, रातो कपडा आधा मिटर, हरियो वा कालो कपडा आधा मिटर, ऋतुफल, पञ्चामृत, पञ्चगव्य, सेतो फूल, माला, पुष्प, तुलसी, चन्दन, सलाई, वात्ती, सत्येशको लागि सुनको प्रतिमा, विष्णुको लागि सुनको प्रतिमा, ब्रह्माको लागि चाँदीको प्रतिमा, रुद्रको लागि तामाको प्रतिमा, प्रेतको लागि राँग वा सीसाको प्रतिमा, यमको लागि फलामको प्रतिमा, पञ्चरत्न, गाईको घिउ , शङ्ख सानो १, शालग्राम १, सिंहासन, घण्टी , तर्पणको लागि पात्र, विष्णुपूजनको लागि धोती, पीताम्बर कपडा, वरण सामाग्री सामार्थ्यानुसार धोती गम्छा, जनै, द्रव्य, माला, आदि ।

हवन सामाग्री – कालो तिल, चामल, धान, टपरा, दुना, बोहोता, जौ, समिधा, चरुपात्र, पूर्णपात्र पित्तलको १, आज्यस्थाली काँसको कटौरो, काँसको छायापात्र १, धूप, तिलको तेल, कुश, घ्यू, दियो, कलश, सुरो इत्यादि ।

### ख. मध्यमषोडशीश्राद्धको सामाग्री

बस्ने आसन, कम्बल, गङ्गाजल, बालुवा वा शुद्ध माटो, पायस पकाउनका लागि भाडो, पन्यू, गाईको दूध, चामल, शख्खर, तिल, जौ,

सुपारी, पान, वाती, धूप, घिउ, दियो, सलाई, सर्स्यूं, जनै, फलफूल, नैवेद्य, पुष्प, तुलसी, माटाको दियो, कुश, चन्दन, बाल्टी, लोटा, थाली, दुना, टपरी, सिधाको सामान, बेसार, रेखीहाल्ने पीठो, कर्मपात्र ३, (हवन गर्ने भए - समिधा, घिउ आदि हवन सामाग्री) इत्यादि।

### घ. आद्याब्दिकश्राद्धको सामाग्री

गङ्गाजल, बालुवा वा शुद्ध माटो, गाईको दूध, चामल, शख्खर, कालो तिल, जौ, मह, सुपारी, चन्दन, घिउ, सर्स्यूं, काँचो धागो, सीधाको सामाग्री, फलफूल, फूलको माला, सलाई, कुश, जल राख्न लोटा, थाली, दीयो, धूप, वाती, नैवेद्य, दुना, टपरी, (हवन गर्ने भए - समिधा, घिउ आदि हवन सामाग्री) इत्यादि।

### ङ. उत्तमषोडशश्राद्धको सामाग्री

गङ्गाजल, शुद्ध माटो या बालुवा, पिण्ड पकाउने भाँडो, गाईको दूध, चामल, शख्खर , तिल, जौ, मह, सुपारी, चन्दन, घिउ, सर्स्यूं, नैवेद्य, फलफूल, अलैंची, कुश, बाल्टी, लोटा, थाली, पञ्चपात्र, बस्ने आसन, कम्बल, दुना, टपरी, दियो, फूल, चन्दन, अक्षता, सिधाको सामान, बेशार, रेखीहाल्ने पीठो, ( हवन गर्ने भए - वेदी बनाउने सामान, समीधा, हवन गर्ने घिउ आदि हवन सामाग्री) ।

### च. उदककुम्भदान सामाग्री

ठूलो घडा १, साना-साना घडा वा खोचा ३६० (पुरुषोत्तम पर्ने भए ३९०), दीयो, सलाई, दतिवन ३६०( पुरुषोत्तम पर्ने भए ३९० दतिवन), सिधा, धूप, वाती, नैवेद्य, कुश, चामल, दुना, टपरी, चन्दन, अक्षता, फूल, जनै, सुपारी, दीयो, इत्यादि।

## ४. सपिण्डनश्राद्धको सामाग्री

सुनको तार , टपरा, दुना, धूप, वाती, सलाई, नैवेद्य, कुश, तिल, जौ, फूल, फलफूल, चामल, जनै १० जोर, सुपारी, सिधा ६ भाग, पिण्ड पकाउने भाँडो, पन्यू, गाईको दूध, मह, घिउ, ब्राह्मण वरण सामाग्री, कर्मपात्रो ३ वटा, पञ्चगव्य, सेतो कपडा, पहेंलो कपडा, कर्मपात्र, दीयो, हवनको सामाग्री, ।

## ५. पददानको सामाग्री

छाता, जुत्ता, वस्त्र, औंठी, कमण्डलु, आसन, पञ्चपात्र, दण्ड, तामाको पात्र, अन्न भोजन, द्रव्य, यज्ञोपवीत ।

(यी १३ प्रकारका सामग्रीको एक पद हुन्छ, सम्भव भएसम्म यस्ता १३ पद बनाएर १३ जना ब्राह्मणलाई दान गर्नु पर्छ, नभए १ पद दान गर्दा पनि हुन्छ ।)

## ६. शय्यादानको सामाग्री

खाट वा पलङ, सिरक, डसना, तन्ना, झूल, दरी, सिरानी, थाल, कचौरा, गिलास, पकाउने भाडा सम्पूर्ण, स्टोभ वा ग्यास, लक्ष्मीनारायण भगावान्को चित्र, प्रतिमा वा शालग्राम भगवान्, पूजा आराधनाका सम्पूर्ण सामाग्री, भगवान्को वस्त्र, लक्ष्मीजीको सौभाग्य सामाग्री, तिलक पेटी, तुलसी माला, छाता, लौरो, ब्राह्मण दम्पतीका लागि यथाशक्य वस्त्र तथा श्रृङ्गार, जुत्ता, सिधा अन्न, पक्वान्न, फूल, माला, दीप, कलश, धान, चामल, दुना टपरी इत्यादि ।

## ७. मासिकश्राद्धको सामाग्री

चन्दन, अक्षता, पुष्प, तुलसी, दीप, धूप, वाती, नैवेद्य, भगवत्पूजनको सामाग्री, सीधा, घडामा जल, मह, शक्खर, दुना, टपरी, तिल, जौ, कुश, जनै, सुपारी, ब्राह्मणभोजनको सामाग्री, द्रव्य दक्षिणा इत्यादि ।

## ८. वैकुण्ठोत्सवको सामाग्री

सुनको प्रतिमा वा शालिग्राम भगवान्, धातुको मूल घडा १, धातुको थाली १, तिल १किलो, माटाका घडा ३५, पहेँलो सुतीको कपडा ३मि., सेतो कपडा २मि., सुतीको धोती २, कुश, तुलसी, पुष्प, दुबो, माला पर्याप्त, जटा सहितको नरिवल ७, मौली धागो, जनै ३५, सुपारी ५०, पानपत्ता, अष्टगन्ध, सर्स्यूं ५० ग्रा., ल्वाङ, सुकमेल, खुद्रा पैसा, भगवान्का लागि वस्त्र, लक्ष्मीजीका लागि वस्त्र, श्रृङ्गार सामाग्री, आँप वर पिपलका पात, दिवङ्गतको फोटा, भगवान् एवम् आचार्यका फोटाहरू, समिधा, गाईको घिउ, बत्तिबाल्ने तिलको तेल, बाती, कपूर, लाजा, पात टुप्पो सहितको उखु १०/१२ओटा, चक्राब्ज मण्डल बनाउने चौकी, गाईको दूध, दहि, मह, चिनी, गोमूत्र, गोबर, चामल, धान, अक्षता रंगाउन रंग - रातो, हरियो, पहेंलो, कालो २/२ पत्ति, दूना, टपरी, बोहोता, आचार्यहरूको वरण सामाग्री यथाशक्ति, श्री-तिलक, बेसार, काँचो धागो, फलफूल, भोग लगाउने पञ्च मेवा काजु किसमिस छोगडा आदि, पक्वान्न नैवेद्य,

पूजनका वर्तनहरू - थाली, पञ्चकटौरी, आचमनी, कपूर आरती पात्र, आरती, हवनका लागि धातुको कचौरो, तर्पणका लागि पात्र, लोटा, चम्मर, दियो, इत्यादि ।

श्रीमते रामानुजाय नमः

# ❀ अर्चिरादिमार्गः ❀

(वसिष्ठस्मृत्युक्तः)

शंखचक्रोर्द्ध्वपुण्ड्रादिधारणं दास्यलक्षणम् ।
पूजयित्वा जगन्नाथं यावज्जीवमतन्द्रितः ॥१॥
इह भुक्त्वा मनोरम्यान् भोगान्सर्वान् यथेप्सितान् ।
सुखेन देहमुत्सृज्य जीर्णत्वञ्च मिवोरगः ॥२॥
स्थूलसूक्ष्मात्मिकां चेमां विहाय प्रकृतिं द्रुतम् ।
सारुप्यमीश्वरस्याशु गत्वा तु स्वजनैः सह ॥३॥
दिव्यं विमानमारुह्य वैकुण्ठं नाम भास्वरम् ।
दिव्याप्सरोगणैर्युक्तो दिव्यभूषणभूषितः ॥४॥
स्तूयमानः सुरगणै र्गीयमानश्चकिन्नरैः ।
ब्रह्मलोकमतिक्रम्य भित्वा ब्रह्माण्डमण्डलम् ॥५॥
विष्णुचक्रेण वै भित्वा सर्वानावरणान् घनान् ।
अतीत्य विरजामाशु सर्वं वेदस्रवां नदीम् ॥६॥
अभ्युद्गच्छद्भिरव्यग्रैः पूज्यमानः सुरोत्तमैः ।
संप्राप्य परमं धाम योगिगम्यं सनातनम् ॥७॥
यद्गत्वा न निवर्तन्ते तद्धाम परमं हरेः ।
तद्विष्णोः परमं धाम सदा पश्यन्ति योगिनः ॥८॥
शीतांशुकोटिसंकाशैः सर्वैश्च भवनैर्युतम् ।
आरुढयौवनैर्दिव्यैः पुंभिः स्त्रीभिश्च संकुलम् ॥९॥
सर्वलक्षणसंपन्नैर्दिव्यभूषणभूषितैः ।
अक्षरं परमं व्योम यस्मिन् देवा अधिष्ठिताः ॥१०॥

इरावती धेनुमती व्यस्तभ्ना सूयवासिनी ।
यत्र गावो भूरिश्रृङ्गाः सायोध्या देवपूजिताः ॥११॥
अनन्तव्यूहलोकैश्च तथातुलशुभावहैः ।
सर्ववेदमयं तत्र मण्डपं सुमनोहरम् ॥१२॥
सहस्रस्थूणासदसि ध्रुवे रम्योत्तरे शुभे ।
तस्मिन् मनोरमे पीठे धर्माद्यैः सूरिभिर्युते ॥१३॥
सहासीनं कमलया दृष्ट्वा देवं सनातनम् ।
स्तुतिभिः पुष्कलाभिश्च प्रणम्य च पुनःपुनः ॥१४॥
प्रहर्षपुलको भूत्वा तेन वालिङ्गितः क्रमात् ।
पूजितः सकलै र्भोगैः श्रिया चापि प्रपूजितः ॥१५॥
अनन्तविहगेशाद्यैरर्चितः सर्वदैवतैः ।
तेषामन्यतमो भूत्वा मोदते तत्र देववत् ॥१६॥
येषु येषु च लोकेषु तिष्ठते कमलापतिः ।
तेषु तेष्वपि देवस्य नित्यदासो भवेत्सदा ॥१७॥
दासवत्पुत्रवत्तस्य मित्रवद्बन्धुवत्सदा ।
अश्नुते सकलान्कामान्सह तेन विपश्चिता ॥१८॥
इमाल्लोकान् कामभोगः कामरूप्यनुसंचरन् ।
सर्वदा दूरविध्वस्तदुःखलेशलवांशकः ॥१९॥
गुणानुभजप्रीत्या कुर्याद् दास्यमशेषतः ।
इममेव परं मोक्षं विदुः परमयोगिनः ॥२०॥
काङ्क्षन्ति परमं दास्यमुक्तमेवं महर्षयः ।
हरेर्दास्यैकपरमां भक्तिमालम्व्यमानवः ॥२१॥
इहैवमुक्तो राजर्षे सर्वकर्मनिबन्धनैः ॥२२॥


॥ इति अर्चिरादिमार्गः ॥







बृहद् श्रीवैष्णवीय कर्मकाण्ड संगोष्ठी २०७०, श्रीमुक्तिनाथ सन्तसेवाश्रम, रामघाट, पोखरा



**लेखक/सङ्कलक**

श्रीमद्वेदमार्गप्रतिष्ठापनाचार्य,
उभयवेदान्तप्रवर्तकाचार्य,
श्रीमत्परमहंसपरिव्राजकाचार्य,
अनन्तश्रीविभूषित त्रिदण्डी
पराङ्कुशाचार्य (शठकोप) यतिराज
रामानुज जीयर स्वामीजी महाराज

**पुस्तक प्राप्ति स्थान -**

१) **श्रीवैष्णव परिषद् नेपाल**
केन्द्रीय कार्यालय, काठमाडौं, फोन: ०१-४४९२१८५

२) **श्रीशुकदेव भागवत आश्रम**
गैंडाकोट, नवलपरासी, फोन: ०७८-५०१८९८

३) **धार्मिक पुस्तक पसलहरू**





ग्रन्थप्रकाशनका लागि आर्थिक सहयोग
श्रद्धेय मातापिता वै.वा. नन्दकुमारी (नारायणी रा.दा.) एवं
वै. वा. नारायणप्रसाद (नारायण रा.दा.) सुवेदी का स्मृतिमा
पुत्र एवं पुत्रवधू श्रीदेवराज/सम्झना सुवेदी, विराटनगर महानगरपालिका - ३, मोरङ